अथ

# प्रणववादे द्वितीयभागः ॥

तत्र

## तृतीयप्रकरणे दशमस्तरङ्गः ।

अथ च त इमे ह्युपनिषत्प्रबन्धाः, ये च वेदानां व्याख्यानरूपा भवन्ति । तेऽपि ब्राह्मणकर्तृभिर्ब्रह्मविष्णुशिवैः पुरुषैर्विरचिताः सन्ति । अत एव "उपनिषदां रचनास्तादृश्योऽपि वेदव्याख्यानरूपा एव" इत्यादि वचनं सर्वत्र स्पष्टमुक्तं भवति । एवं हि किल तयोर्भेदः परिदृस्यते—वेदे हि मूलभूते च प्रकृतिविकृतिस्वभावावश्यकाकाशाद्युत्पत्तिः कथिता भवति, ब्राह्मणे च पृथिव्यप्तेजोवाय्वाकाशादीनां स्थूलतत्वानां वर्णनं परिदृश्यते, उपनिषत्सु च तथा तत्तद्वेदानुगुणं ज्ञानक्रियेच्छासमाहारानुसन्धानात्समाहारेच्छाक्रियानुसन्धानाच्च वेल्यादिपरिवर्तनेन तत्कृतकार्यवर्णनम्, परमाण्वादिकल्पनञ्च विज्ञायत इति । द्रष्टव्योऽयं क्रमः सर्वत्र

चैवमस्ति—प्रथमं मूलव्याख्यानम्, ततस्तद्विभागवर्णनम्, ततस्तत्रैव तत्कार्यवर्णनमिति । सार्वत्रिकश्चायं व्यवहारो भवति । अनेनैव हि नियमेन तदुपनिषत्प्रबन्धेषु, प्रतितत्वञ्च जायमानपरमाणूनां स्वरूपमभिवर्णितं भवति । एवमेव ह्यवगम्यते—इमानि पुनः परमाणूनि ज्ञानपराणि, इमानि च क्रियापराणि, इमानि त्विच्छाविशिष्टानि, इमानि हि समाहारस्वरूपाणि इति । प्रत्येकमपि परमाणूनां यच्च वा कार्यं प्रयोजनम्, तत्सर्वं ह्युपनिषत्प्रबन्धेषु सम्यग्व्याख्यातं भवति । अत एव—

"महद्बुद्धिस्तथाकाशो वायुस्तेजस्तथाऽपराः ।
आपः पृथ्वीति सर्वस्वं विस्तीर्णं कार्यसञ्चये ॥
परमाणोः कल्पनं यद्येन चास्य प्रयोजनम् ।
ज्ञाननिष्ठानि यान्येव क्रियानिष्ठानि यानि च ॥
इच्छानिष्ठानि यान्येव समाहारावृतानि च ।
तत्सर्वं विस्तरेणैव व्याख्यातं भावसन्निभम् ॥
येन यस्य विनाशः स्याद्यस्माद्यज्जायते विधौ ।
तत्सर्वमुपनिषत्सु व्याख्यातं हि यथाक्रमम् ॥
एकाक्षरपरं सर्वं भाति प्रणवगोचरम् ।
कृत्वा सर्वं समानञ्च तादृशं ब्रह्मसंज्ञकम् ॥
नैवाणुः परमाणुश्च वस्तुतो विद्यते क्वचित् ।
सर्वदा सच्चिदानन्दश्चैकवद्भावलक्षितम् ॥"



इत्यादि प्रवचनम् । तस्मादेकैकस्मिन्नप्युपनिषत्प्रबन्धे च सर्वपरमाणूनां स्वरूपमभिहितं भवतीति विज्ञेयम् ।

अत एव हि वेदस्य त्रयो विभागाः, ब्राह्मणभागो मन्त्रभागो ह्युपनिषद्भागश्चेति । भाग इत्युक्त्या हि केवलं तदपरिपूर्णत्वमेव गृह्यते । ततश्च यथा नान्तरेण ब्राह्मणं वेदस्य पूर्णत्वम्, तथोपनिषदमन्तरा ब्राह्मणस्य पूर्णत्वं नावगम्यते ; एवं न ताभ्याञ्च विना वेदस्य पूर्णतेति हि व्याख्यानं फलितं भवति ।

ब्राह्मणग्रन्थैस्तु पुनः केवलमाकाशादितत्वपरिभावना, उपनिषद्भिस्तु सर्वसंसारमात्रस्य कार्याभिज्ञापनं हि भवति । दृश्यताम्—संसारेऽस्मिंश्च परमाणुरेव सर्वकार्यकर्तेति प्रत्यक्षं विज्ञायते, अन्तरा च परमाणुं न शरीरनिर्माणसंभवः । तस्मात्परमाणोर्व्याख्यानं तत्सामानाधिकरण्यं वैयधिकरण्यञ्च सर्वमुपनिषद्ग्रन्थेन बोधितं भवति । प्रत्येकमपि कार्याणां तादृशं परमाणुचतुष्टयं विनियुक्तं भवति । परमाणुश्च पुनः ज्ञानवानिच्छावान्क्रियावान्समाहारवांश्चेत्यपि विज्ञायते । स च लघोरपि लघुः अणोरपि लघुस्ततोऽपि लघुश्चेत्, सर्वत्रायं नियमो भवति । अत्र च प्राधान्यबोधनाय स्थूलगोचरतया परमाणुरेव चैवं प्रोच्यते । अन्यथा तु सूक्ष्मांशेऽपि भवन्ति यादृशक्रमाश्चानेके भावाः, तादृशश्च क्रमः स्थूलप्रदेशे विधीयते, तादृशमेव सर्वथा विद्यमानमनन्तत्वमपारत्वञ्च सर्वथा गृह्यते ।अत एव—

“अतीतत्वमेवं ह्यनन्तत्वमेवं
व्यतीतं सदा सूक्ष्मरूपं तुरीयम् ।
अनन्तं परं स्थूलसंवेदनीयं
महत्वं तथानन्तमाभाससिद्धम् ॥
तथैवास्ति नीचं लघुश्चाप्यनिष्टः
ततः सर्वरूपे समो वै समानम् ।”

इत्यादि प्रवचनम् । तस्मात्तदभिधानेन चैवमभियुक्तम्— “अन्यथा त्वयमात्मा न स्थूलो न च सूक्ष्मश्च नाणुर्न च परमाणुर्भवतीति । तस्मात्तदभिधानतया परमाणोरणोश्च सर्वं कार्यमुपनिषद्ग्रन्थे व्याख्यातं भवति ।

एवं यथा ब्राह्मणानां षोडश भेदा भवन्ति, तथैवोपनिषदामपीति बोध्यम् । चतस्रश्चैवं ऋग्वेदोपनिषदः, अस्ति च तत्रापि ब्राह्मणवत्क्रमः, ज्ञानांशचतुष्टयभेदेन व्याख्यानञ्च । किञ्चात्र प्रथमं येन येन कारणेन महत्तत्वे बुद्धितत्वे च परमाणुकल्पनं ज्ञानांशमात्रकम्, तेषां यल्लक्षणं कार्यञ्च, तदपि सर्वमाख्यातं भवति ।

तत्प्रकारोऽपि च किञ्चिद्रूपेण द्रष्टव्यः । तद्यथा—महत्तत्वे भेदत्रयं सार्वत्रिकम्, प्रथमं महदित्येकं, द्वितीयं चिदिति, तृतीयं निदिति । त्रयाणां परस्परं संमेळनं सार्वत्रिकं सर्वावस्थायां सर्वदापि च कार्यं भवत्येव । कार्यं विना तु न केषाञ्चिदपि स्थितिर्भवति । एवं नियमेन हि चिदि चांशे यत्कार्यं भवति, तदेव



ज्ञानपरमाणुः महदंशकः । कार्यादेव व्यक्तिर्भवतीति, तद्व्यक्तिरेव परमाणुरिति व्याख्यानेन बोध्यं भवति ।

एवं बुद्धितत्वेऽपि भेदत्रयम्, बुद्धिश्चित्तं मनश्चेति । तत्रापि चित्तकृतपरमाणोर्वर्णनं हि भवति च ऋग्वेदे । एवं बुद्धितत्वस्य समाहारो ह्यहंकारः । एवं महतोऽपि चतुर्थं समाहाररूपं सत्वम् । तदेवं क्रमेण क्रियाज्ञानेच्छाभिः समाहारेण च प्रत्येकं परमाणूनामाख्यानं प्रतिवेदौपनिषदं दृश्यते ।

एवमाकाशादावपि । यथा आकाशे चाकाशश्चिदाकाशो महाकाशश्चेति त्रयो भेदाः । चिदाकाशो हि ज्ञानांशः, क्रियांशो हि महाकाशः’ इच्छांशः स्यादाकाशः, पराकाशश्च तुरीयः सर्वसमाहाररूपः । एवं वायोरपि, चिद्वायुः, परवायुः, वायुश्चेति त्रयो भेदाः । तत्र चिद्वायुर्ज्ञानांशः, अस्य मारुत इति संज्ञान्तरमप्युच्यते । क्रियांशश्च परो वायुः, अस्य च पवनत्वेन प्रवचनम् । एवमिच्छांशश्च वायुः, अस्य च वातत्वेन प्रवचनम् । एवं तुरीयः समाहाररूपोऽनुवायुः । अयञ्च मरुच्छब्देन ह्युच्यते । एवमेव हि तेजस्यपि त्रयो भेदाः, अग्निस्तेजो वह्निश्चेति । अग्निस्तावच्चिदंशः, तस्य ज्ञानत्वेन विवक्षा । एवं तेजश्चेच्छारूपम् । वह्निश्च क्रियापरः । एतत्समाहाररूपस्तुरीयः, तस्यानलत्वेन प्रवचनम् । एवमेव चाप्सु भेदः, सलिलमापस्तोयश्चेति । सलिलं ज्ञानांशम् । आपश्चेच्छांशाः । क्रियां

शश्च भवति तोयम् । समाहारांशं जलमिति च सिद्धं भवति । एवं पृथिव्यामपि त्रयो भेदाः, पृथिवी मेदिनी महीति । तत्र च पृथिवी ज्ञानांशा, क्रियांशा च मेदिनी, इच्छांशास्ति मही, समाहारांशा हि धरित्री भवति । एवं क्रमेण नियमेन च सर्वे नियता भवन्ति । परमाणुकल्पनञ्चैषां पृथग्व्यापारेण भवति । तस्मात्सर्वं सकारणबीजञ्च व्यापारमात्रं ह्युपनिषत्प्रबन्धे व्याख्यातं भवति । किञ्च तत्र वस्तूनामणुत्वं यस्मात्कालादागतम्, यावत्कालं तत्तिष्ठति, पुनस्तद्यद्भवति; तत्सर्वञ्च विधानपूर्वकं व्यवस्थितं भवति । एवं ज्ञातजायमानानाञ्च परमाणूनां तथा क्रियानिष्ठाना-मिच्छानिष्ठानां तथा समाहारवताञ्च कार्यं पृथक्पृथक् न किञ्चित्, किन्तु त्रित्वैकत्वे सत्येव कार्यं संभवति, त्रितयावश्यकत्वात् । तस्मादेतेषां त्रयाणां पुनः सम्मिलितचतुरर्थानामपि यथायोग्यं व्याख्यानं वेदविहितं भवति, वेदस्य च सर्वमूलत्वात्संसारावधारण-संभावनाद्वा । अत एव ॥

“ आकाशादीनि तत्वानि ब्राह्मणैः कथितानि च ।
उपनिषद्भिराख्यातं परमाणुगताखिलम् ॥
ओमित्यन्तर्गतं सर्वं तादृशं विद्धि निश्चयात् ॥
अहमेतन्नेति भावादणुस्सर्वोऽपि दृश्यतामिति ॥ ”

इत्यादि प्रवचनम् । तस्मात् षोडशोपनिषत्सु सर्वेषां परमाणूनां स्वरूपमभिवर्णितं भवति । वीर्यवृक्षधातुपशुमानवगतानां



पृथिव्यादीनाञ्च सर्वतत्वानां परिपुष्टिस्तु परमाणुनैव भवतीति हि विज्ञायते । अतश्चाभिवर्णितास्ते भवन्त्युपनिषत्प्रबन्धेषु ।

उप समीपे निषीदतीति व्युत्पत्त्या ह्युपनिषच्छब्देन, सर्वेषां समीपवर्त्तिनी सृष्टिरभिहिता भवति । अतस्तद्रचना भवन्त्युप-निषदः । तस्मादेव सहोपनिषद्भिः वेदोऽध्येयो भवति । उप-निषदां ब्राह्मणानाञ्च समाना हि भवति श्रुतिरिति संज्ञा । वेदमात्रं मंत्रसंज्ञया व्यवह्रीयते । ब्राह्मणोपनिषन्मात्राणां तु श्रुतिरिति संज्ञयैव व्यवहारः, श्रवणं श्रुतिरिति निरुक्तेः । श्रोत्रविषया हि शब्दा भवन्ति । यद्यप्येवं व्याख्यानेन श्रुतित्वं सर्वेषामपि स्यात्, तथापि न शब्दमात्रस्य श्रुतिरिति व्यवहारः समभिपद्यते ; “ सैव हि श्रुतिः ययेत्थं श्रवणं भवति, अनेन हि प्रकारेण सृष्टिः समभि-जायते, तस्यां हि किल व्यवस्था चैतादृशी संभवति” इत्यादिवर्णना-द्ब्राह्मणोपनिषत्प्रबन्धेष्वेव तथा व्यवहारो निरूपितो भवति । तस्मादनयोरेव श्रुतित्वं वक्तुमुचितं भवति, शब्दस्य श्रावणत्वात्तस्य च ज्ञानरूपत्वात्तथा व्यवहारेण सृष्टेर्ज्ञाननिमित्तकत्वाच्च । मन्त्र-संज्ञा हि सर्वस्य वेदस्येति निश्चितं भवति । येन हि सर्व-विभावना भवति तन्मन्त्रम् । मेन त्रायते इति मन्त्रमिति तद्व्युत्पत्तिः । अत्र मकारस्य हि अकारोकारसंबन्धरूपत्वात्, “ मकारपरं सर्वं ” इति नियमाच्च तस्य मन्त्रत्वं व्यवस्थितं भवति । मन्त्रत्वे च भवति विशेषकारणन्तु शब्दक्रम एव । शब्दे

च शक्तेर्विद्यमानतया क्रमानुष्ठानतया च, शक्तिश्च सा विशेषविहिता दृश्यते । तथैव संसारकार्यं सर्वमपि संभवतीति वेदाङ्गैर्वेद्यं भवति ।

एवं भेदेनैव हि श्रुतयः मन्त्राश्चेति च संज्ञा भवन्ति । श्रुतिमात्रेण तु यथा सृष्टेरनुसन्धानं भवति, तथा सृष्टेः पूर्वव्यवस्थायाश्चाप्येवं परिज्ञानं भवति,—अनेनास्य संबन्धः, अत्रेदं कारणं भवति आनन्त्यमस्य चैतादृशम्, इत्थमिदं संप्राप्तं प्राप्नोति प्रापयति वेत्यादीति । ततश्चैवं क्रमेण हि, यथायोग्यं श्रुतेरनुसन्धानम् । संसारमात्रेषु यत्संसरणम्, तच्च तद्वर्धनमेव । वृद्धिरूपा क्रिया हि संप्रसिद्धा भवति । यद्यपि तद्भिन्नत्वेन क्षयोऽपि वर्तते, तथापि तन्न किञ्चित्, तद्वर्धनप्रयोजनतया क्षयोऽपि भवतीति सिद्धान्तः । एतच्च पूर्वव्याख्यानेनैवं स्पष्टं दृश्यताम् । यदि शक्त्युत्पादनायैव हि प्रळयादिकं भवति, तर्हि तदभिधानेनैव प्रळयमात्रं तत्प्रयोजनत्वेन बोध्यं भवति । प्रतिक्षणं हि ज्ञानस्य नानारूपस्याभिवृद्धिर्भवतीति स्पष्टमवगम्यते । यत्र यस्माद्यत्प्राप्तं, तत्तस्मादूर्ध्वं प्रगच्छतीति हि सर्वसिद्धान्तः । ततश्च सर्वेऽप्यधोभागेनागच्छति, प्रसरणव्यवहारप्रभावात् । यद्यपि लीनानामेव सर्वेषामैक्यं सार्वत्रिकं भवेत्, तथापि तदैक्यं पृथक्परमेवेति बोध्यम् । प्रळयकालादूर्ध्वं सृष्टिकाले यस्मिन्यस्मिन्नुपस्थितौ सत्यां यो यो विलीयते ; स सर्वोऽपि तस्मात्तस्मात्स्थानात्पुनः कार्यान्तरे



प्रवृत्तो भवतीति ह्यभिधीयते । स्पष्टश्चेदमत्र लोकोदाहरणम् । यथा—कश्चित् कार्यमेकं कृत्वा रात्रौ शेते, स च प्रातरुत्थाय न पुनस्तस्मिन्कार्ये प्रवर्तते ; किन्तु तच्छेषकार्ये वान्यकार्ये वा प्रवर्तेत इति । यदा हि संसारस्य ब्रह्माण्डस्य वा पूर्णावस्थायाः परिज्ञानं यस्य संभवति, तदैवं तं नियन्ता चास्मान्निस्सृत्यान्यस्मिन्ब्रह्माण्डे संसारे वा प्रेषयति, अत्र च तव कार्यं सर्वं समाप्तमन्यत्रोपतिष्ठतामिति । अत्रेदमवधेयम्—अस्ति चैतद्ब्रह्माण्डानां तथा संसाराणामपि च तादृशान्तर्येण लघुत्वं महत्त्वञ्चेति । अस्मिन्नप्येवं क्रमो विद्यते—एकस्मादूर्ध्वमेकमस्ति, तथा एकस्मादधश्चैकमस्तीति । अतश्चानन्तानन्तक्रमे चार्थे, कार्यस्यापि समाप्तिर्न भवति, सर्वातीतत्वात्प्रणवपरत्वाच्च । तस्माद्विधानमिदं सार्वत्रिकं वेदितव्यम् ॥

संसारस्य ब्रह्माण्डस्य वा शक्तिविनाशे सति प्रळयो भवति । प्रळये च यस्यामवस्थायां यस्तिष्ठति, स तत्रैव विलीयते ; तस्मादेव पुनरारभ्यते । न तत्र नियताः सन्त्यणवः । अणोस्तु सर्वथोत्पत्तिर्भवत्येव । तस्माद्वृद्धिरेवास्मिन्संसारे दृश्यते, संक्षयस्तु न कदापीति विज्ञेयम् । यद्यप्येवं विधानं परिदृश्यते—

> “ज्ञानेन वर्धमानश्च महाविष्णोः पदे भवेत् ।
> सति ज्ञानक्षये त्वेवमणुत्वं प्रतिपद्यते ॥”

इत्याद्युक्तिः, तथापि महाविष्णोः तस्मात्परस्य वा ज्ञानसंक्षयो न

भवति, ज्ञानस्यात्मस्वरूपत्वात् । आत्मा त्वभेद्यः, अच्छेद्यः, सर्वग इति सर्वसिद्धत्वात् । केवलमत्रायं भावश्च ज्ञानसंवर्धनेन तावद्वर्धते, तद्वर्धनेऽपि च संक्षयदृष्ट्याऽणुत्वमेव । संक्षयस्त्वतीततायामपि, आन्तर्यदृष्ट्या वर्तते । तद्विधानतश्च सर्वस्याणुत्वं महत्वञ्च सिद्धं वर्तते । तस्मात्तादृशमणुत्वं तस्यापि योग्यं भवति । अत एव—

"यदि संवर्धनं नित्यं तथा चास्तीह संक्षयः ।
आन्तर्यातीतभावेन स च बोधः प्रकल्प्यते ॥
एकस्मादस्ति चैकोऽणुरेकस्माच्च महानपि ।
सर्वस्मात्सर्वतः सर्वं सर्वं सर्वेण बुध्यते ॥"

इत्यादि प्रवचनम् । तस्मादस्मिन् संसारे वृद्धिरेवेति सिद्धान्तः । भवनकार्यमेवात्र च मानं भवति । भवनकार्यैव प्रकृतिः । यदीत्थं भूतश्च क्षयः स्यात्, तर्हि प्रकृतेः कार्यस्य वैयर्थ्यापत्तिः । अणूंश्च सर्वान् प्रकृतिरेवाकर्षति, वहति, वाहयति वेत्यादिदृष्ट्या तु तत्कार्यं सर्वं निरर्थं भवति । तस्मात्सर्वथा वृद्धिरेव प्रबोध्या भवति ।

यद्यपि मानवविषयमेव तत्प्रवचनमस्ति "इत्थंभूतेन कर्मणा हीमां योनिं प्राप्स्यसि" इत्याद्युपदेशः, तथा—

"ब्रह्महा शिशुहा चैव तथा विश्वासघातकः ।
निन्दकश्चापवादी च चाण्डाल्यमधिगच्छति ॥
स्वदत्तं परदत्तं वा हरेद्यो ब्रह्मवित्तमः ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥



स्त्रीणां संघातको यो हि प्राणिनां घातकश्च यः ।
वेदानां निन्दको यश्च सूकरीं योनिमाप्नुयात् ॥"

इत्यादि प्रवचनम्; तथापि तत्र प्रकृतेः कार्यस्य वैयर्थ्यमपरिहार्यं भवति । अत्रायं भावः—इमानि महापातकान्यकरणीयानि, ब्रह्म हन्तीति ब्रह्महा, ब्राह्मणं हन्तीति वेति, इदं हि दृश्यताम्, ब्रह्म तु स्वच्छन्नं सर्वतो भिन्नमहन्यम्, य एवं हि ब्राह्मणः ब्रह्मज्ञाता सोऽप्यहन्यः इति ।

यदपि व्यक्तिब्राह्मणस्य हननम्, तदपि न, सर्वस्यापि विनाशपरत्वात् । तद्भवनमेवमुचितं भवति, ब्रह्महननन्तु ब्रह्मणोऽमाननम् । तच्चैवमवगम्यते—नास्ति ब्रह्म, न च नियमः, न नियतः कश्चित्, यदस्ति तदस्ति, नाभूत्, न भविष्यतीत्यादीति। संसारात्मिका बुद्धिरेव ब्रह्मघातः । एवमेव ब्राह्मणघातोऽपि । ये च ब्राह्मणा ह्यस्य संसारस्य नियन्तारः, ज्ञानाद्युपदेशकर्तारो हि ऋषयो महर्षयश्च, तेषां तिरस्कारो हि स भवति । दृश्यतां नाम—संसारेऽस्मिंश्च ब्राह्मणा एव प्रधानाः, ब्राह्मणद्वारा च सर्वैर्ज्ञानादिकमुपलभ्यते, ब्रह्मज्ञानविषयकाभ्यासोऽपि तैरेव भवति, अतश्चात्रत्यानां सर्वेषां कार्याणां ब्राह्मणा नियन्तारो भवन्तीति । अत एव—

"ब्राह्मणा ऋषयः सर्वे तथा चैवं महर्षयः ।
संसारस्य नियन्तारः सर्वकार्यस्य कारकाः ॥

यस्य चावश्यकं यस्मिंस्तस्मिंस्तस्य च संस्थितिः ।
कारयन्ति च कुर्वन्ति ज्ञानादिकमनन्वयम् ॥
क्रमेण भाव्यते कार्यं विश्वमात्रे यथायथम् ।
ऋषिणा महर्षिणा वा ब्राह्मणेनाथ योगिना ॥
मुनिना साधुना चैवं तथा सन्यासिनापि च ।
वानप्रस्थेन च तथा गृहिणा ब्रह्मचारिणा ॥
एवं क्रमेण सर्वस्वं नियतावश्यकं परम् ।
संभवन्ति च कार्याणि चोमित्येकानुभावनात् ॥"

इत्यादि प्रवचनम् । तस्मात्ते ब्राह्मणा ऋषयो महर्षयश्च सर्वनियन्तारः । कारणेनानेनैव सर्वदा सर्वप्रकारकग्रन्थानां रचना भवति । उपदेशोऽपि चानेकप्रकारो भवतीति हि तत्कार्यं भवति । तस्मात्तस्याऽमाननमप्येको दोष इति विज्ञेयम् । यो हि क्रमाधिपं नानुमन्यते, सोऽपि स्वविघातको भवति; कार्यहानिकरणत्वात् । तस्माद्यो हि ब्रह्मब्राह्मणौ न मानयति, स च ब्रह्महा भवति । किञ्चाकारणमनियतञ्च यो व्यक्तिब्राह्मणं हन्ति, सोऽपि ब्रह्महा भवति । एवं बालहापि । अपराधप्रदर्शनं विना हननं तदिति विज्ञेयम् । यद्यपि हननं केषाञ्चिदपि भवति, नियतकालिकं तदिति व्याख्यानात्, तथापि सति च तस्मिन्काले प्राप्ते तत्कारणोत्पत्तिकारणं विज्ञेयं भवति ; सादृश्यात् । सादृश्ये यावत्तन्मारणञ्च यत्किञ्चित्, तावत्तस्यान्यकार्यकरणत्वमयुक्तम् । कारणविज्ञापनमन्तरा, तत्कारणविज्ञापनमेवापराधप्रदर्शनं भवति । अयमेवात्र दोषः, यथाऽऽवश्यके विषये विश्वासप्रदानम्, तथा तद्घातोऽप्यावश्यकघातो भवति ; अतो न दोषः । एवमेव हि सर्वस्वं वेदितव्यम् । स्वदत्ते परदत्ते चाप्येवं नियमः । यस्य हि स्वसत्तान्निवर्त्य परेभ्यो यत्प्रदानं, परप्रदत्तं तत्तस्य भवति । एवं परदत्तं वा तत्तस्य भवति । तस्मात्तदाहरणे दातॄणां स दोषो भवति, अन्यावश्यकस्य विघातकरणत्वात् । येनैवं क्रियते, स विष्ठायां जायते कृमिः । अत्र चायं भावः—न स्वयं तद्योनेः कृमियोनिं व्रजति, किन्तु तत्र स्थितोऽपि तादृशावस्थां प्राप्नोतीति । एवमेव हि सर्वत्र वेदितव्यम् । तत्र तथा-मानवेऽपि, सर्वस्याश्चाप्यवस्थाया विद्यमानत्वेन तथा तत्रैव भोगो भवतीति भावः । इदमपि व्याख्यातमस्ति—यस्यां योनौ जीवस्तिष्ठति तस्यां तत्पूर्वयोनीनामभिवर्तनम्, साख्याश्च पूर्वयोनयः सर्वा अप्यत्र संप्रतिष्ठन्त इति । एवं भावादेव हि सर्वेषां देहानां मुख्यो मानवदेहः । तत्र सर्वेषां विद्यमानता ह्यवगम्यते । तस्माद्भोगश्च तत्रैव भवतीति सिद्धम् । बीजेनानेन चैवं बोध्यमुपयुक्तं भवति—संसारेऽस्मिंश्च संक्षयो न भवति, किन्तु सर्वथा वृद्धिरेव सर्वस्यातीतत्वादिति । अत एव "सर्वस्य कार्यमनन्तम्, सर्वमनन्तं सनातनम्" इत्याद्युक्तिः । तस्मात्सर्वमिदं वृद्धिपरं सनातनं सर्वातीतं च बोध्यम् । सर्वस्याप्यतीतत्वात्परमाणूनामपि प्रत्येकमतीतत्वं विज्ञेयम् । तत्र च तादृशा व्यवहाराः तादृशानि

च कार्याणि सर्वमुपनिषत्प्रबन्धैर्बोध्यं भवति । तस्माद्ब्राह्मणोपनिषदोः कर्ता चैक एव भवति, एवं वेदभागस्यापीति विज्ञेयम् ।

एतासां सर्वासामुपनिषदां प्रयोजनमिदमेव भवति—येन सर्वसंसारेष्वप्यणुश्चैकैकोऽपि महाविष्णुत्वमाप्नोतीति सिद्धान्तज्ञापनमिति । यथा लोके एकपितृजायमाना बहवः पुत्रा अपि पितृत्वमाप्नुवन्ति, तथा तत्कृताः सर्वेऽप्यणवः तत्प्रदेशं प्राप्नुवन्तीत्युपनिषत्सिद्धान्तः । एतदर्थमेव ह्युपनिषत्सु धर्माद्युपदेशोऽपि भवति । अन्यथा त्वयमात्मा स्वभावसिद्धः सच्चिदानन्दरूप इति कथं सङ्गच्छते । अत एव

"न भवति परमात्मा स्वस्वरूपं हि वेद्यं
गुणितमिदममोघं सत्प्रधानं प्रधानम् ।
सुखदमिदमनन्तं सच्चिदानन्दशुद्धं
विगतकलितभारं भावसंपूजनीयम् ॥"

इत्यादि प्रवचनम् । एवमेव—

स न ब्राह्मणो वेदसिद्धोऽयमात्मा
कठो नैव छान्दोग्यसिद्धोऽयमात्मा ।
न चैवैतरेयो न वा तैत्तिरीयो
न केनो न चेशो न च प्रश्नसिद्धः ॥
सदा सच्चिदानन्दरूपोऽयमात्मा
न जाबालसिद्धो न चारण्यकोऽयम् ।



असिद्धः परो गोचरस्तत्स्वरूपः
सदैवाहमेतन्नकारानुभाव्यः ॥
न मुण्डो न माण्डूक्यसिद्धोऽयमात्मा
समानस्समानस्समो वेदनीयः ।"

इत्यादि प्रवचनम् । तस्मात्सर्वदा सर्वथा सर्वत्र सर्वसंस्थः सनातनो ब्रह्मस्वरूप इति चात्मा सिद्धो भवतीति बोध्यम् । एतत्संसारावस्थायामेव परमाणुवादी शब्दप्रयोगः । तदिदं परमाणोराख्यानं तथा तद्विधानादिकं यथायोग्यमुपनिषत्प्रबन्धेषु स्पष्टं प्रतिपादितं भवति ।

षोडशोपनिषदस्तु तादृशमहत्वयुक्ताः, श्रुतिसंज्ञकाः, विष्णुब्रह्मशिवप्रकीर्तिताश्च भवन्ति । अनन्तरञ्चाष्टोत्तरशतोपनिषदां रचना भवति । ताश्च लोकप्रबोधनाय यथाकालं वृत्या ब्राह्मणनिर्मिता भवन्ति । ये वा ब्राह्मणाश्चैतासां नियन्तारः, तेऽपि पूर्वोक्तव्याख्यानतया तदनुरोधेन तथा प्रबन्धं प्रकल्पयन्ति । तस्य चाऽपि चोपनिषत्वेन प्रवचनं भवति, वेदोपनिषदन्तर्गतपरमाणोराख्यानात् । एवं सार्धद्विशतमुपनिषदामार्षमपि वर्तते । तच्च हि ऋषिप्रणीतमेव । सर्वमेतच्चाष्टोत्तरशतं सार्धद्विशतञ्च ह्युपनिषदां भाष्यरूपमेवेति बोध्यम् । तदधिष्ठितानाञ्च शब्दानां नात्र प्रयोगः साधुर्भवति । न च तद्व्याख्यानरूपम्, किन्तु तदनुरोधेन सुखबोधाय लब्धर्थतया च प्रणीतं भवति । एतद्विधानं सर्वमप्यावश्यकं भवतीतीति-

हासवेद्यं भवति । एवमेतन्निरूपणमत्र सूचनामात्रम् । षोडशोपनिषदः, षोडश ब्राह्मणानि च मुख्यानि भवन्ति । सर्वाण्येतानि च वेदविहितानि भवन्ति । अत एव उपनिषद्ब्राह्मणयोर्वेदांशत्वमभिधीयते । इदञ्चात्र चिह्नं भवति—वेदविहितासूपनिषत्सु, तथा ब्राह्मणेषु च वेदमूलत्वस्य प्रकाशो भवतीति । अङ्गैश्च पुनस्तेषां याथातथ्यस्य निर्णयोऽपि भवतीति विज्ञेयम् । अत एव—

" ब्रह्मविष्णुशिवैश्चैव तन्महाविष्णुना तथा ।
उपनिषद्ब्राह्मणानि यथायोगं कृतानि च ॥

वेदोपनिषदो ज्ञेयाः परं तद्ब्राह्मणानि च ।
तस्यां ज्ञात्वा परं तत्वं ब्रह्मभावमुपासते ॥

एतद्विधित्रयेणैवं भवेत्संसारसाधनम् ।
ओमित्यन्तर्गतं सर्वं तादृशं त्रितयात्मकम् ॥

वेदाः सर्वे ह्यकारस्थाः ज्ञानरूपात्मसंज्ञकाः ।
उकारस्थाः प्रसिद्धाश्च ब्राह्मणाख्याश्च षोडश ॥

मकारस्था ह्युपनिषत् सर्वं त्रितयसंज्ञकम् ।
वेदेन चोपनिषदा ब्राह्मणेन तथा पुनः ॥

अकारादित्रिवर्णेषु चैकत्वं परिबुध्यते ।"

इत्यादि प्रवचनम् । अन्यत्र चैवमेव—



" चतुर्वेदगीतो ह्यकारो ह्यकारः
तथा ब्राह्मणैर्गीयमानो ह्युकारः ।
मकारः परश्चोपनिषत्प्रधानो
सदा सत्वसङ्कल्पनीयः प्रशस्तः ॥"

इत्यादि श्रुतिवचनम् । एवमन्यदपि—

" ब्राह्मणोपनिषद्भिश्च गीतं वेदैश्च निश्चितम् ।
ओमित्येकाक्षरं ब्रह्म त्रयं चैकं सनातनम् ॥"

इत्यादि वचनम् । तस्मात् " सर्वपरं प्रणवमेकाक्षरम्" इत्युपदेशवचनं सङ्गच्छते । तदेवं विधानेनैव परमाणुमात्रं यथायोग्यं ज्ञानेच्छाक्रियासमाहारावृतं हि संबुध्यते । तस्मात् " परमाणुमात्रप्रवचनपरा विद्याः ब्राह्मणविहिता ह्युपनिषत्प्रतिपादिताः सर्वानुवर्तिन्यः धर्मपरायणाश्च संभावनीयाः" इति हि व्याख्यातम् । परं हि किल, एतत्त्रितयं परं तत्वं परमानन्तमगोचरं सर्वभिन्नं सार्वत्रिकमकारोकारमकारान्तर्गतं बोध्यम् । अयमेव हि भवति सर्वोपनिषत्सिद्धान्तः ॥

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे उपनिषदां स्वरूपनिरूपणं नाम**
**॥ दशमस्तरङ्गः ॥**

---

ॐ

अथ

# एकादशस्तरङ्गः ॥

अथैवमेतत्त्रयसमाहारस्वरूपाश्चोपवेदा हि भवन्ति । वेदोपनिषद्ब्राह्मणानामपि प्रत्येकमेकश्चोपवेदो भवति । यद्युप्युपवेदानामपि प्रत्येकं चत्वारो भेदाः, तथापि तेषामैक्यमेव हि सर्वथा बोध्यम् । अतश्चोपवेदेषु सर्वसमाहारो ह्यभिवर्णितो भवतीति तद्भावः । येषां हि भवति परमाणूनां ज्ञानक्रियेच्छांशेन सामानाधिकरण्यम्, तेषामेव हि तदैकाधिकरण्यं न्यायसिद्धं भवति । तत्सामानाधिकरण्यन्तु स्वभावपरं भवनम् । यत्र यत्र च यादृशं ज्ञानाद्यावश्यकत्वम्, तत्र तत्र तादृशपरमाणूंश्च ह्येकनिष्ठान्कुर्वन्ति नियन्तारः । येषां येषाञ्च परमाणूनां यत्र यत्र यादृशी शक्तिपरिकल्पनावश्यकता, तादृश्येवावश्यकता तत्र सर्वमभियोजयतीति हि तद्भावः । सत्यामेव परमाणुप्राप्तौ सर्वत्र शक्तिः परिदृश्यते । यत्र च परमाणुः शक्तिमांश्च यादृशः, तदनुगुणा च शक्तिस्तत्र तस्य भवति । यस्य च यादृशं कार्यम्, तादृशकार्यानुगुणो ह्यणुरेव तेनोपलभ्यते । अत एव "कर्मानुसार्येव सर्वमुपलभेत" इत्याद्युक्तिः सङ्गच्छते । एवं नियमेनैव हि द्युतिः प्रभा मालिन्यञ्चापि लभ्यते । इदञ्च सर्वं परमाणुकार्यं भवति । इदञ्चात्र विज्ञेयम्—



सत्यमिदमस्ति, यादृशं यस्य कार्यं कर्म, तादृशमेव सर्वं शरीरादिकमपि, स प्राप्नोतीति ।

इदञ्चात्र बीजं भवति—भवनमात्रं हि सर्वत्र त्वावश्यकं भवति, तच्च हि स्वभाव एव, तमतिक्रम्य स्वयत्नतो ममेति प्रबुध्या कर्म करोतीति । यद्यपि स्वकृतमित्यसंभवम्, तथापि तस्मिन्नारोपणं तत्कृतमिति विज्ञेयम् । सार्वत्रिकत्वे विद्यमाने यदेकत्वारोपणं ममेत्येकवचनान्तम्, तदेव हि विकारः । अन्य इत्यारोपणं हि शोभनम् । क्षतिश्चैवं हि विज्ञायते—तत्र च सविकारेण कर्मणा विकृतं विकृतं शरीरं, सुकृतेन च सुकृतमिति । सुकृतविकृतयोरभावात्, यदेकस्य सुकृतं तच्चान्यस्य विकृतमिति नियमाच्च सर्वं हि सुकृतं सर्वं च विकृतमिति बोध्यम् । इदन्त्वेवमनवस्थापरं वेदितव्यम् । अवस्थापि च तत्र वर्तते । तस्मात्तदवस्थायामेवं भावो हि विज्ञेयः । "कर्मानुसारतश्चैव शरीराद्युपलाभः" इत्यादिभिः सर्वं व्याख्यातं भवति । तच्छरीर एव हि तत्कर्मानुसारिज्ञानेच्छाक्रियासमाहारनियमेन, प्रथमद्वितीयतृतीयचतुर्थक्रमेण च परमाणुप्रयोगः । यस्मिन्नंशे हि ज्ञानावश्यकता, तस्मिन्तत्कर्मानुसारिज्ञानपरमाणोः प्रयोगः । एवं क्रियादावपि, इति हि विधिः । यदि चैवं स्यात् ज्ञानप्राप्तिकरणं कर्म त्वधिकम्, परन्तु तस्य तत्परमाणुप्राप्तिकरणकर्म न भवति । ततः ज्ञानप्राप्तिकर्मणि न तेषां ज्ञानयुक्तज्ञानपरमाणूनां प्रयोगो

भवति । अत एव हि तत्र विकारो ज्ञानप्रातिरूपोऽस्त्येव । तद्ग्राहकपरमाणोरभावान्न तत्र तद्ग्रहणं भवति ।

एवं क्रियादावपि बोध्यम् । क्रियाकरणसामर्थ्यं हि न येषां भवति, न तेषां परमाणूनामत्र प्रयोगः । परं त्वत्र क्रियाकर्मद्वारा हि भवति चिकीर्षा चात्यन्तिकी । एवमेव सर्वेषां चिकीर्षैवाऽऽत्यन्तिकी, नात्र किञ्चिदस्ति च सामर्थ्यम्, इत्याद्यनेकव्यवहारा लोकदृष्ट्या बोध्या भवन्ति ।

इदश्चात्र सूचितं भवति—कर्म च सर्वं त्रिविधं भवति, कर्म चैकं तु सार्वत्रिकम्, यथैतादृशं कर्मास्ति, येन च ज्ञानं तत्सामर्थ्यं तत्प्रयोजनसामर्थ्यञ्च समाहृतम् । कर्म चैकं त्वेतादृशं द्वितीयम्, यत्र च कर्मचिकीर्षास्ति न तच्छक्तिः न तत्प्रयोजनसामर्थ्यञ्च । तृतीयञ्च तदेतादृशम्, यत्र च सामर्थ्यमात्रं न चिकीर्षा । एवं प्रकारेणात्र चानेके प्रकारा भवन्तीति ।

इदश्चात्र कारणं भवति—कर्म च पूर्वजं सावधारणञ्च यथा यथा यस्य यस्य च नियतं भवति, तथा तथा तस्य तस्य च कर्म भवतीति । तदनुरूप एव हि शरीरादिज्ञानादिलाभश्चेति सर्वैः स्पष्टमुक्तं भवति । तस्मात्सौंदर्यादिकमपि सत्कर्मफलं भवति, एवं विरूपादिकमपि दुष्कर्मफलमिति च सर्वलोकप्रवचनम् । अतश्चैवमनुमीयते—एवं सर्वस्मिन्नंशे ह्ययं विधिरिति । यादृशश्च परमाणूनां यत्राभिनिवेशः तादृशं च तत्कार्यं भवतीति हि व्या-



ख्यानफलम् । अत एव "परमाणोश्चानुष्ठितं सर्वं जगत्" इत्याद्युक्तिः । एवमेव—

"यादृशो विद्यते यत्र यथावश्यकता विधौ ।
तथा तत्र समायोगे परमाणुः प्रयुज्यते ॥
परमाणुर्यादृशश्च विद्यते यत्क्रमेण च ।
तादृशं नीयते रूपं परमाणुपरा क्रिया ॥
परमाणुप्रयोगेण संसारोऽयं विभासते ।
अन्यथा हि न संसारो नेति नेतीति भाषितः ॥
अहमेतदोर्योगेन परमाणुः प्रजायते ।
अहमेतदोरंशश्च सर्वसंसारकारकः ॥
तस्मात्सर्वाः क्रियाश्चापि परमाणुप्रयोजिताः ।"

इत्यादि प्रवचनम् । तस्मात्सर्वे परमाणव एव ह्युपनिषत्सु व्याख्याता भवन्ति । "तदभियोग एव ह्युपवेदैर्बुध्यते" इति वेदोपनिषद्ब्राह्मणानां समाहारग्रन्थो ह्युपवेदः ।

अस्त्ययमार्चितः, यतो महाविष्णुना नियमेन रचितः । सोऽयमेवार्चितः, यश्चार्चाविरचितः । अर्चा हि स एव, यो हि सर्वस्य नियन्ता सर्वक्रमाधिपः । अत एव "वैदिकाः सर्वेऽप्यार्चितग्रन्थाः" इत्यादि प्रवचनम् । तस्माच्चतुर्षूपवेदेष्वेव परमाणोरभियोगो वेदितव्यः ।

तत्र च प्रकारः समाहारनिष्ठः । स च यथाधातुनिर्माणं भवति । इदञ्च सर्वमेतत्परमाणुविशिष्टमेव, अत्र चैतावन्ति परमाणूनि, एतावता ह्यणवः, अत्र चायं क्रमः, एतत्कार्यकरण-शक्तिरस्मिन्नेभिरेव, एतावत्कालपर्यन्तं चैतच्छक्तेः स्थितिः, एत-च्छक्तिविशिष्टानां चैतावत्परमाणुयुक्तानामेवैषा संज्ञा, धातूनां मध्येऽयं धातुः, अत्र चायं प्रथमो द्वितीयस्तृतीयश्चतुर्थश्च, इत्यादि सर्वमुपवेदेन बोध्यं भवति । एवं तदाभासोप्यत्र विज्ञेयः—यथा मणिः रत्नं सुवर्णं ताम्रमित्यादि सूक्ष्मात्सूक्ष्मं स्थूलात्स्थूल-मनन्तं वेद्यमिति ।

वृक्षेऽपि चैवमेव । वृक्षाणां चायं क्रमः—धातोर्वृक्षः प्रभवति, प्रथमश्चायं द्वितीयश्चायं तृतीयश्चायं चतुर्थश्चायमिति । तत्क्रमकारण-मिदं भवति, अत्र चैतावतां परमाणूनां प्रयोगः, तत्परमाणुक्र-मश्चायं, अत्र च शक्तिरेतावत्कालीना, कार्यञ्चास्येदम् , निर्माण-मिदमनेन इत्यादि सर्वं तेनैव बोध्यं भवति ।

एवं वृक्षात्पशुः प्रजायते । अत्रापि चैवं विधिः । यद्यपि वृक्षाणामनन्तः क्रमः, तथापि चाद्यन्तविधिना तत्क्रमो विज्ञेयः । अत्र च पशावपि प्रथमद्वितीयतृतीयचतुर्थ इति नियमः परमा-ण्वादिप्रयोगक्रमश्च विज्ञेयः । एवं पशोः मानवो भवति । अत्रापि प्रथमादिक्रमः, परमाणुप्रयोगक्रमः, ज्ञानविवेकाद्युत्पत्तिक्रमः, तत्क्रमकारणं चेत्यादि सर्वमुपवेदेन बोध्यं भवति । एवं केवलं प्राधान्यबोधार्थमुच्यते ।



प्रसिद्धोपाधिचतुष्टयेन हि धातुवृक्षपशुमानवाभिनियमेन चेतः पूर्वं सूक्ष्मरूपा ह्यनन्ताः सृष्टयः । एवं धात्वादावपि सूक्ष्मसृष्टि-र्विज्ञेया । एतत्सर्वञ्चोपवेदैर्बोध्यम् । अस्य च समाहारस्वरूपत्वात् , ज्ञानादिक्रमोऽप्यत्राऽपरिभाव्यः । इदमेव हि परिवर्तमानफलं भवति । तस्मादेवोपवेदानां, ओमिति संधिस्वरूपेण प्रवचनम् । अत एव—

“ओमित्येकाक्षरेणैव चोपवेदः समाहृतः ।
परमाणुप्रयोगेण संसारः संप्रतिष्ठते ॥

तत्प्रयोगपराख्यानं चोपवेदे हि बुध्यते ।
ओमित्येष समाहारः संधिस्थो ब्रह्मसंज्ञकः ॥”

इत्यादि प्रवचनम् । तस्मादुपवेदचतुष्टयं संधिस्वरूपमोमित्येकनिष्ठं वेदितव्यम् । अन्यथा तु सर्वातीतमनन्तं समानमेवेति स्पष्टं स्यात् । अत एव—

“न चैवोपवेदेन संवेदनीयो
स संवित्सदा शुद्धभिन्नस्वरूपः ।
न चैवाभियुक्तो वियुक्तोऽयमात्मा
ह्यणुस्थः परस्थः प्रसिद्धोऽयमात्मा ॥

सदा सर्वथा सर्वगं सर्वरूपं
निराकारमाकारमाकारमेकम् ।

न चातीतरूपं ह्यनन्तं प्रबोध्यं
सदैवं ह्यकारस्वरूपं निधानम् ॥
विशिष्टः परो भावनीयो वियुक्तो
ह्युकारो ह्युकारो ह्युकारो विधाता ।
मकारो मकारो महासारसारः
सदा कल्पकः सत्वसंसारसारः ॥
अनावश्यकं ब्रह्मरूपं विचिन्त्यं
विचार्यं विचारं विचारादिशुद्धम् ।"

इत्यादि प्रवचनम् । तस्मादुपवेदपरः परमाण्वभियोगः तत्परः संसार एवेति च सर्वोपदेशाशयः । अत एव—

"वेदश्चैवोपवेदश्च ब्राह्मणं सारसंज्ञकम् ।
ज्ञात्वा चतुष्टयं चैवं यथायोगं विधानतः ॥
प्राप्नुयाद्ब्रह्मभावञ्च विध्येकं प्रणवात्मकम् ।"

इत्याद्युपदेशः । एवमेव—

"विद्ध्यव्ययं स्वमात्मानं चतुर्भावेन भासितम् ।
ओमित्येकाक्षरं ज्ञात्वा स्थीयतां सर्वसंज्ञिकम् ॥
सदा सर्वगं तत्सदा सर्वगस्त्वं
सदा सर्वगोऽहं तथैवायमेषः ।
तथैवेदमन्यत्सदा सर्वगोऽहं
स्वयं ब्रह्मरूपो नकारो नकारः ॥



यदेतत्परं भेदतत्वं प्रसिद्धं
तदेकत्वमेकत्वमेकत्वरूपम् ।
अहं सच्चिदानन्द एकः प्रधानो
नकारो नकारो नकारो नकारः ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वा विद्याः परायण्यः परमाण्वभियुक्ताश्च ह्युपवेदस्था भवन्तीति भावः । एवं क्रमेणैव हि वेदब्राह्मणोपनिषदुपवेदाश्च चतुष्टया बोध्याः । चतुर्णामन्तिमोऽयमुपवेदसंज्ञकः । अत एवास्य तन्त्रत्वेन प्रवचनम् । तन्त्रयति स्वस्मिन् समाहरति सर्वमिति तन्त्रं भवति । तस्मादेवोपवेदस्य तन्त्रत्वमुच्यते । तन्त्रेणैव हि सर्वसमाहरणमिति हि सिद्धान्तः । संपूर्णं विस्तृतञ्च वस्तुमात्रमुपवेदैर्बोध्यम् । तस्मादेव वैदिकी विद्या परमा ह्यतीताऽनुवादिनी संसारनिष्ठा प्रणवपरा सर्वमूलं सत्यपरा च हि प्रसिद्धा भवति । एवं विधानेनैव वेदोपनिषद्ब्राह्मणानि उपवेदश्च समधीत्य ब्रह्मलोके महीयते, ब्रह्मभावञ्च प्राप्य निश्चलो भूत्वा सर्वातीततायां सच्चिदानन्दस्वरूपेण सर्वानन्दभोगी भवतीति हि परमस्तत्त्वसिद्धान्तः । एतद्बोधायैव सर्वोऽपि संसारो भवतीति पूर्वव्याख्यानेन निश्चितोऽयं सिद्धान्तः ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे उपवेदस्वरूपनिरूपणं नामैकादशः तरङ्गः ॥**

ॐ

## अथ

# द्वादशस्तरङ्गः ॥

अथ शाखभेदो व्याख्यास्यते । एषु च वेदोपनिषद्ब्राह्मणोपवेदेष्वस्ति भेदद्वयं कृष्णः शुक्लश्चेते प्रसिद्धम् । तत्र प्रथमः कृष्णो द्वितीयः शुक्लश्च भवति । अयमपि तादृशाकारोकारपरो वेदितव्यः । तमसः प्रवाचकः कृष्णो भवति । शुक्लस्तु प्रकाशस्य प्रवाचक इति वेदक्रमैः स्पष्टमुक्तं भवति ।

संसारेऽस्मिंश्च सर्वत्र तदिदमेव भेदद्वयं प्रसिद्धं भवति । अतोऽस्त्यत्र तमः, ततः प्रकाशश्चेति भावः । यद्यपि तमःप्रकाशयोरभेदः, तथापि द्वित्वावश्यकत्वेन प्रकाशदृष्ट्या तमः, तमो दृष्ट्या प्रकाश इति नियमः । वस्तुतस्तु तमःप्रकाशाभ्यां भिन्नमतीतमवाच्यञ्च भवति । तस्मात्सर्वस्मिन्नपि संसारे नियमद्वयमेतत्प्रतिभासते । अत एव—

"संसारेषु च सर्वेषु भासते हि विधिद्वयम् ।
प्रकाशश्च तमश्चैव सर्वं प्रणवसंज्ञकम् ॥

अकारस्थः प्रकाशोऽयं तमश्चैवमुकारगम् ।
मकारस्तु तयोर्भिन्नः सर्वसंबन्धिरूपकः ॥"



इत्यादि प्रवचनम् । तस्मात्प्रणवपरमिदं तमःप्रकाशसंज्ञकमृग्वेदादिकमिति विज्ञेयम् ।

अत एव कृष्ण ऋग्वेदः शुक्लऋग्वेदश्चेति भेदो द्विविधो भवति । एवं यजुस्सामाथर्वस्वपि च बोध्यम् । एवं ब्राह्मणोपनिषदोः कृष्णत्वं शुक्लत्वञ्चापि विज्ञायते ।

प्रत्येकं तत्त्वानां तमःप्रकाशौ च कृष्णशुक्लस्वरूपाभ्यां यथावच्च व्याख्यातौ भवतः । एवमेतत्परमाणुकल्पनमपि तादृशेनैव क्रमेण बोध्यं भवति । एते च परमाणवः प्रकाशवन्तः, एते च पुनस्तमोवन्तइति च निर्णीतं भवति । एवं तत्वादिकमपि क्रमशः क्रियाप्रयोगेणैव हि निर्णेयम् ।

द्वयोरेतयोः संबन्धस्वरूपत्वेन हि प्रशस्ताः शाखा भवन्ति । शाखायान्तु भवति सर्वस्य नकारात्मकत्वेन प्रवचनम् । अत्र च सर्वसंसारस्वरूपाणां परमाणूनां प्रत्येकं संयोगवियोगाख्यानं विज्ञायते—एतादृशानां तमोंऽशानाञ्च परमाणूनाम्, तादृशप्रकाशांशैश्च परमाणुभिः संबन्धः, एवं प्रकाशयुक्तानां तमोंऽशेन संबन्धः, इत्यादि । अत एव

"परमाणुर्द्विधा प्रोक्तस्तमोयुक्तः प्रकाशवान् ।
क्रमेणैव द्वयोः सम्यक् संसारस्यानुवर्तनम् ॥

संसारेऽस्मिंश्च सर्वत्र गतिरेका द्वयोस्तयोः ।
तमःप्रकाशयोर्यत्र यथाऽऽवश्यकता भवेत् ॥

तथा तौ हि विधानेन क्रमेणैव प्रयोजयेत् ।
निर्णीतं तत्र वै सर्वं शक्तिसंवर्तनार्थकम् ॥

तदर्था नियताः शाखाः कृष्णाः शुक्ला यथायथम् ''
इत्यादि प्रवचनम् । अतोऽत्र स्थितस्य परमाणुमात्रस्य भेदद्वयञ्च तमःप्रकाशयुक्तं भवति ।

तत्र च 'तमोंऽशेन दौर्बल्यं प्रकाशांशेन च प्राबल्यम्, इत्याद्युक्तिः । तस्मात्तन्निर्णयार्थं कृष्णशुक्ले च सशाखे ह्यध्येये भवतः । अत्राऽपि तदिच्छायाः सर्वान्तर्गतत्वात्तस्याः ग्रहणम् । क्रियारूपत्वेन ज्ञानरूपत्वेन चैतत्प्रकारद्वयम्, ज्ञानरूपं प्रकाशमयम्, क्रियारूपं तमोमयमित्यादि बोध्यम् । तस्मात्तादृशानुकरणेनैव सर्वकार्यकरणौचित्यं भवति । अत एव—

" तत्प्रकाशमयं सर्वं सर्वकर्मानुवर्तकम् ।
तथा तमोमयं चैवं परमाणुद्वयस्थितिः ॥ "

इत्यादि प्रवचनम् । तदेवं क्रमेण कृष्णशुक्लौ तच्छाखाश्च सनियमत्रयं विधीयमानं भवति । अन्यथा त्वयमात्मा सर्वाभ्युपहितः सर्वरहितश्च भवेत् । अत एव—

स नायन्तमो न प्रकाशः पुराणो
न चैवायमात्मा गुणो शीलधर्मः ।
न मे योगयोगेश्वराणां प्रसङ्गः
परं सर्वसिद्धान्ततत्वं त्वमेकः ॥



न चाद्यन्तहीनो न चाद्यन्तयुक्तो
न च त्वं न चाहं न चाहं न चाहम् ।
न शाखापरन्तत्वमेवं प्रकृष्टं
समानन्दमानन्दमानन्दरूपम् ॥

इत्यादि प्रवचनम् । तस्मात्तदेवं विधानेन त्रितयमनन्तं प्रतिष्ठापरं ब्रह्म बोध्यम् । संसारविधिना चात्र तमःप्रकाशभावः, तत्रैव—अहम्, त्वम्, अयम्, इत्याद्यनेकभेदश्च सिद्धः । एतत्परे ह्येव कृष्णशुक्ले भवतः, तथा तच्छाखाश्च संप्रसिद्धा भवन्ति । शाखायामपि कृष्णशुक्लस्वरूपायां सर्वत्र चायं नियमः—ज्ञानक्रियेच्छायाः, ज्ञानेच्छाक्रियायाः, इत्याद्यः । एवमनेकश्च परिवर्तनक्रमः । तत्र च जीवस्य यथायथं विधानं ज्ञानेच्छाक्रियापरायणं व्याख्यातमस्ति ।

अत्र चायं क्रमः—ऋग्वेदे ज्ञानपरे तु चतस्रः शाखाश्च शुक्ले, कृष्णेऽपि चतस्र इति । तत्र सर्वस्मिन्नपि ज्ञानांश एव वर्णितः । अहमेतदित्येतच्च ज्ञानांशः । एवं क्रियांशमात्राख्यानं यजुर्वेदशाखया बोध्यम् । यजुर्वेदस्याप्यष्टौ शाखाः । चतस्रः कृष्णगताः, तथा शुक्लस्था इति भावो विज्ञायते । एवं सामवेदेऽपि दशशाखाश्च नियता भवन्ति दशाङ्कमानेन । अन्यथा त्वस्याऽनन्ताः शाखा भवेयुः, इच्छापरत्वात्, तदिच्छायाः सर्वाधिगतत्वाच्च । यद्यपि " सामवेदः सहस्रशाखः " इत्यादि प्रवचनम्;

तथापि तत्र सहस्रशब्दस्य चानेकत्वव्यवहारेणान्वयः । सहस्र इत्युक्त्यापि तादृशमनन्तत्वं बोध्यम् । एवमथर्ववेदेऽपि तादृश्यो ह्यष्टौ शाखाः संप्रसिद्धा भवन्ति । तत्रापि च दृश्यते शुक्लकृष्ण-व्यवहारेण भेदद्वयम् । अत एव—

"ऋग्वेदो ज्ञाननिष्ठः स्याच्छाखाष्टकसमन्वितः ।
अकारस्थो ह्ययं वेद्यश्चात्मनिष्ठः परावरः ॥
क्रियानिष्ठो यजुर्वेदस्तादृशः शाखया वृतः ।
उकारस्थो ह्ययं वेद्यो द्वयोर्योगः समाहृतः ॥
इच्छानिष्ठः प्रधानस्थः सामवेदो मकारजः ।
अनन्तशाखासंपन्नो ह्यनन्तः सर्वसंश्रयः ॥
समाहारो ह्यथर्वा स्यादोमित्येकाक्षरान्वयः ।
अष्टशाखासमायुक्तो निर्णयार्थः क्रमेण च ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वाश्च शाखाः परमाणुस्वरूपनिर्णयार्थं वेदितव्या भवन्ति ।

अस्याः शाखायास्तु यन्त्रशास्त्रेण प्रवचनं भवति, यन्त्र्यते सर्वं विश्वमिति यन्त्रः इति व्युत्पत्तेः । यन्त्रणं हि निर्णय-रूपम्, तदभिधानत्वादस्याश्चापि यन्त्रमिति व्यवहारः । यन्त्रणं-तावत्समूहस्य भवति । समूहस्तावत्परमाणोरेव प्रसिद्धः । तस्मात्तन्निर्णयार्थमिदं बोध्यम् । शुक्लकृष्णभेदश्च तमः प्रकाशपरः । तदुपस्थानं प्रसारणञ्च शाखापरमिति व्याख्यातं भवति । यस्य



चैवं यत्र यत्र चावश्यकता—एतत्प्रकाशयुक्तानामित्थं भूतानामत्र प्रयोगः, एतत्तमोविशिष्टानामित्थंभूतानामत्र प्रयोगः, इत्यादिः सर्वो व्यावहारश्च तेनैव वेद्यः । अत एव हि लोकेष्वेवं दृश्यते—कुत्रचिदधिकश्च प्रकाशः, कुत्रचिदधिकं तमः, कुत्र-चिच्च द्वयोः साम्यम्, कुत्रचिदल्पीयसी शक्तिः, कुत्रचिद्बहीयसी शक्तिः, कुत्रचित्समा हि शक्तिः, इत्याद्यनेकप्रकाराः पदार्थाः संव-र्तन्ते ।अनेनैव भेदेन शुक्लकृष्णाख्यानं तच्छाखाख्यानञ्च भवति । अत एव सशुक्लकृष्णशाखं ससंवृतञ्च वेदमधीष्व" इत्याद्यु-पदेशः । शाखामन्तरा हि वेदाध्ययनस्य निष्प्रयोजनत्वमेवानेन सूचितं भवति । यद्यपि वेदभिन्ना न शाखा भवति, तथापि तस्या वेदो-पाख्यानरूपत्वेन तथा प्रसिद्धिः ।

शाखानामासां कर्तारस्तु विष्णुब्रह्मशिवाः महाविष्णुनियमन-पराः । ये च तेषामपि प्रबन्धस्य प्रवर्तकाः, तेषामेवैतच्छाखोपा-ख्यानम् । एवं शाखादिकं कृत्वा हि पूर्णं संसारस्यानुवर्तनं भवति । ब्रह्माण्डादारभ्य यावत्पर्यन्तं यच्च संसारे परिगणितम्, तत्सर्वमेतत्परं बोध्यम् । प्रकारेण चानेन संसारनिर्माता भवति जीवः । इदमेव "परं ब्रह्म त्वम्, ब्रह्म त्वम्"इत्यादि सर्वत एवोक्तं भवति । अत एव—

"संसारकल्पनार्थाय ह्यध्येयं वेदसंज्ञकम् ।
ब्राह्मणोपनिषद्यन्त्रमुपवेदं तथा परम् ॥

ज्ञात्वा चैवं यथायोग्यं ब्रह्मभावं प्रपद्यते ।
इदमेव फलं नित्यमतीतं प्रणवाभिधम् ॥

एतदर्थं हि सर्वस्वं कर्तव्यं यन्त्रमुत्तमम् ।"

इत्यादि प्रवचनम् । तस्माद्ब्रह्मभावाय संसाराय चेष्टसाधनाय ब्राह्मणोपनिषदं वेदाश्चाध्येया भवन्ति । तथा तच्छाखासहितः शुक्लः कृष्णश्च सर्वं यथाक्रममध्येयम् । अत एव "तमधीत्य ब्रह्मभावायोपतिष्ठताम्" इत्याद्युपदेशः । अत एव चैताः ब्रह्मविद्याः वेदवर्तिन्यः तमः प्रकाशयुक्ताः सार्वत्रिक्यः सर्वसिद्धाः शाखासमन्विताश्च प्रोक्ता भवन्ति । ब्रह्मविद्यामन्तरेण ब्रह्म नोपलभ्यते। विना च ब्रह्मभावं सर्वानन्दसुखं परमतीतं फलं न प्राप्यते । तत्प्राप्तिहेतुत्वेन तत्संग्रहकरणौचित्यम् । एतदर्थमेव हि ब्रह्मचर्याश्रमस्याभिधानमिति व्याख्यानफलम् । तस्मात्सर्वप्रबोधनाय हि, सर्वज्ञानप्रज्ञानाय च सशाखं ब्रह्मतत्वं संसरणप्रकाररूपो वेदश्च वेद्य इति संसारमात्रस्य सिद्धान्तः ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे वेदानां शुक्लकृष्णशाखास्वरूपनिरूपणं नाम द्वादशस्तरङ्गः ॥**

---

ॐ

## अथ
# त्रयोदशस्तरङ्गः ॥

---

तदिदञ्च वेदब्राह्मणोपनिषदुपवेदकृष्णशुक्लशाखासमन्वितं षट्कम्, तत्समुदायश्च सप्तमः, सर्वं यथायथं क्रियाज्ञानेच्छापरं भवति । तादृशं तत्परिवर्तनञ्च षट्कम्, सप्तमञ्च समाहृतमिति, नियतं विज्ञायते । तत्सर्वमहमेतन्नेत्येतत्परं प्रणवस्थितं वेदितव्यम्। इदञ्च सर्वस्वं संसारावधारणम् । येन येन नियमेन संसारोऽयं प्रजायते, तत्सर्वं प्रकारबीजमेवात्राख्यातं भवति । तस्मादेतदध्ययनाध्यापनं फलप्रदं सर्वसनातनञ्चेत्युक्तं भवति । इदमेव भवति प्रथमवयसः फलम् । प्रथममेवं ज्ञात्वा पश्चादेवावश्यके कर्मणि प्रवृत्यौचित्यम् । सर्वेण चानेन ज्ञानेन यथायथं सर्वकार्यसाधनविज्ञानं सम्यङ्नियमेन भवतीति विज्ञेयम् ।

अथैतस्य वेदोपनिषद्ब्राह्मणोपवेदस्य कृष्णशुक्लयोश्च तच्छाखापरयोर्येन ज्ञानं भवति, तस्य चाङ्गत्वेन प्रवचनम्, "यच्च यस्य साधनं भवति, तस्य तदङ्गं भवति" इति ब्रह्मसूत्रात् । यद्यपि साध्यसाधकयोरभेद उक्तः, तथापि कार्यव्यवहारेण साध्याद्भिन्नः साधक इति सर्वत्राख्यातत्वात् । यद्यपि वेदादिकमिदं सर्व-

संसारावधारणार्थकम्, नातःपरं किञ्चिदन्यदस्ति मान्यम्, तथापि चैतत्प्रबोधनप्रकारस्त्वन्तर्गत इत्यतो भिन्नं तदिति विज्ञेयम्। यावच्च प्रबोधनक्रमो न ज्ञायते, तावत्समुदायस्य यथेष्टबोधसंभवो नास्तीति लोकन्यायेन स्पष्टमुक्तं भवति। दृश्यतामिह—पूर्वं समुदायो ज्ञायते, तस्मित्समुदाये क्रमावश्यकत्वम्, पूर्वमिदं तत्परमिदम्, इत्याद्यभिधानम्। एतत्क्रमेणैव संसारमात्रस्य सर्वस्य प्रबोधो भवति। तस्मात्तादृशेन नियमेन वेदोपनिषद्ब्राह्मणोपवेदमपि वेदितव्यम्। अत एव साङ्गो वेदो ह्यध्येयः, इत्याद्युपदिश्यते। वेदमात्रस्य हि यश्च क्रमः, तस्य बोधो भवति येन, तद्वेदाङ्गमिति विज्ञेयम्। यद्यप्यवयवावयविनोरप्यभेद उक्तो भवति, तथाप्यवयवावयविनोः समुदायव्यवहारे चैव चरितार्थता। अवयविनमन्तरा च नावयवः कश्चिदपि प्रसिद्धः। कार्यकर्तृत्वे तु द्वयोरेकस्मिन्नावश्यकता। इदमेव समुदायफलम्। एतत्संसारमात्रे तु समुदाय एव प्रभासते, सर्वस्य सर्वापेक्षितत्वात्। नात्र कश्चिदपि पदार्थो दृश्यते, यस्य चान्यापेक्षा न भवति, इति बीजप्रदर्शनादेवानुमेयम्। ततो वेदानामङ्गान्यावश्यकानि भवन्ति। तानि च सन्ति क्रियाज्ञानादीनां यथेष्टव्यवहारेण षट्प्रकाराणि। यथा च तादृशाः वेदाः षट् भवन्ति, तथा तत्साधकान्यङ्गान्यपि तादृशानीति प्रबोध्यम्। अत एव "षड्भिरङ्गैः ब्रह्म विद्धि" इत्याद्युपदेशश्रवणम्। अत एव——



"षडङ्गैर्बुध्यते ब्रह्म तादृशं त्रितयात्मकम्।
आत्मानात्मनिषिद्धस्थमोमित्येकपरायणम्॥

षट् प्रकाराश्च संसारे संभवन्ति यथायथम्।
तेषां प्रवचनार्थाय सर्वो वेदो विधीयते॥

तद्वेदस्यापि संबोधैः षडङ्गं तादृशात्मकम्।
ज्ञानं क्रिया तथैवेच्छा समाहारस्तथापरः॥

तत्प्रकाराश्चापि सर्वे सप्त चैवं समाश्रिताः।
अहमन्तर्गतश्चैवमेतदन्तर्गतं तथा॥

नकारान्तर्गतं सर्वं विष्टं प्रणवगोचरम्।
वेदवेदाङ्गतत्वञ्च त्रिविधं प्रणवात्मकम्॥

ज्ञात्वा तत्वं संलभेत सर्वसिद्धान्तसंज्ञकम्।
वेदं ह्यकारं विज्ञाय चोकारं त्वङ्गसंज्ञकम्।
मकारं च तयोस्तत्वं त्रिदेशः प्रणवः परः॥

अङ्गाङ्गीभावसंबद्धो वेदवेदाङ्गनिश्चितः।
तत्क्रमस्य प्रबोधाय ह्यङ्गानि नियतानि च॥"

इत्यादि प्रवचनम्। तस्माद्वेदार्थप्रबोधाय षडङ्गानि सन्ति नियतानि। "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषम्" इत्यादि प्रवचनात्, तानीमानि षडङ्गानि वेदोपन्यस्तानि बोध्यानि भवन्ति। वेदानाञ्च मुख्यमङ्गञ्च व्याकरणं प्रतिष्ठितम्। ततः परं

शिक्षा, ततः कल्पशास्त्रम्, पुनः छन्दःशास्त्रम्, ततो निरुक्तम्, ततो ज्यौतिषम्, इति तत्प्रकारविज्ञानक्रमः। अन्यथा सर्वेषामपि प्राथम्यं सिद्धं भवेत्। किञ्च न तत्र नियमादयः, सर्वैश्च प्रकारैर्ब्रह्म वेद्यं भवति, ब्रह्म च सर्वस्वमिति बीजात्। अत एव

"स्वतः सर्वरूपान्तरं ब्रह्मतत्वं
स्वयं सर्वदा सर्वगं सर्वनित्यम्।
प्रशस्तं परातीतगम्यं प्रधानं
सदा सच्चिदानन्दमानन्दरूपम्॥

स्वयं सर्वमङ्गं स्वयं सर्ववेदः
स्वयं विष्ठितं सर्वसर्वज्ञभावम्।
सदैवाहमेतन्नकारस्वरूपं
सदोङ्कारमोङ्कारमोङ्काररूपम्॥

न शाब्दप्रबोध्यो विशिष्टोऽयमात्मा
न वा ज्यौतिषः कल्पसिद्धोऽयमात्मा।
निरुक्तो द्विरुक्तो न युक्तोऽयमात्मा
परः सच्चिदानन्दभासस्वरूपः॥

सद्वा सर्वदावश्यकः सर्वसिद्धः"

इत्यादि प्रवचनम्। तस्मात्तादृशप्रकारं ब्रह्म वेद्यं भवति। तन्नियमेनैव वेदाङ्गान्यपि तादृशानि नियतानि।



तत्र च मुख्यमङ्गं व्याकरणम्, सर्वप्रसिद्धं सर्वानुगतं सर्वस्य साधनरूपं साधकतमञ्च बोध्यम्। व्याक्रियन्ते अनेन, इति व्याकरणम्। सर्वेषाञ्चैव शब्दानां समूहकरणम्, तद्विवरणम्, तद्व्यवहारविज्ञानम्, तदुत्पादनाद्यनुष्ठानञ्च, येन बुध्यते; तद्व्याकरणमिति सर्वसम्मतम्। अत एव—

तद्धि व्याकरणं प्रोक्तं वेदाङ्गेषु मुखञ्च यत्।
शब्दशास्त्रमधीत्यैव सर्वभावः प्रपद्यते॥"

इत्यादि प्रवचनम्। तस्मादिदं व्याकरणं पूर्वमिति सिद्धम्। अस्मिंश्च व्याकरणशास्त्रे सर्वेषां शब्दानाम्, व्यवहारानुवर्णनम्, पुनः शब्दावश्यकता, तत्प्रयोगावश्यकता च यथायथं नियतं भवति। परिभाव्यमत्रेदम्—भाषायाः साध्यत्वेन हि व्याकरणमुक्तं भवति, भाषा च साध्या, व्याकरणं साधकतमम्, इति सर्वत्र प्रसिद्धम्। भाषाया एव हि व्याकरणमिति सर्वैः स्पष्टमुच्यते। अत एव—

"एतत्संसारसंभावे यादृशी शाब्दिकक्रिया।
तासां सम्यक्प्रबोधाय शास्त्रं व्याकरणं मतम्॥

शब्दशास्त्रमधीत्यैवं शब्दतत्वं प्रबुध्यते।
शब्दो ब्रह्मेति विज्ञानाद्ब्रह्म वै प्राप्यते नरैः॥"

इत्यादि प्रवचनम्। एवमेव "भाषातत्वात्मकं व्याकरणं सर्वाङ्गमुख्यं शब्दप्रतिपादकम्, तद्ब्रह्मप्रवचनायाध्येयम्" इत्याद्युक्तिः।

यद्यपि भाषार्थमेव व्याकरणं भवति, यो यस्मै यस्माद्वा भवति तस्मादनुभूतपदार्थात्स पूर्व इति प्रवचनात्; तथापि भाषाव्याकरणाभ्यामेव हि प्रबन्धो भवति, तत्र पूर्वं व्याकरणं ततः परा च भाषा भवतीति सर्वसिद्धान्तः। अन्तरेण व्याकरणं भाषायाः सम्यक्प्रयोगश्च यथायथं न भवति, एतत्परोऽयं हि शब्दः प्रयोक्तव्यः, इत्याद्यनुभवात्। दृश्यतामिह—येषाञ्च ज्ञानमपि न भवति, तेषां का वाऽस्ति भाषा किञ्च व्याकरणं, तेषामप्येवं क्रमः स्वभाषायां प्रज्ञानं विनापि भवति, एवं तद्विवरणञ्च, अनेन चानेन शब्दप्रयोगेण हीदमिदमर्थप्रज्ञापनं भवति, अत्र चास्मिन्विषयेऽयमयं शब्दः प्रयोक्तव्यः, इत्यादिबीजादिति। अतो व्याकरणस्य पूर्वत्वं वेदितव्यम्। यद्यपि भाषाद्वारैव व्याकरणाभिधानं प्रसिद्धम्, तथापि तदभिधानं ततः पूर्वमेव, यस्य च विद्यमानत्वं मूलेन भवति, तस्य प्रदर्शनमपि तादृशं भवतीति निश्चयात्, "मूलानुरोधि च स्थितं सर्वमिति ब्रह्मसूत्राच्च। तर्हीदञ्च वेदितव्यम्, व्याकरणाभिधानं भाषानुरोधेन भवतीति। तस्मात्तदनुरोधात्तदन्तर्गतं व्याकरणं प्रसिद्धमेव। एतत्प्रकाशश्च भाषापर एव प्रसिद्धः, भाषायाः प्रकाशकरणञ्च व्याकरणपरं प्रशस्तम्, इति परस्परसापेक्षत्वं बोध्यम्। दृश्यताम्—आवश्यकतयैव सर्वमिदं विश्वप्रभासनम्, आवश्यकता चान्योन्यबद्धेति। तस्माद्भाषा व्याकरणमपि तादृशं बोध्यं भवति।



भाषायास्तत्वमपीच्छाप्रज्ञापनार्थकं भवति। सर्वत्र चायं त्रितयक्रमः, ज्ञानेच्छाक्रियाव्यापारः। तत्र प्रथमं ज्ञानम्, ततश्चेच्छा, ततः क्रियाकरणमिति हि संसरणव्यवहारः। त्रितयञ्च तत्सार्वत्रिकं भवति। सर्वत्र चैतस्यैव विद्यमानता विज्ञायते। अतश्च सर्वस्य सर्वापेक्षत्वञ्चेति सिद्धमेव। इदञ्चात्र सूचितं भवति—यन्मया ज्ञातं तत्सत्यमिदमेतादृशम्, तेन चेच्छा संभवति, तदिच्छाकार्यं हि भवति व्यापारः, यावदिच्छा या अन्येभ्यो न ज्ञापयामीति, तावत्तत्पूर्तिर्न भवति, इति। इदञ्चात्र कारणं भवति, अस्ति च सर्वत्रात्मनो विद्यमानता, यो ह्ययं स चान्यः, यो ह्यन्यः स चान्यः स चाहमपीति बीजात् इति। अहंमात्रस्य चैकस्थत्वमेव पूर्णत्वं अहमो व्यक्तिमतस्त्वपूर्णत्वम्। तस्मात्पूर्णोऽहमि च तत्प्रयोगः। इदमेव चेच्छाप्रज्ञापकं तत्वम्। सर्वस्य चाहमश्चैक्यात्सर्वं सर्वस्मात्प्रज्ञाप्यं भवेत्। तत्प्रज्ञापनहेतुतयैव भाषा चेति, व्याख्यानाद्बोध्यम्। दृश्यतामिह—या हि ममेच्छा, सा चान्येषां स्वसङ्कल्पितार्थज्ञापनेनैव पूर्णतां याति, सर्वाश्रये पूर्णता, एकाश्रयेऽपूर्णता चेति स्पष्टमुक्तं भवति, सर्वाश्रयो योगः, योगश्चाहमेतदोश्च सिद्धः, तस्मादहं प्रति एतदो विज्ञापनम्, एतदं प्रति अहमो विज्ञापनञ्चेति भाषाभिधानमस्ति, अहञ्चैतदंश एव पूर्णः, "नाहमः पूर्णत्वं नचैतदश्च केवलस्य" इति ब्राह्मव्याख्यानेन बोध्यमिति। ततो यद्यन्मय्यस्ति तच्चान्यत्र नास्ति, यद्यन्यत्र नास्ति तन्मय्य-

स्तीति बुध्या प्रज्ञापनं भवति, सर्वस्यैक्यात्, आत्मनः प्राधान्याच्च। तस्मादिच्छा प्रज्ञापनार्था हि भाषा भवति। तस्मादेव "आवश्यकपरा भाषा च" इत्यादि प्रवचनम्। अत एव—

"यथैवावश्यकं लोके तथा शब्दं प्रयोजयेत्।
अन्यः शब्दो निरर्थः स्यादप्रयुक्तो निषेधजः॥

शब्दानां सुप्रयोगेण नरः प्राप्नोति गौरवम्।
अप्रयुक्तेन शब्देन चात्माऽऽघातो भवत्यपि॥

यश्चानावश्यकः शब्दः स वाग्वज्रं भविष्यति।
तेनात्मा हन्यते नित्यं तस्माद्दोषोऽभिधीयते॥"

इत्यादि प्रवचनम्। तस्मादावश्यकतायाः प्रज्ञापनमेव शब्दतात्पर्यम्। एतदावश्यकतानियामकमेव हि व्याकरणमिति शब्दशास्त्राभिमतं भवति। यादृशी च यस्यावस्यकता तस्य तदावश्यकताक्रमानुष्ठानेन शब्दानां समीचीनः प्रयोगोऽप्युक्तो भवति। अत एव कुत्रचित्प्रियतमेन शब्देन प्रवचनम्, कुत्रचिदप्रियेन तेन, कुत्रचित्साम्येन तेन च, इत्यादि यथावश्यकं शब्दानां प्रयोगौचित्यम्। सार्था निरर्थाश्चात्रेत्थं बोध्या भवन्ति—ये च ह्यावश्यकतायाः पूर्णवाचकास्ते सार्था भवन्ति, अन्ये सर्वे निरर्थकाश्चेति। अत एव "सर्वावस्थायां सर्वस्मिन्नपि कार्ये च नैकरूपत्वं वक्तुं योग्यम्, न सर्वेषाञ्च शब्दानां सर्वत्रापि प्रयोगौचित्यम्"



इत्याद्युक्तिः। तत्र सर्वत्रेत्युक्त्या आवश्यकतैव गृह्यते, "यत्रावश्यकतायां यस्य यस्य च शब्दस्य प्रयोजनम्, तस्य तस्यैव प्रयोगौचित्यम्, इति तदर्थः। अन्यथा तु "सर्वे शब्दाः संबद्धाः सर्वार्थप्रवाचकाः" इत्याद्युक्तिर्विहन्येत। बीजेनानेनैव ह्यावश्यकप्रज्ञापनार्थं शब्दशास्त्रमध्येयं भवति। आवश्यकता च त्रितयपरा, शब्दश्चावश्यकपरः, त्रितयावश्यकं हि ब्रह्म भवति। तस्माच्छब्दोऽपि ब्रह्मैवेति बोध्यम्, ब्रह्मणो बहिर्न किञ्चनेति व्याख्यानात्। अत एव—

"सर्वत्र विद्यते चात्माऽहमित्येकान्तरायणम्।
सर्वत्र विद्यते चैतत्संसारोऽयं सनातनः॥
अहमेतदोर्हि योगः सोऽयं संसार उच्यते।
द्वयोः परस्परश्चैव भवेदावश्यकी क्रिया॥
तत्संप्रज्ञापनं यच्च तद्भाषेत्यभिधीयते।
पूर्वं व्याकरणं तत्र क्रमस्तेनाभिधीयते॥
एष चावश्यकार्याय शब्दश्चैवं प्रयुज्यते।
शब्दानां संप्रयोगेण सर्वं प्रज्ञापितं भवेत्॥
जाते प्रज्ञापने त्वेवं पूर्णत्वमभिधीयते।
अहमश्चैतदायोगो भाव्यश्चैवं सनातनः॥"

इत्यादि प्रवचनम्। तस्मादहमश्चैतदा योगः परस्परप्रज्ञापको भवतीति सिद्धम्। तत्र च पूर्वं व्याकरणमावश्यकानियामक-

मिति विज्ञेयम् । स्वेच्छाप्रज्ञापनञ्च येन केनचित्प्रकारेण भवति, तदेव भाषा, तत्र शब्दप्रयोगप्रस्थापनमेव व्याकरणमिति सर्व-व्याख्यानेन स्पष्टमुक्तं भवति । परिभावनयापीदं द्रष्टव्यम्—योऽहमस्मि स चाहं त्वां प्रति कथयिष्यामि, त्वञ्चेदं कुरु, इति । एवं कथनेन हि ममेच्छा त्वेवं करणे संभवति, तत्प्रज्ञापनमेवै तदिति विज्ञेयम् । अहंदृष्ट्याप्येकस्याहमः समीपे द्वितीयो-ऽहमश्चैतत्, इति हि व्यष्टिभावः । अत एव हि व्यष्ट्यां नानात्व-प्रकाशः । अत्रेदमेव हि नानात्वं भवति, अहमित्येतद्बोधः । अहमः स्वदृष्ट्या च सर्वमेतन्मन्यते, अहमो हि चैतत्प्रतिभानं पृथक्त्वम्, यदहं तदेतन्नेति । अहमो भिन्नमेतादिति बोध एव नानाभावहेतुः । तत्रैव हि प्रज्ञापनविधिः ,परमार्थस्य वस्तुनः स्थितेरेकत्वात् । तदेव भाषेति हि फलितार्थः ।

इत्थमत्रोदाहरणं भवितुमर्हति—यथा कश्चिद्भ्रान्तश्च पुरुषः स्वगृहान्निस्सृत्य, महान्धकारे घोरे च वने विभ्रमति । स न यावत्सुपथमाप्नोति, तावद्भ्रमकारणञ्चान्धकाररूपमज्ञानं तस्य भवति । अन्यथा तु तस्मिन्वनेऽपि तादृशा गृहा निर्मातुं शक्याः । यश्च ह्येकनियतः स एव मद्गेह इति बुद्धिरेव भ्रमहेतुः । एवमेव हि नानात्वं यथायथं विज्ञेयम् । यथा तस्य पुरुषस्य गेहमार्गोऽपि तस्मिन्वनेऽस्त्येव । यद्यप्येवं पृथिवीमात्रस्य चैकत्वदृष्ट्या तत्र निवासकार्यौचित्यम्, तथापि चैकस्मिन्नियते प्रणष्टे दुःखमाप्नोतीति



बीजादहमेतदोः परस्परं भिन्नत्वविज्ञानं नानात्वरूपं भवति । तदेव हि दुःखमित्यादिव्यवस्थितं भवति ।तदज्ञाने सत्येव प्रज्ञापनादि-विवक्षा ।

अन्यथा तु सर्वमशाब्दमदेशकालं सार्वत्रिकं बोध्यं भवेत् । अत एव—

“ ज्ञानं समभवद्येषां तेषां शब्दो न किञ्चन ।
भेदाभासे भवेच्छब्दो ज्ञानाद्भेदो विनश्यति ॥
भेदे नष्टे शब्दनाशः सर्वं प्रणवसंज्ञकम् ॥ ”

इत्यादि प्रवचनम् । एवमेव—

“ सर्वा भाषा च सर्वस्य सर्वं व्याकरणं तथा ।
यथैवावश्यकं लोके तथा संभाव्यते सदा ॥ ”

इत्यादि प्रवचनम् । तस्माद्भाषा च मुख्या भवतीति विज्ञेयम् । तत्र च पूर्वं व्याकरणमिति सिद्धं भवति ।

तस्मिंश्च व्याकरणे न तु केवलं शब्दमात्रं लभ्यते, किन्तु अनेनानेन वर्णेन चायं शब्दो भवति, तत्र चायं क्रमः, इति च, एवं प्रबोधार्थकं शब्दशास्त्रमिति सर्वाभिमतं भवति । अत एव —“ अन्तरा च व्याकरणं भाषा दुष्प्रयुक्ताभिधीयते, न वक्तव्या चावश्यकार्था भाषा दुष्प्रयुक्ता, ततो वाच्यदोषमवाप्नुयात् ” इत्यादि प्रवचनम् ।

एवमेव "रक्षोहागमलध्वसन्देहाः प्रयोजनम्, इत्यध्येयं व्याकरणमित्युपदेशः। तत्र रक्षाकरणं सुप्रयुक्तम्, यच्च वक्तुमुचितम्। रक्षितवचनञ्चाश्यकपरम्। एवमूहकरणञ्च तर्कयुक्तं वचनम्। तत्र तर्कश्चायं भवति, अस्त्यस्यैतत्कालः, अथ वा नास्तीति यथेप्सितमुच्चारणम्। एवमागमश्च प्राप्तपरं वचनं वक्तव्यम्, यच्च प्राकृतेन समनियतम्, सर्वावश्यकतामवधार्य सर्वेञ्च दृष्ट्वा वक्तुमुचितञ्च। यथा कस्माच्चित्पुरुषात्किञ्चियच्च याच्यते, तत्र तत्पुरुषस्य यदावश्यकं स्वावश्यकञ्च, तच्च वस्तु द्रष्टव्यम्, ममावश्यकमेतादृशम्, एतस्यावश्यकमेतादृशमिति। "दातुं शक्नोत्ययं न शक्नोतीति वा नियमेन प्राप्नोति" इत्यादि परिभाव्य हि वाच्यमित्यागमफलम्। अथ लघुत्वमपि करणौचित्यमेव। लघुत्वञ्चात्र शब्दानां चाल्पशब्दं बह्वर्थप्रदञ्च वाक्यं प्रयोक्तव्यमिति च लाघवफलम्। असन्दिग्धं विस्पष्टञ्च वचनं वक्तव्यमावश्यकामिनियतञ्च। नैतादृशः शब्दः प्रयोक्तव्यः, येन भ्रमो हि संभवति। इदमस्ति वा, तथान्यदस्ति वा तदर्थं इति विचारयोग्यं न वक्तव्यम्। इत्थं भूतानां हि शब्दानां प्रयोगौचित्यम्, यैश्च विस्पष्टो ह्यर्थो बुध्यते। एवमेव हि व्याकरणाध्ययनस्य प्रयोजनमाख्यातम्। तस्माद्व्याकरणमस्ति मुख्यमङ्गम्।

तच्च भाषायाः पूर्वं भाषास्थञ्च भवति। भाषा च प्रज्ञापनपरा, सार्वत्रिकी, सर्वानुगता चेति बोध्यम्। व्याकरणस्य पूर्वत्वे सत्येव



स्वमातृभाषायां व्याकरणाध्ययनस्य प्रयोजनं लोकव्यवहारैः स्पष्टमुक्तं भवति। यस्मिन्देशे वा कुले वा यस्य चोत्पत्तिर्भवति, तत्रैव तदिच्छायाः प्रज्ञापकत्वमपि भवति। तत्र तदिच्छायाः प्रज्ञापनाय ह्येवं व्याकरणमपि तदवयवत्वेन तत्र स्थापितं भवतीति विज्ञेयम्। सति च देशान्तरगमने कुलान्तरप्रवासे वा भाषयाः शिक्षा नियता भवति। अन्यथा त्वेतादृशमपि बोध्यम्—यश्च सति च शिक्षाकर्मणि, न भाषायाः प्रज्ञाता, स्वभाषायामकुशलश्च, किं तस्यान्यभाषयेति। अत्रायं भावः—"आवश्यकता नास्ति, अन्तरा चावश्यकतां भाषामपि न जानाति" इत्येवं हि सर्वैरप्युच्यते, यथाक्रममेवं सर्वं वेदितव्यमस्ति, यश्च कश्चिदेवमस्ति स्वभाषामन्यभाषाञ्च नानाविधां जनाति, कश्चिदेवं स्वभाषाज्ञान्यन्यभाषाज्ञानी च, कश्चिदेवं स्वभाषामपि न जानाति, एवं वक्तुं शीलमपि नास्त्यस्यैवेति। एवमनेकक्रमः। अतः सर्वमावश्यकपरं प्रशस्तम्। तस्मादेवं विधानेन तदिच्छाप्रज्ञापनधर्मवती च भाषा भवति। तत्क्रमनियामकं च व्याकरणमिति सिद्धान्तः। अत एव—

"इच्छाविज्ञापनार्थं हि शब्दः सम्यक्प्रयुज्यते।
सर्वस्मिन्सर्वपूर्णत्वं व्यष्टिमात्रे त्वपूर्णता॥
पूर्णापूर्णे द्वे च युक्ते संसारेऽस्मिन् व्यवस्थिते।
द्वयोरेवं विधानेन भाषाव्याकरणं भवेत्॥

ओमित्येतत्परं प्रोक्तं तादृशं त्रितयात्मकम् ।
अकारं ज्ञापकं विद्धि तथा व्याकरणं परम् ॥
भाषां विद्धि तयोर्योगे चोमित्यन्तर्गतां तथा ।
एवमेवाभिधानेन संसारे सर्वसंस्थितिः ॥
ज्ञानं ज्ञाता तथा ज्ञेयं वाच्यं वाक्यञ्च वाचकम् ।
देयं दाता तथा दानं तादृशं विद्धि सर्वशः ॥

इत्यादि प्रवचनम् । तस्मात्तादृशमोङ्कारपरं प्रज्ञापनं व्याकरणं भाषा चेति त्रितयं वेदितव्यम् ।

तत्र प्रज्ञापनमकारनिष्ठमहमः स्वरूपम्, व्याकरणमुकारनिष्ठमेतदः स्वरूपम्, भाषा च मकारनिष्ठा तयोः संबन्धरूपा चेति क्रमेण प्रज्ञापनं व्याकरणं भाषा च सर्वमोमित्यन्तर्गतं बोध्यम् । अत एव "वैय्याकरणः प्रणवार्थमभिजानाति" इत्याद्युक्तिः । एवमेव "प्रणवबोधार्थमित्यध्येयं व्याकरणमित्याद्यपि च । तस्माद्व्याकरणस्यास्य वेदाङ्गत्वेन प्रवचनं मुख्यत्वञ्च सिद्धम् । अनेनैव हि सर्वेषां शब्दानां यथावच्च व्यवहारज्ञानं भवति । वर्णानां समूहस्तु शब्दः । "क्रमेण वर्णानामभियोजनेनैव सर्वे शब्दाः संभवन्ती" त्यादि प्रवचनम् । यथा हि किलायमात्मशब्दः—अत्र प्रथममकारद्वयप्रयोगः तत्र, चैकावस्था । ततस्तकारप्रयोगः, एवं ततो मकारः, तत ऊर्ध्वमप्यकारद्वयमित्यादि । अत्र चोदात्तानुदात्तस्वरितभेदोऽपि वर्तते ।



एवं क्रमेण हि सर्वेषां शब्दानां व्यवहारो विज्ञेयः । शब्दानां पुनरुत्पत्तिवर्णनम्, शब्दसंबन्धवर्णनम्, तदावश्यकत्वञ्च सर्वं व्याकरणपरं बोध्यम् । यस्मात्कालादस्मिन्संसारे शब्दोत्पत्तिः, कालशब्दयोः संबन्धः, एवं पदार्थकालयोः संबंधः, शब्दपदार्थयोः संबन्धश्चेत्यादि, तत्सर्वं सकारणबीजमाख्यातम् । एतत्पदार्थवाचकोऽयं हि शब्दः, इदं चात्र कारणं भवति, अस्य चायमर्थः, तत्रेदङ्कारणं प्रत्येकञ्च शब्दानां पूर्वापरानुरोधः, पूर्वमिदमभूत्, ततश्चेदमित्यादि प्रत्यक्षीकरणम्, शब्दावश्यकत्वम्, ज्ञाननिष्ठञ्च प्रवचनस्वरूपम्, सर्वमेतद्व्याकरणपरं बोध्यम् । एवमेव शब्दानां स्वरूपम्, शब्दावस्थितवर्णस्वरूपं च यथायथमाख्यातम् । यद्यपि शब्दस्याकाशगुणत्वात् न तद्रूपं चाक्षुषं भवति, तथापि सर्व तत्वानां संयोगव्यवहारेण तद्रूपादिकमपि बोध्यम् । यथा चाकाशस्य वाय्वादौ स्वरूपप्रदर्शनम्, तथा तत्रैव तद्गुणस्य शब्दस्यापीति विज्ञेयम् । एवं कृष्णपीतादि वर्णप्रयोगोऽपि । शब्दानां स्वरूपं तद्वर्णश्च पदार्थतत्वानुरोधेन भवति । यथायं पदार्थश्चाकाशीयः वायवीयस्तैजसश्च वा, तथा तदर्थोऽयं हि शब्दो भवति । तस्मिंश्च शब्दे तादृशञ्च तत्तत्वारोपणम् । यावच्च तद्व्यवहारे च स्थितो न भवति, तावत्तत्प्रवाचकत्वस्याप्यसंभव एवेति निश्चयः । एवं हि किलाकाशस्य बहूनि नामानि सन्ति । सति च तस्य वायोः प्रयोगे, व्योम इति, तथा तेजसः प्रयोगे गगन-

मिति च । एवमन्येऽपि तत्प्रवाचकाः शब्दा भवन्ति । तथा क्रमेण शब्दोप्याकाशगुण एव, शब्दगुणकमाकाशमिति प्रवचनात् । शब्दस्य ह्याकाशावस्थितत्वात् , आकाशस्य सर्वसंस्थितत्वाच्च शब्देन सर्वस्य प्रवचनम् । यत्र यत्र येन येन भावेन चाकाशः, तत्र तत्र तेन तेन भावेनैव शब्दोऽपि संभवति । तत्स्वरूपादिकञ्च तादृशमिति तत्सिद्धान्तः । यद्यपि सर्वे शब्दास्तु समानाः, आकाशीया भवन्ति, तथापि तत्तन्मेधाद्यनुभवेन हि, प्रियत्वमप्रियत्वम्, सह्यमसह्यमिति, दुष्टमदुष्टमिति, सुप्रयुक्तमप्रयुक्तमित्यादिनियमः । तदिदं चात्र कारणं भवति, यच्च कार्यावश्यकतानुरोधेन तत्प्रवचनम् । अत्र हि तादृशं तत्स्वरूपादिकं भवतीति भावः । तस्माच्च शब्दानां पृथक्पृथग्व्यक्तिः, तत्स्वरूपम् , पृथक्पृथग्वर्णाः, तत्कार्यम् , तत्रपूर्वापरनियमश्च सर्वं व्याकरणस्थितं बोध्यम् । अत एव——

" शब्दाश्च प्राकृताः सर्वे भवन्त्याकाशजास्तथा ।
वाय्वादौ संप्रयोगेण तस्मिन्भेदोऽपि दृश्यते ॥
आकृतिस्तत्स्वरूपञ्च स च वर्णः पृथक्पृथक् ।
सर्वमोङ्कारजं ज्ञात्वा शब्दशास्त्रं परायणम् ॥
शब्दपारं गता ये च ब्रह्म तत्प्रान्पुवन्ति हि ।
ओमित्येकाक्षरं ज्ञात्वा संसारे सर्वसाधकाः ॥"



इत्यादि प्रवचनम् । अत एव च " सर्वेषां शब्दानां स्वरूपं विद्धि, वर्णांश्च विद्धि, तत्क्रमञ्च विद्धि" इत्याद्युपदेशः । "एवम्" शब्देनैव सर्वलाभः" इत्यादि च स्पष्टम् । शब्दमन्तरा हि स्वावश्यकेच्छायाः प्रज्ञापनं न भवति, आवश्यकप्रज्ञापनं विना हि स्वेष्टप्राप्तिः कथं सिध्यतीति सर्वसम्मतम् । तस्माद्यथावच्च ज्ञानं शब्दानां मुख्यं साधनं भवति । उचितं हि तत्कारणम् । एवमेव पुनः शब्दानां यथावत्प्रयोगे हि धर्मश्चोक्तो भवति, अस्य च सर्वपरत्वात्, सर्वाश्रयत्वात्, मुख्यसाधकत्वाच्च । अत एव——

" शब्दशास्त्रं यथारूपमध्येयं ब्रह्मसंज्ञकम् ।
ब्रह्म तत्प्राप्यते नित्यं सर्वधर्मानुवर्तनात् ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वत्र शब्दानां प्रयोग एव यावदावश्यकं कर्तुं समुचितो भवति ।

आकाशस्य सार्वगतत्वाच्छब्दानामपि सार्वत्रिकत्वम् । आकाशशब्दयोः संबन्धश्चापि, तादृशैकत्वविशिष्टाधाराधेयभावरूपो भवति । शब्दानामाधारो भवत्ययमाकाशः । तस्मादेतस्य गुणः शब्द इति विशेषेण बोध्यं भवति । यथास्मिन्देहे देशे च न किञ्चिज्जीवं विना भवति, एवं देहादिकं विना जीवसंज्ञापि न भवति, तथैव ह्याकाशशब्दयोः संबन्धोपि विज्ञेयः । अत एव— आकाशात्मकः शब्दः इत्यप्युच्यते । अत एव——

"शब्दमाकाशजं विद्धि चाकाशाधारसंज्ञकम् ।
शब्दश्चाहंस्वरूपस्थो ह्याकाशश्चेतदि क्रिया ॥
ताभ्यां भिन्नं नकारस्थं शब्दकालादिवर्जितम् ।"

इत्यादि प्रवचनम् । तस्मात्तादृशेन भावेन शब्दस्याकाशीयत्वं सार्वत्रिकत्वञ्च सिद्धम् । एवं सर्वमपि व्याकरणाङ्गत्वेन बोध्यं भवति । शब्दानां प्रयोगस्तु कालानुसारी भवति । कालस्तु तादृशावश्यकतानियतः । आवश्यकतैव कालनियामिका । सर्वमेतच्च व्याकरणशास्त्रे व्यवस्थितं भवति ।

अस्मिंश्च व्याकरणेऽपि ज्ञानेच्छाक्रियानुसारेण चानेके भेदाः । आकशस्य सर्वपरत्वात्, शब्दानाञ्च सर्वाश्रयत्वादेकैव भाषा पूर्णा संसारनिष्ठा भवति । तदर्थमेव तादृशं सार्वत्रिकं व्याकरणं प्रशस्तं भवति, यस्याञ्च कदापि भेदो न भवति, ब्रह्मवत्सर्वत्र भासते । यद्यपि ब्रह्मण्यपि नानात्वम्, तथापि तस्य चैकत्वं परत्वञ्च सर्वत्र व्याख्यातं भवति । एवमेव हि भाषायामपि बोध्यम् । सा च संसारपरा ब्रह्मनिष्ठा । अत एव तस्याः संस्कृतत्वेन प्रवचनम् । सा च हि संस्कारयुक्ता । अत्र संस्कारश्चायं भवति, यो हि नियतव्याकरणप्रतिष्ठित इति बोध्यम् । तत्राप्यनेके भेदाः । परं तु तादृशं तदेकत्वञ्चैकत्वपरं सर्वथा मान्यं भवति । अत एव—



"या चैषा संस्कृता वाणी सर्वरूपा परायणी ।
मुख्या भाषा महाभाषा तत्संस्कारसमन्विता ॥
ओमित्येकाक्षरेणैव प्रवृद्धा प्रणवाख्यया ।"

इत्यादि प्रवचनम् । तस्मात्सर्वनिष्ठा सार्वत्रिकी संस्कारयुक्ता भाषा भवति । अत एवेयं देववाणीति चोच्यते । देवैश्चेयमुच्यते, इति तद्भावः । देवाश्चात्र क्रमाधिपाः क्रमनियन्तारः । ये च ऋषयो महर्षयो ब्राह्मणास्तथेश्वरः परमेश्वरश्च महाविष्णुः, तेषां सर्वेषामियमेव वाच्या भाषा भवति । ते च स्वेष्टप्रज्ञापनं स्वावधारणञ्च प्रबोधनं संस्कृतभाषया कुर्वन्तीति स्पष्टं प्रत्यक्षानुमानाभ्यामितिहासैश्च बोध्यं भवति । संस्कारयुक्ता प्रणवनिष्ठा च या भाषा, सैव सर्वभाषोत्पादयित्री भवति । यद्यपि सर्वासां भाषाणामेका हि क्रिया भवति, तथापि तादृशव्यवहारश्चाणुमहाविष्णुनिष्ठो बोध्यः । यद्यपि दृश्यतां महाविष्णोरपि कश्चिन्महाविष्णुरस्तीति, तथापि तेन तन्महाविष्णुत्वे हानिर्न भवति, अत्रत्यानाञ्च सर्वेषां प्रत्येकं तदणुमात्राणां तन्मानौचित्यमेव प्रशस्तमित्युक्तेः । यद्यप्येवं स्थितौ सत्यां सर्वातीततया स्वकार्यानुरोधेन सर्वेषां महाविष्णुत्वम्, तथापि सार्वत्रिकव्यवहारानुवर्तनस्यावश्यकत्वं क्रमावश्यकत्वाद्भवति । इदमेव ह्यतीतत्वफलं प्रणवनिष्ठं बोध्यम् । तस्मात्संस्कृता भाषा सार्वत्रिकी संसारपरा बोध्या भवति । सम्यक्सर्वं क्रियते इति संस्कृता इति व्युत्पत्तिः । सर्वस्यैक्यात्तद्भाषाप्येकपरा मन्तव्येति दृश्यताम् ।

तदनुरोधेनैव हि संस्कृताया भाषायाः सार्वत्रिकत्वमुपयुक्तं भवति। अनवस्थानुसारेण हि भाषान्तरेऽपि भाषेति व्यवहारो भवति।

अत एव हि संस्कृतभाषायामप्यनेके भेदाः। त्रयो हि भेदाश्चात्र प्रसिद्धा भवन्ति, तत्र च वैदिकः प्रथमः, द्वितीयो लौकिकः, ध्वनिपरस्तृतीयस्तयोः संबन्धरूपश्चेति। अत एव "शब्दानामनुशासनं क्रियते" इति प्रवचनम्। अत्र चैवं व्याख्यायते— शब्दानाम्, वैदिकानां लौकिकानां ध्वनिपराणामिति। त्रिषु च तत्र प्रथमो वैदिको ज्ञाननिष्ठः वेदस्वरूपः, द्वितीयस्तु लौकिकः क्रियानिष्ठः लोकस्वरूपः, ध्वनिश्चाव्यक्तस्वरूपः परिस्फुटो मकारनिष्ठो निषिद्धश्चेच्छापरः प्रसिद्धः। वैदिकास्तु ज्ञानमात्रवाचकाः। यैश्च पुनः शब्दैः सर्वेषामैक्यं संसूचितं भवति, ते सर्वेऽपि वैदिकाः। यैश्च पुनः सब्दैतदेकत्वविरुद्धो हि भेदः संसूचितः, ते लौकिकाः। ध्वनिश्च तावद्वयोरनुष्ठित इति बोध्यम्। वेदे भवः वैदिकः, वेदश्च ज्ञानम्, तच्च सार्वत्रिकं सर्वातीतं त्रितयस्थञ्च भवति, त्रयश्चैकमिति व्याख्यानात्। लोके भवो लौकिकः, लोको हि भेदः, सच्चैकनिष्ठ इति बीजात्। ध्वनिश्च प्रध्वंसरूपः, प्रध्वंसः सार्वत्रिक इति व्याख्यानात्। अत एव—

"शब्दानाञ्च त्रिधा भेदो वैदिको लौकिकस्तथा।
ध्वनिश्चैवं तृतीयः स्यात्तयोः संबन्धरूपवान्॥



येन येन हि शब्देन सर्वस्यैक्यं हि बुध्यते।
तं शब्दं वैदिकं विद्धि ज्ञाननिष्ठमकारजम्॥
अहमावेष्टितं सर्वं संप्रतिष्ठं परायणम्।
एतन्निष्ठश्च यः शब्दः येन भेदः प्रभासते॥
तं शब्दं लौकिकं विद्धि सर्वनिष्ठमुकारगम्।
अव्यक्तो ध्वनिरूपः स्यान्नकारात्मा परावरः॥
मकारस्थो ह्ययं शब्दस्त्रयो ब्रह्म सनातनम्।
वैदिको ज्ञाननिष्ठः स्याल्लौकिकश्च क्रियापरः॥
इच्छानिष्ठो ध्वनिर्बोध्यः सर्वसंभावनाश्रयः।
शब्दशास्त्रं यथायोग्यं प्रणवस्थं सनातनम्॥
संस्कारविहितश्चैव तत्प्रसिद्धमगोचरम्।"

इत्यादि प्रवचनम्। अत एव अक्षरात्मकः शब्दः। अक्षराश्च अकारादयः। स च शब्दो द्विविधः, वर्णात्मकः ध्वन्यात्मकश्चेति। वर्णात्मकश्चार्थप्रवचनपरः, ध्वन्यात्मकश्च शब्दः अव्यक्तः परिस्फुटः। स च पटपटाकृत्येत्यनुकरणरूपः। यथा नद्यां समुद्रे वा समाहिसेति शब्दो भवति। एवं शङ्खादौ मृदङ्गादौ वीणातन्त्र्यादौ च प्रतिष्ठितः, सर्वैते शब्दाः ध्वनिपराः। स च हि वर्णात्मकः शब्दः, येन तु मानवप्रवचनं स्यात्। एवं क्रमेण हि शब्दद्वयं बोध्यम्। ताभ्यां परोऽयमयं शब्दः मूकत्वपर इति विज्ञेयम्। अस्यैव मौनत्वेनापि प्रवचनम्। सोऽपि व्याकरणविधिस्थ एव।

दृश्यतामित्थम्—आकाशस्तु सर्वत्र विद्यते, आकाशमन्तरा न केषाञ्चिदपि स्थितिर्भवति, तत्र विद्यमानतया शब्दस्यापि विद्यमानता मन्तव्या भवति, तत्प्रकाशस्तु केवलं न भवतीति । तत्र प्रज्ञापनविधेरभावान्न तत्र शब्दप्रयोगः । प्रज्ञापनविधेरभावोऽपि केन चित्कारणेन भवति, तत्र तस्यानावश्यकत्वादन्यप्रयोजनसत्वाच्च । तत्प्रयोजनावधारणमेव व्याकरणम् । तेन तत्र शब्दप्रकाशिका शक्तिरपि नोपस्थीयते । तदेव मूकत्वं नाम मौनञ्च व्यवस्थितम् । तस्माद्भाषायाः भाषान्तरत्वमप्येवं बोध्यम् ।

एवमेतत्प्रयोगेऽपि परिवर्तननियमात्सप्त भाषाः संप्रसिद्धा भवन्ति । एवं वैदिकानां लौकिकानां ध्वनेश्च, यथायोगं परिवर्तननियमेन सप्त भवन्ति भाषाः । इत्थं हि तासां संज्ञा भवन्ति—प्रथमा भाषा च महानिर्वाणपरा सांप्रतिका, द्वितीया परनिर्वाणपरा चाक्षुषी, तृतीया च निर्वाणपरा सांवर्तिका, चतुर्थी च तुर्या परापरा, पञ्चमी च सुषुप्तिपरा पश्यन्ती, षष्ठी च स्वप्नपरा मध्यमा, सप्तमी च जाग्रत्परा वैखरी चेति । एवं प्रत्येकमपि तासां सप्त सप्त क्रमाः । तिस्रोऽवस्थास्तु निर्वाणादयः, ब्राह्मणानां योगिनां संबोध्यमानाः, तासां ब्राह्मणादयो ज्ञातारो भवन्ति । एवं च चतस्रोऽवस्थाश्च संप्रसिद्धा भवन्ति, जाग्रात्स्वप्नसुषुप्तितुरीयाश्चेति । तत्रैता भाषा नियताः, वैखरी मध्यमा पश्यन्ती परा चेति । उच्चारणकाले कार्यमपि तादृशम्, नियमेन च सप्तक्रमेण यथायोग्यं शरीरे भवति, पश्चात्प्रथमद्वितीय-



तृतीयक्रमेण च सप्तम्यां वैखर्यां प्राप्नोति, तदेव चोच्चारणं भवति, इत्यादि सर्वं व्याकरणेन बोध्यम् ।

अन्तरा च भाषामेतामन्या भाषाप्येतद्विरुद्धा संवर्तते । सा च देशभाषा भवति । एवं संसारभाषा सार्वत्रिकी संस्कृता भवति । ततो भिन्ना जगद्भाषा विश्वभाषा लोकभाषा ब्रह्माण्डभाषा च प्रसिद्धा भवति । तस्मात्परस्मिन्नपि ब्रह्माण्डेऽप्यनेकदेशा भवन्ति । तेषामपि प्रत्येकं भाषाः भवन्ति । यथा यथा च यत्र यत्रावश्यकता, तथा तथा तादृशनियमेन प्रज्ञापनार्थं सत्वाद्यनुरोधेन भाषापि प्रयोक्तव्या भवति । अत एव—

“ सार्वत्रिकी परा भाषा संस्कृता सर्वसंस्थिता ।
महाविष्णुप्रभावेन संसारार्थैकवाचिका ॥
तत्राप्येवं विधानेन सा ज्ञानेच्छा क्रिया वृता ।
संप्रसिद्धा भवेद्भाषा सर्वावश्यकवाचिका ॥
एवं तत्र च भेदेन भाषाश्चानेकवाचिकाः ।
लोकभाषा जगद्भाषा विश्वभाषा तथा परा ॥
ततो ब्रह्माण्डभाषा स्याद्देशभाषा प्रतिष्ठिता ।
यादृशावश्यकं यत्र शब्दतत्वानुरोधतः ॥
तादृशी जायते भाषा चेच्छाप्रज्ञापनात्मिका ।”

इत्यादि प्रवचनम् । तस्मादेवमभिधानेन भाषायाश्चानेके भेदा भवन्ति । इच्छाप्रज्ञापनेन हि तासामैक्यं यथायथं बोध्यम् । तस्मा-

त्सर्वेषां शब्दानां भाषाव्यवहारो यत्रास्ति, तदेव व्याकरणमिति व्याख्यानफलं बोध्यम् । अत एव—

"यावच्च विद्यते भाषा संसारेषु क्रियापरा ।
तावद्व्याकरणं चास्ति तत्प्रबोधानुभावतः ॥
भाषानुसारी नियमो भवेद्व्याकरणाभिधः ।
सर्वभाषापरं तत्वं बोध्यं व्याकरणेन च ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वभाषाप्रबोधाय सार्वत्रिकं व्याकरणमध्येयमित्युपदेशः ।

यथा च गव्यूत्येकया तत्वानां भेदः, तथा भाषायामपि भेद इति निश्चयः । समाल्पाधिक्यनियमेन वाक्यादौ च भेदः । गव्यूतिश्चैकस्य वर्गस्य बाह्ये, एवमेव भाषायामपि भेद इति सिद्धान्तः । एकयैव गव्यूत्या सर्वतत्वानां सर्वभाषाणाञ्च भेद इति फलितोऽर्थः ।

एवं तत्वाद्यनुरोधेन हि सृष्टिः सर्वापि भवति । यो निनियमोऽपि चैवं तत्वपर एव । एवं विधानानां तत्वानामेतादृशी योनिरिति हि विज्ञेयम् । एवमेतत्तत्वविशिष्टानां तत्तत्वानुरोधेन न चायं देशो भवतीत्याद्यपि सर्वं नियतमेव । तेन प्रतियोनिपृथक्पृथग्भाषा च नियता भवति । अत एव प्रेतभाषा, पिशाचभाषा गन्धर्वभाषा यक्षभाषा लवणभाषा चेत्याद्यनेकभाषाश्चानेक-



संज्ञया भवन्ति । एतच्च सर्वं पुनरेतदावश्यकं भवति । तत्कारणञ्च व्याकरणमिति स्पष्टमुक्तं भवति । अत एव—

"अनेकभेदयुक्ता च भाषा बोध्या परात्मिका ।
शब्दशास्त्रे हि तत्वानां व्याख्यानं परिदृश्यते ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वभाषायास्तत्वं व्याकरणे व्यवस्थितं भवति ।

एवंभूतं व्याकरणं तु शिवप्रणीतं भवति । तच्च वर्णार्णवाभिधं सार्वत्रिकं सर्वपरं सूत्ररूपं चतुष्षष्टिलक्षग्रन्थात्मकं निर्दिष्टम् । तच्च सर्वसमानं सर्वाश्रयणहेतु चाभिवर्तते । तत्प्रबोधाय तु शिवक्रमनियन्तृभिः कृतान्यनेकानि भाष्याणि सन्ति, यैश्च यथायथं परिज्ञानं सर्वभाषाणां तत्तत्वानाञ्च भवति । एवमतः परं समाहारनिष्ठं महावेदाद्यनुभूतं महाविष्णोश्च व्याकरणं चतुष्षष्टिकोटिसमन्वितं भवति । तस्याप्यनेकानि भाष्याणि समन्वितानि सन्ति । सर्वमेतच्छब्दमात्रप्रबोधार्थं व्यवस्थितं भवतीति बोध्यम् । अत एव—

"सर्वभाषाप्रबोधाय सिद्धान्तज्ञापनाय च ।
सर्वं व्याकरणं नित्यमध्येयं प्रणवार्णवम् ॥
महाविष्णुप्रणीतञ्च तच्च व्याकरणं परम् ।
ज्ञात्वा सर्गं यथायोग्यं कुरु संसारकल्पनाम् ॥"

इत्यादि प्रवचनम् । तस्मादेवंविधानेन सर्वं तं चार्थं सर्वानुभूतं व्याकरणादवधेयं भवति । अत एव—

शब्दशास्त्रमनन्तं स्याच्छब्दश्च ब्रह्मसंज्ञकः ।
अतीतः प्रणवोऽनन्तश्चाक्षरः सर्वमूलकः ॥
अधीत्यैनं यथायोग्यं प्राप्नोति परमां गतिम् ।"

इत्यादि प्रवचनम् । एवमभिधानेन सर्वभाषायाः संविधानमिति बोध्यम् ।

द्रष्टव्यमिदम्—एतत्संसारावधारणस्य च, सर्वस्वभूतो वेदश्च, उपनिषद्ब्राह्मणोपवेदशुक्लकृष्णशाखासमन्वितो मूलमिति । अवधारणं तु सर्वथा चाल्पाक्षरेण भवत्येव । तस्मादेतस्यैव मुख्यत्वम्, सर्वथोक्तं भवति । अन्यथा त्वेतद्व्याख्यानमनन्तमनन्वयं ब्रह्मसंज्ञकं वेदितव्यं भवेत् । अथवा चास्य व्याकरणमपि तादृशं तच्छब्दवाचकमिति बोध्यम् । एतद्व्याकरणमपि शिवप्रणीतं व्याकरणार्णवम् । स एवार्णवो भवति, यस्मिंश्च सर्वसारस्य चोपाख्यानं भवति । वेदानां सर्वार्थावधारणतया, तद्व्याकरणमपि सर्वशब्दावधारणपरमिति विज्ञेयम् । शिवस्य चेच्छापरत्वात्, इच्छाया एव प्रज्ञापनं भवतीति बोध्यम् । यो यस्य कार्यस्य नियन्ता भवति, स एव तदनुरोधादत्र नियामको भवतीति हि तद्भावः । शिवस्तावदिच्छानिष्ठः । तस्मादिच्छाप्रज्ञापनं हि शिवकार्यं भवति । अतस्तेनैव व्याकरणं निर्मितमिति बोध्यम् । तस्माद्वेदव्याकरणं



माहेश्वरं वेदकालिकं भवति । यस्मिन्काले प्रभवन्ति वेदाः, तस्मिन्काल एव तदर्थबोधनाय व्याकरणमप्युपस्थितं भवति । शिवस्यैवं हि परिभावना भवति । एतदवधारणं तु, सर्वानुगतम्, सर्वेषां हि तदेतत्प्रयोजनम् । एतज्ज्ञानं विना संसारनिर्माणशक्तिर्न संभवति । विना च संसारनिर्माणं ब्रह्मणोऽनन्तत्वं न सिध्यति । तदनन्तत्वसिद्धये चावधारणप्रबोधावश्यकता भवति । तत्प्रबोधनाय व्याकरणमपि तादृशो लौकिकवैदिकादिव्यवहारस्त्रितयक्रमश्च व्यवस्थितः । अत एव—

" अकारोकारमकारपरं तद्वाक्यसंस्थितम् ।
वेदव्याकरणं प्रोक्तं शिवेन परिवेष्टितम् ॥
लौकिका वैदिकाः शब्दास्तत्र सम्यक्प्रयोजिताः ।
भाषातत्वञ्च तत्रैवं प्रोक्तमोङ्कारनिष्ठितम् ॥"

इत्यादि प्रवचनम् । तस्माद्वेदव्याकरणं माहेश्वरं सर्वपरायणपरं लौकिकवैदिकध्वनिशब्दस्थं प्रसिद्धं भवति ।

तत्राप्यकारादिक्रमेण त्रितयाख्यानमस्ति । प्रथमतस्त्वेवं वर्णानां व्याख्या भवति, अकारेकारोकारऋकारऌकाराः, एकारैकारोकारौकाराश्च स्वराः, इति । एतेषां स्वराणां क्रमाख्यानमावश्यकं भवति । क्रमेण चानेन परिवर्तनादिव्यवहारश्च यथायथमाख्यातो भवति, अ. इ. उण्. ऋऌक्. एओङ्. ऐऔच्. इत्यादि प्रवचनात् । अत्र च अकारप्रथमः

आत्मनिष्ठः, अहमः स्वरूपः । स च स्वयं सर्वातीतः, सार्वत्रिकः, परमश्च भवति । एवं परमापरमसार्वत्रिकासार्वत्रिकाभ्यां परो ह्यतीतश्च स भवति । ततः परोयमुकारो भवति चैतन्निष्ठः । अकारोकारयोर्योगश्च संसारः, स चाहमेतदिति सम्यक्प्रयोगरूपः । तत्राहं चाकारः, उकारश्चैतत् । तयोरावश्यकतया मध्यवर्ती च इकारः शक्तिवाचको भवति । अकारोकारयोर्मध्ये तदावश्यकतानिरूपकत्वेन तदीकारस्तिष्ठति । तस्माद्वर्णसमाम्नाये चैवं क्रमो विज्ञेयः—अ. इ. उ. ऋ. ऌ. इति प्रसिद्धः । तत्र ऋ. ऌ. वर्णयोस्तावत्परिस्फुटत्वेन ध्वनेरनुकरणत्वेन च प्रवचनम् । अन्यथा त्वेतद्व्याख्यानं व्यञ्जनपरं प्रसिद्धं भवेत् । रलयोरिव ऋ. ऌ. इत्युच्चारणं भवति । बोधस्त्वेषः पञ्चवार्षिकबालस्यैव भवति । अत्र प्रथममकारोच्चारणम्, ततश्च इकारः, तत उकारो भवति । अथवा अकारोकारौ, पश्चादिकारश्चेति भवति । एतत्त्रितयस्यैक्यं सर्वथा वेदितव्यं भवति । तस्मादकारेकारोकार इति क्रमः । अकारोकारयोर्योगकारिणी इकारवाच्या ह्यावश्यकताशक्तिः भवति । अन्ये सर्वे स्वराश्चैतत्त्रितयसंभाव्यमाना ह्यकारेकारप्रवर्तनेनैव भवन्ति । तस्मादकारेकाराभ्यामेकारः, अकारोकाराभ्यामोकारः अकारैकाराभ्यामैकारः, अकारौकाराभ्यामौकारश्च भवति । एवं क्रमेण हि तत्र ह्रस्वदीर्घप्लुतभेदाः संभवन्ति । तत्र ह्रस्वस्तावदात्मपरः, दीर्घश्च क्रियापरः, प्लुतस्तु निषेधपरश्च भवति । अत एव—



"अकारेकारोकाराश्च त्रयस्ते ब्रह्मसंज्ञकाः ।
अकारस्थमहं विद्धि तदेतच्च ह्युकारगम् ॥
मकारस्तु निषेधस्थस्तदोमेकाक्षरस्तथा ।
द्वयोरावश्यकी शक्तिरिकारे चैव तिष्ठति ॥
एतैर्वर्णैस्त्रिभिश्चैव स्वराः सर्वे भवन्ति च ।
तत्र चैवं त्रिधा भेदो यथायोग्यं व्यवस्थितः ॥
ह्रस्वदीर्घप्लुताश्चैव तेषामावश्यका मताः ।
चेष्टन्ते च त्रयः सर्वं ब्रह्म संभाव्यते च तैः ॥
ह्रस्वः स्याज्ज्ञाननिष्ठश्च दीर्घं चैव क्रियापरम् ।
प्लुतस्तत्त्वपरः सर्वं निषिद्धं त्रितयात्मकम् ॥"

इत्यादि प्रवचनम् । तस्माद्ध्रस्वो दीर्घः प्लुतश्च सर्वं तादृशं ब्रह्मतत्वं बोध्यम् । तेषां प्रत्येकमपि त्रयश्चोदात्तानुदात्तस्वरिता भवन्ति, तेषामप्यावश्यकमनुनासिकत्वञ्च । एवं तत्रापि त्रितयत्वमिति क्रमेण तादृशमनुनासिकमनन्तं भवति । पुनस्तत्रापि तादृशक्रमेणानन्तत्वं विज्ञेयम् । अत एव "अनन्ताश्च स्वरास्सर्वे सर्वातीताः सनातनाः" इत्यादि प्रवचनम् । तदेवं क्रमेण सर्वे वर्णाः प्रभवन्ति । तस्मादेव स्वरवर्णाद्व्यञ्जनवर्णाः सञ्जायन्ते । व्यज्यतेऽन्यैः नामस्वरैस्तद्व्यञ्जनमिति भावः । ते च हयवरट्, लण्, ञ. म. ङ. ण. नम्, झ. भ. ञ्, घ. ढ. ध. ष्, ज. ब. ग. ड. दश्, ख फ. छ. ठ. थ. च. ट. तव्, क प. य्, शषसर्, इति भवन्ति । सर्वे

चैते स्वरजा भवन्ति । न पुनरेकं स्वरं विना व्यञ्जनोच्चारणं संभवति । अत्रापि तदभिधानं बोध्यम् । यद्यपि चात्र ह्रस्वदीर्घप्लुता न भवन्ति, तथोदात्तानुदात्तस्वरिताश्च; तथापि तदनुरोधेन प्रवचनम् । तथा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदाश्च भवन्ति । तत्र क. ख. ग. घ. ङाः, च. छ. ज. झ. ञाः, ट. ठ. ड. ढ. णाः, त. थ. द. ध. नाः, प. फ. ब. भ माश्च स्पृष्टप्रयतनाः तत्रापि त्रयो भेदाः, स्पृष्टविवारः स्पृष्टो नादः स्पृष्टो घोषश्चेति संभवन्ति । एवं यरलवानामीषत्स्पृष्टत्वम् । तत्रापि त्रयो भेदाश्च संभवन्ति, श्वासोऽघोषोऽल्पप्राणाश्चेति । एवं शषसहानां विवृतत्वेन प्रवचनम् । तत्रापि त्रयो भेदाः संभवन्ति, महाप्राणो महाश्वासो महानादश्चेति । एवं क्रमेण तेषं प्रत्येकमनेके भेदा भवन्ति ।

पुनरेतेषां समायोगोऽपि भवति । तत्समायोगानुष्ठानेनैव कवर्गादिक्रमः । वर्णसमाम्नाये तूत्पत्तिक्रमः । यो यस्मादुत्पद्यते, स तत्परं प्रतिष्ठतीति वर्णसमम्नायस्थः क्रमश्च भवति । वर्गादौ तु समायोगेन निर्धारणमिति विवेक्तव्यम् । तदित्थं हि किल दृश्यते—कण्ठस्थानिनां स्पृष्टप्रयत्नवताञ्च विवारपराणाम्, कवर्गत्वेन प्रवचनम् । एवं तालुस्थानिनां संस्पृष्टानां संवारपराणां नादवताञ्च चवर्गत्वेन प्रवचनम् । एवं मूर्धास्थानिनां स्पृष्टानां घोषवताञ्च टवर्गत्वेन प्रवचनम् । एवं दन्तस्थानिनां स्पृष्टानां नादवतां विवारवताञ्च तवर्गत्वेन प्रवचनम् । एवमोष्ठस्थानिनां घोषवतां संवारपराणां



पवर्गत्वेन प्रवचनम् । प्रत्येकमपि तेषां क्रमकारणं तादृशमुत्पत्तिपरं बोध्यम् । तस्मात्सर्वोप्ययं क्रमश्चैवं यथायथमाख्यातो वेदितव्यो भवति । एवं यरलवाश्च, इकारोकारऋकारऌकारक्रमेण जाता भवन्ति । एवं शषसहा अपि भवन्ति । विसर्गस्य जायमानत्वात्, तस्य चाकारस्थानिकत्वाच्च सोऽपि तादृश एवेति बोध्यम् । एतेषां परिवर्तनविवर्तनमेव सर्वशब्दसंसारः । अत एव—

“ शब्दान्तरेऽपि शब्दः स्याद्वर्णो वर्णान्तरे भवेत् ।
वर्णानां सप्रयोगेण शब्दसंभावना भवेत् ॥
सर्वे शब्दाः प्रजायन्ते वर्णेनैकक्रमेण च ।
अकारस्यान्तरे नित्यमकारादिर्विभासते ॥
एवं हि व्यञ्जनैर्बोध्यं सर्वत्रैवं परावरम् ।
अक्षराज्जायते शब्दः सर्वे शब्दाः समा मताः ॥
कालेन तेषां संबन्धः सर्वं प्रणवसंस्थितम् । ”

इत्यादि प्रवचनम् । एवमेव—

“ वर्णव्यक्तिरनन्ता स्यान्नैव गण्या च सा मता ।
ह्रस्वो दीर्घः प्लुतश्चैव मुख्यो भेदः स्वरस्य च ॥
उदात्तो ह्यनुदात्तश्च तथा स्वरितनासिके ।
भेदाश्चैते स्वरस्थाः स्युः परिवर्तनया पुनः ॥
व्यञ्जनेऽप्येवमेवास्ति क्रमश्चैव यथायथम् ।
स्पृष्टेषत्स्पृष्टविवृताः संवृतश्च तथापरः ॥

प्रत्येकमेषां त्रिविधो भेदः स्याद्ब्रह्मभावतः ।
संवारश्च विवारश्च महासंवार एव च ॥
महाविवारः श्वासश्च महाश्वासस्तथाऽपरः ।
महाघोषोऽल्पघोषश्च घोषोऽघोषो विधीयते ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वेषां शब्दानां तादृशोऽनन्तो ह्यतीतो व्यवहारश्च बोध्यो भवतीति विज्ञेयम् । तथा चैवं सर्वे वर्णाः प्रभासन्ते, तेन च सर्वे शब्दाश्च जायन्त इति बोध्यम् । अत एवाम्नायसमाम्नायशब्दौ वेदे प्रसिद्धौ भवतः, इत्याद्युक्तिः । आम्नायशब्दश्चासंयुक्तपरः, समाम्नायशब्दश्च संयुक्तपर इति विज्ञेयम् । अत एव—

"आम्नायश्च समाम्नायो बोध्यो व्याकरणेन हि ।
बुध्वा चैवं यथायोगं ब्रह्म तच्च व्यवस्थितम् ॥
अकारोकारमकारसंस्थितं ब्रह्मसंयुतम् ।"

इत्यादि प्रवचनम् । तस्मादेवं विधानेन स्वरव्यञ्जनानि च भासन्ते । अत्र च अचां सन्धिः, हलां सन्धिः, विसर्गस्य सन्धिः इति भवति । विसर्गाणाञ्च यथावस्था भवति, तथा तत्सन्धौ व्याख्या भवति । एवमचाञ्च तत्प्रसङ्गे भवति । एवं हलां च हल्प्रसङ्गे भवति परिवर्तनं समायोगश्चेति विज्ञेयम् । वर्णानाञ्चैतेषां सार्वत्रिकत्वम्, ओङ्कारस्य च महत्वञ्च सर्वाश्रयत्वेन बोध्यम् । एवं सन्धिः प्रकृतिश्च भवति । यदा यस्य चावश्यकेन समायोगः, तदा तस्य सन्धिः । यदा



यस्यावश्यकेन समायोगो न भवति, तदा तस्य प्रकृतिभाव इति विज्ञेयम् । एवं क्रमेण सर्वलक्षणसंपन्नश्च ब्रह्मभावं प्राप्नोतीति विज्ञेयम् । एवमनेन व्याकरणेन तु वेदविहितानां शब्दानां यथावच्च लाभो भवति । अत एव वेदाध्ययनस्य समौचित्यं प्राशस्त्यञ्च भवति ।

एवमेव च प्रातिपदिकादिसंज्ञाविधिश्च भवति । प्रातिपदिकं चात्मा, धातुश्चानात्मा, इच्छा च कारकम्, समाहारश्च समास इति विज्ञेयं भवति । समसनं चैकरूपेण व्यवस्थितिः समासः, स चानेकेषां पदानामेकत्वेन योजनमेव भवति । करोति कर्तृत्वशीलमस्तीति वा कारकमित्याद्यर्थो विज्ञेयः । अत एव—

"तिङन्ता धातवः सर्वे क्रियासंसारसंज्ञकाः ।
सुबन्ता ज्ञाननिष्ठाः स्युरिच्छानिष्ठं तु कारकम् ॥
समाहारः समासोऽयं व्याकृतिः शब्दसंस्थिता ।"

इत्यादि प्रवचनम् । तस्मात्प्रातिपदिकश्चायमात्मा, धातुः संसारः, तत्क्रियेच्छा च कारकम्, समाहारश्च समास इति विज्ञेयम् । एवं विधानेन हि सर्वं बोध्यं भवति । प्रतीयते विधीयत इति प्रत्ययः, विधानं चेच्छया भवतीति नियमात् । इच्छायामेवान्तरतमप्रत्ययानां सम्यग्विधानं भवति । प्रातिपदिके तु भेदसंभावना न भवति । अतश्चात्रात्मा वाच्यो भवति । धातूनामेव हि बहवो भेदाः संभवन्ति । अतश्च दश लकारस्थाः क्रियाः प्रसिद्धा भवन्ति । क्रियाजनकत्वेन हि कारकत्वमित्यतः त्रयश्चेमे भेदाः प्रसिद्धाः

संभवन्ति । तस्मात्तथाभिधानेन तादृशं सर्वं व्याकरणं प्रणवपरं बोध्यम् ।

एवं प्रातिपदिकानामपि प्रत्येकं त्रैविध्यम् । यथा— धात्वंशे प्रथमपुरुषमध्यमपुरुषोत्तमपुरुषाश्चेति । तत्र सर्वश्चास्ति प्रथमपुरुषः, एवं मध्यमोत्तमयोरपि बोध्यम् । स्वस्वदृष्ट्या चैवं भवति । एकत्वविवाक्षायां तु उत्तमपुरुष एव प्रवरः । एवमेव प्रातिपदिकेऽपि, प्रातिपदिकं नाम सर्वनाम चेति भेदास्त्रयो बोध्याः । तत्र प्रातिपदिकञ्च सार्वत्रिकम्, नाम च रूढिपरं साङ्केतिकम्, सर्वनाम च सर्वाश्रयभूतमिति विज्ञेयम् । एवं कारकेऽपि कर्ता कर्म करणमिति त्रयः संभवन्ति भेदाः । एवं समासेऽपि अव्ययीभावो द्वंद्वः तत्पुरुषश्चेति त्रयो भेदाः । एवं शब्दानां प्रत्येकमपि लिङ्गादिनियमः, पुल्लिंगोऽयं स्त्रीलिङ्गोऽयं क्लीबलिङ्गोऽयमिति । तत्कारणञ्च तादृशं तृतयावश्यकत्वमेव । अस्मिंश्च प्रातिपदिके, धातौ, कारके च स्वरहलां संप्रयोगो भवति । स्वरान्तानां चैकत्राख्यानं भवति । तथा हलन्तानां चैकत्राख्यानम् । अतः समाहृताश्च सर्वे शब्दाः संभवन्ति । तस्मात्तादृशं सर्वान्तर्गतं सर्वनिष्ठं प्रातिपदिकादिसंयुक्तं व्याकरणं आत्मादिव्यवहारपरं बोध्यम् । अत एव—

“ त्रिविधं प्रातिपदिकं तथा धातुश्च कारकम् ।
समासश्च ततः सर्वं त्रिविधं परिकीर्तितम् ॥



अनवस्था विद्यतेऽत्र सर्वं सर्वान्तरे भवेत् ।
सर्वान्तस्थं सर्वमेव शब्दे सर्वं प्रतिष्ठितम् ॥

इत्थं भूतमनन्तं स्यात्तथा ह्याद्यन्तवर्जितम् ।
वेदैश्च विहिताः शब्दा व्याख्याताः शंभुना स्वयम् ॥

प्राकृताः संस्कृता ये च यथावश्यकसंस्थिताः ।
वैदिका लौकिकाश्चैवं व्याख्याताः प्रणवाभिधाः ॥

ओमित्यन्तर्गतं सर्वं ब्रह्मकार्यप्रवर्तकम् ।
सर्वमेवं यथायोग्यं व्याख्यातं चानवस्थितम् ॥ ”

इत्यादि प्रवचनम् । तदेवङ्क्रमेण सर्वं भवतीति शब्दसृष्टिः ।

अत एव पदबोधः पदार्थबोधो वाक्यबोधो वाक्यार्थबोधश्चेति चत्वारः सुप्रसिद्धा भवन्ति । तत्र पदबोधो ज्ञाननिष्ठः, पदार्थबोधः क्रियानिष्ठः, वाक्यबोधश्चेच्छानिष्ठः, वाक्यार्थबोधः समाहारनिष्ठश्चेति शब्दक्रमः । एतत्प्राधान्यबोधनाय चेदं प्रसिद्धं भवति । अन्यथा शाब्दबोधादेः भिन्नमतीतं ब्रह्मेति विज्ञेयम् । अत एव—

न भाषापरं शब्दसिद्धञ्च तत्वं
न वाणी परा ज्ञानगातीतगम्या ।
अनन्तं ह्यनन्तं परं चाव्ययस्थं
समः सर्वशब्दैः समोऽयं समोऽयम् ॥

न वै धातुसिद्धस्तिङन्तो न चात्मा
न वै कारकेणोपसिद्धोऽयमात्मा ।
न वै तत्समासानुषिद्धोऽयमात्मा
न वा सर्वतत्वं सुबन्तोऽयमात्मा ॥

समोऽयं समोऽयं समोऽयं हि शब्दः
समोऽयं समः सर्वसिद्धोऽयमात्मा ।
न वा सर्वनामा क्रियागोचरोऽयं
न चैवाव्ययो ब्रह्मनिष्ठः प्रधानः ॥

सदा सर्वदा भिन्न आनन्दरूपः
समोऽयं समोऽयं समोऽयं समोऽयम् ।"

इत्यादि प्रवचनम् । तस्मादेवमभिधानेन ब्रह्मप्रभावविज्ञानसाधनं शब्दशास्त्रमध्येयं भवति । व्याकरणेनैव शाब्दबोधादयो भवन्तीति च विज्ञेयम् ।

एवं हि किल व्याकरणाध्ययनप्रयोजनं भवति— शब्दस्यास्यायं धातुः, इदञ्च प्रातिपदिकम् , अयञ्च वर्णनियमः, क्रमश्चात्रायं भवति, अस्य चायमर्थः, एषा हि तत्स्थितिः, तत्प्रकारश्चायम् , इदञ्चैतच्छब्दस्वरूपम् , अयञ्चात्र विधिः, इति । किञ्च अयञ्च शब्दश्चात्मवाचकः, अयमनात्मवाचकः, अयञ्च निषेधवाचकः, अनेन चायं संबन्धः, इत्यादि सर्वं व्याकरणवेद्यं भवति । तस्माद्वेदस्य मुख्यमङ्गं व्याकरणं भवति । अर्थावबोधः, तत्कार-



णञ्च तदनुरोधेन सर्वं व्याकरणेनैव विज्ञेयम् । अत एव, मुख्यमङ्गं व्याकरणं वेदस्य सर्वसंस्थितं प्रणवपरं वेदितव्यम् , इत्याद्युक्तिः । तस्माच्च यथावच्छब्दप्रमाणं विज्ञानहेतुःव्याकरणमिति सिद्धान्तः । अत एव—

"मुख्यशास्त्रमिदं शास्त्रं वेदविद्याप्रसाधकम् ।
सर्वं व्याकरणं सच्च सर्वशब्दार्थवाचकम् ॥

ओमित्यन्तर्गतं वेद्यं मुख्याङ्गं लक्षणाश्रयम् ।"

इत्यादि प्रवचनम् । तस्मात्तदिदं व्याकरणं सर्वार्थवाचकं वेदार्थविज्ञानसाधनं भवतीति विज्ञेयम् । अत एव "व्याकरणं समधीत्य वेदा ह्यध्येयाः, इत्याद्युपदेशः । अन्तरा च व्याकरणं शब्दविज्ञानं न संभवति, शब्दज्ञानमन्तरा वेदाध्ययनञ्च निरर्थं भवतीति विज्ञेयम् । सति च वेदस्वरादिलोपे दोषश्चोक्तो भवति । अत एव "यथारूपं यथागुणं यथावर्णं यथास्वरं यथार्थभूतं यथार्थञ्च वेदा ह्यध्येया भवन्ति "इत्याद्युपदेशः । ततः सर्वसिद्धये सर्वशब्दार्थतत्वविज्ञानाय च स्वकर्मचिकीर्षयै च सह व्याकरणेन वेदा ह्यध्येया भवन्ति । व्याकरणञ्चैतच्छास्त्रं यथायथं सर्वाङ्गमुख्यं भवति । तदिदं महत्वं व्याकरणस्य, यच्च सर्वव्यवहारविज्ञानसाधनं भवति । तस्माद्व्याकरणस्य मुख्याङ्गत्वं वेदसम्मितत्वमत्यन्तावश्यकत्वञ्च सिद्धमिति, व्याकरणसिद्धान्तो विज्ञेयः ।

ततः परं शिक्षाख्यमङ्गं प्रशस्तं भवति। यद्यपि " शिक्षाकल्पो व्याकरणम् " इत्युक्त्या शिक्षायाः प्राथम्यं संसूचितं भवति, तथापि तथा कथनं केवलं व्यवहारार्थपरं बोध्यम्। शिक्षा तु कुत्रचित्प्रवृत्ति-करणमेवेति बीजात्तस्याः पूर्वत्वमुक्तम्। मुख्यदृष्ट्या तु व्याकरण-स्यैव प्राथम्यं सर्वत्राख्यातं भवति। शिक्षायाः प्रयोजनञ्च भाषा-सन्निधान एव भवतीति विज्ञेयम्। यावच्च सर्वस्य लोकव्यवहारस्य शिक्षा न भवति, तावच्च तत्र प्रज्ञापनावश्यकत्वमपि नास्तीति हि तद्भावः। तस्माज्ज्ञानस्य प्रथमकारणं शिक्षेति बोध्यम्। शिक्षा-मन्तरा हि भाषाया विधानस्यानुपस्थितिरेव। तस्माच्छिक्षासहितञ्च व्याकरणमध्येयमित्युपदेशः। अत एव—

" व्यवहारस्य बोधार्थं शिक्षा ध्येया ह्यनुत्तमा।
शिक्षां प्राप्य च सर्वस्वं तत्त्वं विन्दति मानव; ॥
सर्वस्मिन्विषये शिक्षा शिक्षा सर्वत्र तिष्ठति।
शिक्षया नियतं सर्वं शिक्षा धर्मपरायणी ॥ "

इत्यादि प्रवचनम्। तस्माच्छिक्षाशास्त्राध्ययनमावश्यकं भवति, यया वेदस्य पूर्णत्वव्यवहारो भवेत्। शिक्ष्यते पदार्थजातं तदावश्य-कत्वञ्चानयेति शिक्षा भवति। अस्याश्चावश्यकता च सर्वत्रास्ति, सर्वावश्यकता चात्रास्तीति हि परस्परनियमः। सर्वस्याश्च भाषायाः तदन्तर्गतायाश्च वा भाषायाः, शिक्षा यथायोग्यं यथाप्रकरणञ्चान-वस्थानियमेन वक्तुमुचिता भवति।



शिक्षाशास्त्रे ह्यस्मिंश्च—सर्वेषां वर्णानां प्राकृतोत्पत्तिः, तदु-त्पत्तिकारणम्, तदावश्यकत्वञ्चेत्यादि सर्वं यथायथमाख्यातं भवति। तदेवमेव भवति—येन येन प्रकारेण सर्वत्र वर्णाः प्रजायन्ते, ते च सर्वेऽप्याख्याताः। किञ्चास्मिन्देहे यस्माद्वर्ण-व्यवहारप्रदर्शनम्, तस्य स्वरूपमभिहितम्। तथा यस्य यस्य च वर्णस्य यद्यत्स्थानम्, यश्च वा प्रयत्नः, तच्च सर्वमप्याख्यातं भवति। एवं स्थानप्रयत्नाभ्यां सर्वेषां वर्णानामभिधानम्, तत्स्थानप्रयत्ननियमः, तत्कारणञ्चाख्यातम्। पुनश्चैवं ह्यस्य वर्णस्य त्वस्मात्स्थानादुत्पत्तिः, तदुच्चारणस्वरूपम्, तत्तद्वर्णनिय-ताश्च सर्वेऽपि प्रयत्नाः, इत्यादि सर्वं साङ्गमाख्यातं भवति।

शरीरेऽस्मिंश्च नाभिदेशे हि भवति कमलद्वयम्। तत्रैकञ्च वाम-भागस्थम्, द्वितीयं भवति दक्षिणभागस्थम्। तत्रैव हि तादृशः वाय्वग्न्याकाशादिसंयोगश्च यथाकार्यमभिजायते। यस्य च यथाभिप्रायो भवति, तथा तस्य कार्यं कर्म भवति। तदेवं-भूतं कर्म च, ताञ्च नाडीं समाविशच्च सदुरःप्रदेशं प्राप्नोति। तत्र तच्च नादो भूत्वा कण्ठादिस्थानं गच्छच्च वर्णस्वरूपं शब्द-स्वरूपञ्चोपलभते। तत्र चैतादृशो हि विधिः समवगन्तव्यो भवति—शब्दस्त्वाकाशगुणः, वायुद्वारेण हि तस्याभिव्यक्ति-र्भवतीति। अकाशतत्वस्य हि पूर्णः प्रयोगश्चास्मिन्नाभिदेशे कमल-द्वये भवति। तत्र वायोरपि तादृशः प्रयोगश्च वर्तते, येन तत्र

यथावच्च प्रयत्नो भवति। यदा च पुनर्विवक्षा संभवति, तदा तद्विवक्षया तदिच्छाविषयप्रकाशकशब्दानामुच्चारणं भवति। अत्रायं भावः— विवक्षानुसारेण च तत्र प्रयत्नो भवति, वायुना चाकाशे प्रेरणा भवति, तया च तस्मिन्नाकाशे ह्युन्नादध्वनिरुत्थापिता भवति, तदुत्थाने सति चाभिप्रायानुरोधो भवति, तस्मिंश्च नाभेरूर्ध्वगतां सर्पिणीनाडीं प्राप्ते सति पूर्णाभिप्रायस्य तत्र प्रवेशो भवति, तदभिप्रायं प्राप्यैव चोरःप्रदेशे स पूर्णशब्दतां प्राप्नोति, पुनः कण्ठादिस्थानं प्राप्य तच्छब्दप्रकाशो भवतीति। केषाञ्चिद्वर्णानां वामभागेनोच्चारणम्, केषाञ्चिद्दक्षिणभागेनोच्चारणम्, केषाञ्चिद्वायोर्मध्यमेन भागेनोच्चारणम्, इति हि प्रसिद्धं भवति। प्रायिकञ्चैतद्विधानम्। स्वराणां दक्षिणकमलेनोच्चारणम्, व्यञ्जनानां वामकमलेनोच्चारणम्, पुनश्च तयोर्द्वयोरुरःप्रदेशे हि चैकस्थत्वम्, ततः प्रकाशः, इति हि विधिः। केषाञ्चित्तु मध्यभागेनोच्चारणम्। तत्र च स्वराणां व्यञ्जनानाञ्च यथावदभेद एव भवति, कमलद्वयस्य नियतैकदेशत्वात्, अतिसामीप्याच्च। यदा चैतादृशं देहनिर्माणं कमलद्वयसामीप्यञ्च, तदा च मध्यभागेन ह्युच्चारणं बोध्यम्। तदुच्चारणेनैवाऽप्रियं प्रसह्यम्। मधुरं सुस्वरं सुलभं सुगतं च स्पष्टमुच्चारणन्तु, कमलद्वयस्य पूर्णत्वे सति, पूर्णाकाशवायुप्रयोगे सति, यथावदवस्थितमार्गे सति च संभवति। यादृशं यादृशञ्च कमलद्वयसामीप्यमेकत्वाकत्वञ्च, तादृशं तादृशं प्रसह्यत्वमप्रसह्यत्वञ्च समायाति। यादृशं यादृशञ्च कमल-



द्वयस्य दूरस्थत्वम्, यथा वा हि संबन्धः, यथा च ह्याकाशवायुप्रयोगः, तथैव प्रियं प्रियतमं सुस्वरं मधुरं स्पष्टञ्चोच्चारणं भवतीति विज्ञेयम्।

दृश्यताम्—संसारेऽस्मिंश्चानेकप्रकारकाश्च शब्दा भवन्ति, बहूनां शब्दानां श्रवणे परमश्च हर्षो भवति, तथा तच्छ्रवणेच्छा हि नित्यमेव भवति, तस्य ब्रह्मरूपत्वात्। यथा च तत्पूर्णशब्दप्रयोगेणाऽऽत्मनो हर्षः, यथा बहूनां श्रवणे परमशोकश्च, तथा बहूनां श्रवणे न हर्षः नैव शोकश्च, इत्याद्यनेके भावा भवन्ति। तत्कारणन्तु केवलं कमलयोरभिधानमेव। यस्य च पुनः सूक्ष्मकमलं यादृशम्, तादृशमेव तस्य, सूक्ष्मं सुप्रियं वचनञ्चापीति विज्ञेयम्। एवं यस्य यादृशं स्थूलकमलम्, तादृशं स्थूलञ्च सुप्रियं वचनम्। यथा यादृशं स्थूलकमलसामीप्यम्, तादृशं स्थूलमप्रियं वचनम्, इत्याद्यनेकाश्च क्रमाः सन्ति। इदञ्चात्रोदाहरणं भवति—बालानां हि वचनम्, प्रायेण सुन्दरं मधुरं प्रियञ्च भवति, तेषाङ्कमलयोः सूक्ष्मत्वात्, यथायथं प्रयोगाच्च। यादृशी च तत्कमलाभिवृद्धिः, तादृश्येव तद्वचनपुष्टिरपि भवति। एवं यादृशं च स्थूलकमलसामीप्यम्, तादृशमेव तेषां वचनमप्यप्रियं भवति, इति संसाराभिधानैर्बोध्यम्। एवमेव पुनः नारीणां वचनमपि प्रायेण प्रियं सुभाषितं सुलभञ्च भवति। इदञ्चात्र कारणं भवति, तासां कमलद्वयं पुनः प्रफुल्लं सूक्ष्मं वा

समानम्, नापि समीपस्थं नापि दूरस्थं वा प्रयोगेण भवतीति नियमः। तासामपि स्थूलसूक्ष्मविधिना च सम्यक्प्रयोगेण कमल-निर्माणं तादृशं वचनादिकमिति प्रसिद्धम्। दृश्यताम्—संसारेऽस्मिंश्च तादृश्यः स्त्रियश्च वर्तन्ते, यासां केवलमुच्चारणेन प्रीतिः कामाद्युद्दीपनञ्च भवति, इति। एवमेव हि कमलविधिना सर्वेष्वपि च संसारेषु वर्णोच्चारणं भवतीति विज्ञेयम्। किञ्च आकाशवाय्वादेः प्रयोगोऽपि तच्छरीरनिर्मातृकर्मानुसारी भवतीत्यपि च विज्ञेयम्। येन येन नियमेन शरीरनिर्माणम्, यादृशं हि तच्छरीरं भवति, तत्र च यादृश्यावश्यकता; तादृशमेव कमलनिर्माणम्, तादृशी-वर्णाभिव्यक्तिश्च भवतीति व्याख्यानफलम्, इत्यादि सर्वाभिधानं शिक्षाङ्गेन बोध्यम्।

एतन्नियमेन हि यत्नो द्विविधो भवति, आभ्यन्तर-प्रयत्नो बाह्यप्रयत्नश्चेति। आभ्यन्तरप्रयनश्चायं भवति, येन पुनरभिप्रायानुमेलनं भवति। योह्यभिप्रायः, तस्य वर्णेन सहा-वेशकरणं तत्क्रमनियतकरणमित्यादिकञ्चाभ्यन्तरप्रयत्नरूपं भवति। बाह्यप्रयत्नश्च प्रत्येकं वर्णानां यथायथं शक्तिप्रयोगकरणरूपो भवति। यथा त्वमागच्छेत्युच्यते। अंशे चास्मिन् त्वंपदे, मापदे, गकारे, छकारे च सर्वेषु शक्तिप्रयोगः। सा च शक्तिः कुत्र-चिदल्पा, कुत्रचिदधिका, कुत्रचित्समा भवति, इत्याद्यनेक-भावेनाऽभिप्रायानुरोधिना च वचनानां प्रयोगो भवति।



यथा, क्रोधेन त्वमागच्छेत्युच्चारणे ह्यन्या शक्तिः, लोभेनाऽन्या शक्तिः, मोहेनाऽन्या शक्तिः, धर्मेणान्या शक्तिश्च भवति। एवं प्रीतिस्नेहावश्यकाश्च सामान्यविशेषा विधयो ह्यनेके भवन्ति। यथा यथा चाभिप्रायः, कामस्थः क्रोधस्थः लोभस्थः मोहस्थः स्नेहबद्धः आवश्यकोऽनावश्यकः प्रयोजनपरः संशयपरः प्रधानो ह्यप्रधानः सामान्यश्च भवति, तथा तथा तत्र वर्णे शक्तिः संभव-तीत्युपदेशः। अत एवेमाः सर्वाश्च शिक्षाः, सुलभं वक्तव्यम्, सुष्ठु वक्तव्यम्, स्पष्टं वक्तव्यमित्याद्युपदिशन्ति। उपदेशेन चानेन, शक्तिप्रयोगश्चैतादृशः प्रयोक्तव्यः, इत्यादि सूचितं भवतीति विज्ञेयम्। शक्त्यैव हि वचनानां सुष्ठुत्वं सुलभत्वं स्पष्टत्वञ्चा-गच्छतीति विज्ञेयम्। अत एव—

"सुस्पष्टं सुलभं वाच्यञ्चामृतं वचनं वद।<br>
प्रियं प्रियतरं वाच्यं नाप्रियं ब्रूहि कुत्रचित्॥<br>
नैव ग्रस्तं निरस्तं च न चैवमविलम्बितम्।<br>
सुष्ठु वाच्यं समुद्भावं सत्यं ब्रूहि यथायथम्॥"

इत्यादि प्रवचनम्। एवमेव—

"नाभिदेशे समुत्पन्नमार्णिकाकमलद्वयम्।<br>
एकं तु वामभागस्थमपरं दक्षिणास्थितम्॥<br>
स्वराणां दक्षिणे भागे भवेदुच्चारणं सदा।<br>
वामभागे व्यञ्जनानां भवेदुच्चारणं तथा॥

स्वराणां व्यञ्जनानाञ्च सर्पिण्यां योग आश्रितः ।
तत्तन्नाडीश्च संप्राप्य ह्युरोदेशमवाप्य सः ॥
तत्र संजायते नादः कण्ठस्थानं ततो लभेत् ।
वर्णत्वं प्राप्य तत्तत्र भवेदुच्चारणं तथा ॥
उच्चारणाद्भवेच्छब्दः विधिरेवं व्यवस्थितः ।
यादृशं कमलं यस्य तादृशं वचनं भवेत् ॥
सुप्रियञ्च प्रियतरं ह्यप्रियं वचनं तथा ।
कमलं यादृशं यस्य सूक्ष्मं स्थूलं परावृतम् ॥
समीपमसमीपञ्च तादृशं चोच्यते सदा ।
कर्मानुरोधी देहः स्यात्कमलं देहधर्मवत् ॥
अतो हि कर्मजं वाक्यं सुप्रियञ्चाप्रियं तथा ।
यथायथं प्रयोक्तव्यं सर्वभिन्नं सनातनम् ॥
अभिप्रायानुरोधेन शक्तिस्तत्र प्रयुज्यते ॥"

इत्यादि प्रवचनम् । तस्मादेवं सर्वं वचनमात्रं व्यवस्थितं भवति । एतत्सर्वञ्चाख्यानं शिक्षापरं प्रशस्तम् । अत एव—

"आकाशे वर्तते शब्दो वायुना तद्विवेचनम् ।
आकाशवायुयोगेन शब्दचारश्च जायते ॥"

इत्यादि प्रवचनम् । तस्मादाकाशे विद्यमानः शब्दः, तत्प्रेरकश्च वायुरिति सिद्धान्तः ।



यथा—अहं ब्रवीमि त्वां प्रति, अस्मद्वचनस्यैवं श्रवणम्, तव चैवं बोधः, अनेनेदमुक्तम्, अस्य चोत्तरमिदम्, तदुत्तरप्रदानमिदम्, पुनरिदं मया श्रुतम्, इति । तदिदं सर्वञ्चाभिधानं वायुकृतमेवेति विज्ञेयम् । आकाशश्च सार्वत्रिकः, स च तव मम चान्तरे भवति । एवं वायुरपीत्यतो मदभिप्रायानुरोधिन्या च वायुप्रेरणया शब्दः प्रकाशते । पुनस्तदभिप्रायबलेनैव वायोः प्रेरणा च युष्मदस्मदन्तरेऽपि भवति । एवं प्रेरणां कृत्वा त्वां श्रावयतीति भावः । त्वञ्च तादृशं शब्दं श्रुत्वा ह्युत्तरप्रदाने प्रवृत्तो भवसि, अथवा च तदनुरोधेन तत्करणे प्रवृत्तश्च, इत्याद्याश्चानेके भावा भवन्ति । बहवश्चैतादृशा अपि भवन्ति, ये च न शृण्वन्ति । तत्रेदङ्कारणं च भवति । मयि चाकाशः समः, त्वयि चाकाशः समः, अन्तरा चाकाशः समो भवति, यत्र चाकाशपरमाणुरल्पो भवति, तत्र श्रवणं न भवतीति । परन्तु ध्वनिमात्रं वायुकार्यमवश्यं भवति । तद्ध्वनिश्चैकपरमाणोरप्याकाशस्य भवत्येव, शब्दस्याकाशगुणत्वात्, तत्र वायुप्रयोगाद्वा । एवं शब्दप्रतिपादनं तच्छ्रवणं तद्धारणं तथाभिप्रायप्रकाशश्च सर्वं प्रत्येकमप्यणूनामस्तीति बोध्यम्—

"सर्वाणौ भासते शब्दः सर्वाकाशप्रवर्तनात् ।
सर्वस्मिन्विद्यते वायुस्तथाऽभिप्राय उच्यते ॥

सर्वाभीष्टश्च सर्वस्थं सर्वं सर्वविभावितम् ।
सर्वभावश्च सर्वस्थः तादृशः प्रणवो मतः ॥

तस्मादेवं विभावेन वर्णमुच्चारितं भवेत् ।"

इत्यादि प्रवचनम् । तस्माच्छिक्षाशास्त्रे सर्ववर्णादिव्यवहारः, उच्चारणविधानं च व्यवस्थितं भवति । सर्वश्च सर्वपरम्, अन्यथा त्वयमात्मा सर्ववाक्यादिभिन्नः सत्यभूतो नित्यस्वरूपश्च भवति । अत एव—

"न च स्थानसिद्धः प्रयत्नप्रसिद्धो
न वा शिक्षया शिक्षितो नित्य आत्मा ।
न वाक्यप्रसिद्धो न वा शब्दसिद्धः
सदैवाहमेतन्नकारस्थरूपः ॥

न चैवाहमेतन्न चैतन्न चाहं
न वर्णं न वर्णान्तरं शब्दरूपम् ।
न चोच्चारणं वाक्यरूपं न चाहं
न चाहं न चाहं न चाहं न चाहम् ॥

न नाडीपरं पद्मजं नाभिदेशो
न वामस्थसिद्धं न वा दक्षिणस्थम् ।
सदा सच्चिदानन्दमोङ्काररूपं
न चाहं न चाहं न चाहं न चाहम् ॥



न कण्ठस्थितो तालुजस्तत्र संस्थो
न मूर्ध्निस्थितो दन्तजोऽनन्तसिद्धः ।
न चैवोष्ठजो नासिकास्थो निरीहो
न वा तत्समूहान्तरः सर्वरूपः ॥

न चाहं न चाहं न चाहं न चाहं
न चाभ्यन्तरो बाह्ययत्नो द्वितीयः ।
विवारो न संवारनादप्रशस्तो
न घोषो न च श्वाससिद्धोऽयमात्मा ॥

न चैवाल्पकप्राणसिद्धोऽयमात्मा
महाप्राणघोषो विशुद्धोऽयमात्मा ।
न चाहं न चाहं न चाहं न चाहं
क्रियासर्वसंसर्गगो नित्यरूपः ॥

सदानन्दसर्वस्थकर्ता महेशो
सदा सर्वदा चित्स्वरूपः समोऽयम् ।
समानः समानः समानः समानो
गुणं कर्मजं कर्मनिष्ठं शरीरम् ॥
विभिन्नं परं भावनीयं च तत्वं
ह्यनन्तं परं चाव्ययं ब्रह्मरूपम् ।
समानं न चाहं समानन्दरूपं
समानं न चाहं निरस्तं प्रधानम् ॥"

इत्यादि प्रवचनम्। तस्मात्सर्वभिन्नं सर्वानुगतं सर्वप्रतिष्ठं ब्रह्मेति बोध्यम्।

तद्व्यवहारप्रबोधायैव शिक्षाङ्गं नियुक्तम्। शिक्षायामप्यस्यां तादृशत्रितयक्रमश्च भवति। तथा—यथाभिप्रायं संभूतानि वर्णानि, तेषां स्थानानि, प्रयत्नाश्च कथितानि सन्ति। तत्र वर्णस्वरूपश्चायमात्मा ह्यकारनिष्ठः, प्रयत्नः क्रियापरो ह्युकारजश्च, स्थानं मकारनिष्ठं निषिद्धजं भवति। तस्मादोङ्कारस्वरूपा शिक्षेति, सा चाकारोकारमकारस्था, अहमेतन्नान्तर्गता, तादृशीति च बोध्यम्। यथैवायमात्मा सर्वक्रियामात्रे प्रभासते, तथैव शिक्षाव्यवहारे प्रतिस्थानं प्रतियत्नं च, वर्णानामभिनिवेशस्तु भवति। शिक्षाशास्त्रस्यास्य च प्रयोजनं तु वेदमात्रे चैतत्प्रबोधनार्थमिति बोध्यम्। तथा हि—अस्यां च ऋचि एतेषां वर्णानां प्रयोगः, तेषामुच्चारणमेतादृशम्, अयं चात्र संधिः, संधौ चैवं रूपम्, अस्य वर्णस्येदं वर्णम्, एतदन्तरे चैतत्प्रयोगकरणमेतदर्थम्, अस्मिंश्च छन्दसीदं वर्णस्योच्चारणम्, अत्र चायं वर्णस्वभावः, एतद्वर्णस्य चेदं स्थानम्, अयं चाभ्यन्तरप्रयत्नः, बाह्यप्रयत्नश्चायम्, कार्यं चास्येदम्, एतद्योजनसाधनार्थमिदम्, सर्वत्र कारणं स्थानप्रयत्नयोः संबन्धः, तत्र नियतकारणं तत्फलं तदुच्चारणविधानम्, अन्यथोच्चारणे दोषः, दोषेण हानिप्रदर्शनम्, यदि चेद्धानेरावश्यकत्वं तर्हि तत्परिहारः, लाभार्थं चेतादृशम्, साम्यं



चैवम्, इत्यादि भवति। संसारे सर्वस्यावश्यकत्वात्, संसारमात्रस्य वर्णक्रमप्रयोगः वेदस्थश्च शिक्षाशास्त्रेण स्पष्टमुक्तो भवति। किञ्चास्मात्स्थानाद्वास्विदमत्र संस्थाप्यम्, तदर्थमिदमेतादृशं वर्णं प्रयोक्तव्यमित्याद्यभिधानं शिक्षायामेव भवतीति विज्ञेयम्। तस्माच्छिक्षा वेदपरा सर्वनिष्ठा व्याकरणान्तर्वर्त्तिनी वर्णोच्चारणविधायिनी चतुर्वेदनिष्ठा बोध्या भवति। शिक्षायाः सर्वाणि व्यवहारकार्याणि संभवन्तीति सर्वसिद्धान्तः।

ततः परं कल्पाख्यमङ्गं तृतीयं भवति। शास्त्रमिदं व्यवस्थापरं बोध्यम्। अत्र हि, यथावद्विषयानुभावना, विषयमात्रक्रमः, तदावश्यकत्वं च सर्वमाख्यातं भवति। किञ्चैषा एतादृशी व्यवस्था, तस्यां व्यवस्थायामेवं क्रमः, कारणं चात्रेदम्, इत्याद्याख्यातम्। एवमेव हि—व्यवस्थायां चास्यां ह्येतादृशशब्देन संबन्धः, एतदवस्थायामेतादृशशब्दानां प्रयोगकरणौचित्यम्, एतद्विषये च प्रथमश्चायं द्वितीयश्चायं तृतीयश्चायं चतुर्थश्चायम्, अस्य चैवमारंभः, अस्य चैवं समाप्तिः, अस्य चैवं विधानम्, अस्य चैवं मध्यं अन्त्यमस्यैवमित्यादिकं सर्वं कल्पशास्त्रावृतं भवति। एवं चास्मिन् कल्पशास्त्रे सर्वाभिप्रायोत्पत्तिकारणमपि वर्णितं भवति। तथा च, येन येनाभिप्रायेण येन येन प्रकारेण चाभिप्रायो भवति, तदभिप्रायस्य यो यो विषयः, येन येन कारणेन च तद्विषयाभिप्रायप्रकाशः, तत्सर्वमप्यत्र व्याख्यातं भवति। पुनश्च, अस्य

चायमभिप्रायः, तत्रेदं कारणम्, अस्य चेदं प्रयोजनम्, अत्रायं संशयः, अयं चात्र बोधः, इदं च हर्षजम्, इदञ्च दुःखजम्, इदञ्च शोकप्रदं, हर्षप्रदं सममन्यफलप्रदं स्वफलप्रदं च, इत्यादि सर्वं चाख्यातम्। सर्वमिदमभिप्रायान्तराभिप्रायसाहित्यवर्णनमिति विज्ञेयम्। अत एव—

"योऽभिप्रायो भवेद्यस्य प्रकाशस्तत्र यादृशः।
कारणेन सबीजेन कल्पाङ्गनियतो हि सः॥
कल्पाङ्गेन यथायोग्यं सर्वश्च विषयः परः।
ओमित्येकाक्षराध्यस्तो व्याख्यातः पूर्णविस्तरः॥"

इत्यादि प्रवचनम्। तस्मात्सार्वत्रिकं कल्पाख्यं च वेदाङ्गं सर्वप्रतिष्ठं बोध्यम्। तत्प्रयोजनं च वेदेष्वेवमभिहितम्—अस्माच्च विषयादस्य वेदस्यारंभः, एतदन्तरे चायं मन्त्रः, तत्रायं विषयः, इदञ्च तद्विषयप्रयोजनम्, तेषां परस्परसंबन्धः, तद्विषयावधारणम्, अत्र चास्य समाप्तिः, अत्र च प्रकरणसमाप्तिः, अस्माच्च प्रकारणारंभः, मन्त्राणामृचां च प्रत्येकं तद्विषयकथनप्रकारः, तत्रत्यक्रमः, ब्राह्मणोपनिषदादेः क्रमः, तत्प्रस्तावः, येन येनावश्यकेन येन येन भावेन तद्भवनम्, तत्रत्यविषयक्रमप्रतिपादनक्रमश्चेति सर्वं तत्कल्पाङ्गपरं बोध्यम्। पुनरेवम्—विषयकथनप्रकारः, अयं भावः, अनेन प्रकारेण वक्तव्यश्चेत्, तर्हि गद्योपस्थितं चैवं पद्योपस्थितं चैवम्, सार्वत्रिकभाषायामेवम्, भाषान्तरेऽप्येवम्, अनुवादप्रकार-



श्चेत्थम्, अयं त्वनुवादः, अनुवादारंभसमाप्तिश्चैवं, तदुत्थापनावतरणम्, तदभिप्रायप्रकाशः, ग्रन्थकर्तुरभिप्रायबोधप्रकारः, ग्रन्थपठनावश्यकत्वम्, ग्रन्थविषयानुमानम्, आचार्याणां मानसाभिप्रायसूचनम्, आचार्याणामवस्थासूचनम्, ग्रन्थावश्यकत्वसूचनम्, इत्यादि सर्वं कल्पाङ्गेन बोध्यं भवति। विपश्चिता हि, यस्मिन्विषये च यो ग्रन्थः, तद्विषयसङ्केतश्च ज्ञातुमुचितः, पुनस्तद्ग्रन्थस्य संज्ञा परिभाव्या। एवं तत्र नियतानियतसंस्कारपरिभाषा च ज्ञेया। एवं तत्र नियमोपि ज्ञेयः, अतिदेशस्तदुद्देश्यं च ज्ञेयम्, अस्याधिकारो विज्ञेयः, कस्मिन्कस्मिन्नंशे चैतस्योपस्थितिर्भवति, कस्मिन्नंशे च न भवतीत्यादि च कल्पाङ्गेन विज्ञेयम्। अस्मिन्विषये ग्रन्थः पूर्वमासीत्, स चैतादृशः, अयं चैतादृशः, किञ्च तत्कारणमित्यादि चात्र परिभाव्यम्। एवम्—अस्य च ग्रन्थस्य का वावश्यकता, कश्चात्र विधिः, कीदृशं च पूर्वापरानुसंधानम्, आचार्यनामाभिधानम्, इतिहासैस्तदवस्थाविधानम्, कस्मिंश्च विषये निष्ठोऽयम्, इत्यादि सर्वं ज्ञात्वा ग्रन्थारंभः यथाशक्ति यथाबुद्धि च कर्तुमुचितो भवति। अन्यथा तु पठनपाठनव्यवहारो निरर्थो भवेत्। किं च विदुषा च पुनरेवं परिभाव्यम्, सर्वेषां सर्वं पठनीयम्, किं त्वेवं परिभाव्य पाठयितुमुचितमिति। तथा हि—अयं च बालस्त्वेतादृशः, अस्य चावस्था चैतादृशी, अस्य च बुद्धिरेतादृशीव्यवसायोऽस्य चैतादृशः, कार्यमस्य चैतादृशम्, आवश्यकं तस्य

चैतादृशम्, प्रवृत्तिरस्य चैतादृशी, शक्तिरस्य चैतादृश्येतावती वेति सर्वं परिभाव्य ह्यध्यापयितुमुचितमिति । किं च यस्मिन्यस्मिंश्च विषये यस्य यस्य च प्रवृत्तिः भवति, तादृशपरमाणोस्तस्मिन्प्रयोगो भवति, तदनुरूपमेव पठितव्यमिति । एवं भाषाटीका तिलकं टिप्पणमपि कर्तव्यम्, इत्याद्युक्तं सर्वमपि कल्पाङ्गे व्यवस्थितं भवति । काव्यशास्त्रबोधमन्तरा खल्वभिप्रायबोधस्याऽसंभव इति सर्वैर्निश्चितं भवति । तस्माद्वेदप्रबोधनाय संसारहिताय च कल्प-शास्त्रमध्येयं भवति । प्रत्येकं च पदार्थानां सापेक्षत्वनिरपेक्षत्व-प्रयोजनादीनां पूर्णं ज्ञानं च कल्पाङ्गेनैव भवतीति विज्ञेयम् । अन्यथा तु तादृशोऽयमात्मा सर्वाभिप्रायाद्भिन्नो भवति । अत एव—

"नाभिप्रायो भवेदात्मा कल्पस्थो न परायणः ।
नैतत्प्रयोजनं किञ्चिन्नैवास्य क्रमभावना ॥
न चास्य विषयः कश्चिन्न स्वयं विषयात्मकः ।
सर्वभिन्नस्वरूपोऽयं सर्वात्मा सर्वसंस्थितः ॥
नैव संसृतिहेतुर्न समानोऽयं सनातनः ।
समानोऽयं समश्चायं समश्चायं समेयिवान् ॥"

इत्यादि प्रवचनम् । एवमेव च—

"न चाभीप्सितोऽभीष्टकल्पस्थितोऽयं
प्रवृत्तान्तरो कर्मजो कर्म नायम् ।



स्वयं सर्वरूपो विशुद्धः प्रबुद्धः
समोऽहं समोऽहं समोऽहं समोऽहम् ॥
न वैरागजो देशजो भावयुक्तो
न वा वृत्तिजः शक्तिसंभावनीयः ।
अनिष्टः परः सच्चिदाकाशरूपः
समोऽहं समोऽहं समोऽहं समोऽहम् ॥
महानन्तनिष्ठो गुणातीतयोगः
परःकालिकस्तत्वरूपः परः स्यात् ।
समावस्थितः सर्वगः सर्वसिद्धः
समोऽहं समोऽहं समोऽहं समोऽहम् ॥
परोऽहं परोऽहं परश्चानुवृत्तः
समायुक्तसौख्यं सुखं कल्पजोऽहम् ।"

इत्यादि प्रवचनम् । तस्मात्सार्वत्रिकं कल्पशास्त्रमेवं प्रसिद्धं भवति । तादृशं त्रितयत्वमकारोकारमकारनिष्ठं बोध्यम् । अभिप्राय एव ह्यभिप्रायकारणं स च सर्वक्रमप्रकाशकश्चेति हि त्रितयं भवति । अभिप्रायोऽयमात्माऽकारवाच्यः, सक्रमश्च प्रकाश एव क्रिया ह्युकारवती, तत्कारणं तयोः संबन्धरूपं निषिद्धं मकारपरं च प्रसिद्धं भवति । एवं नियमेन ह्योमित्येकस्वरूपानुभावनाप्रकाशकं वेदसम्मतं च कल्पाख्यमङ्गम्, सर्वसंसारसिद्धान्तबोधाय वेदि-तव्यमिति सिद्धान्तः ।

ततः परं निरुक्ताख्यं चतुर्थमङ्गं भवति । अस्य च कोशत्वेन प्रवचनम् । शब्दार्थपरमिदं च भवति । कोशतत्वमपीदं भाषानुगतं भवति । इच्छाप्रज्ञापनायैव हि भाषा, भाषाभिक्रमज्ञापनार्थं भवति व्याकरणम्, तत्रार्थानुसन्धानकरणभूतश्च कोश इति, एतादृशशब्दोच्चारणेनैवमेव बोध्यमित्यादि सर्वनिरुक्ताङ्गेन बोध्यम् । तत्र च सर्वमित्थमाख्यातम्—अस्य शब्दस्य चायमर्थः, एते चार्था वा, तस्येदं कारणम्, तदर्थसंबन्धश्चेत्थम्, तदर्थग्राहकमिदम्, अस्य शब्दस्यास्मिन् स्वरे सत्येवमर्थः, अस्मिंश्च क्रमेऽस्मिन्विषये चायमेवार्थः, तत्कारणमिदम्, एकस्य हि शब्दस्यैकार्थ एव पुनर्बह्वर्थप्रवचनम्, इत्यादिकं सर्वं निरुक्ताङ्गे प्रतिपादितं भवति । निश्चयेनार्थः उच्यते अनेनेति निरुक्तम् । निश्चयश्चावश्यकपरः । ततः शब्दद्वारा प्रकाशः, तेन तद्ग्रहणमित्यादिकं सर्वं निरुक्ते व्यवस्थितं भवति । किं चैवमस्मिन्—यस्मिन्यस्मिन्विषये एतदर्थोपस्थानम्, एकार्थवाचकानां शब्दानां प्रयोगः, बह्वर्थवाचकानां शब्दानां प्रयोगः, तयोर्भेदः, एकार्थकानेकशब्दाः, अनेकार्थकैकशब्दः, तस्मिन्नंशे च कारणं तत्फलं च निरुक्ते व्यवस्थितम् । पुनरेवम्, एकस्मिंश्च विषये शब्दस्यैकस्य वक्तुरेक एवाभिप्रायः, "विषये चैकस्मिन् शब्दस्यैकस्य चैक एवार्थः" इति वचनात् । एवं ग्रन्थपठनकाले ह्येव निर्णेयम्—कस्यायं ग्रन्थः, अस्य कीदृश्यवस्था, विषयश्चात्र को भवतीति । एतदनुरोधेनावधार्य शब्दार्थो



विज्ञेयः, प्रथमं पदानां परिच्छेदः, ततः शब्दानां पृथक्पृथगर्थविज्ञानम्, ततस्तदन्वयः, ततश्चान्वयमात्रं निरुक्तपरं प्रयोक्तव्यम् । छन्दसां छन्दसि शब्दानां तद्विषयप्रतिपादने चान्यः क्रमः । एवमन्वयेऽप्यन्यक्रमो भवतीत्यादिकं तेनैव बोध्यम् । अन्वयश्चापि त्रितयक्रमः, दण्डान्वयः, खण्डान्वयः शुद्धान्वयश्चेति । तद्यथा—

"आदौ कर्तृपदं वाच्यं ततः स्यात्कर्म वाचकम् ।
क्रियापदं ततो वाच्यमयं दण्डान्वयो भवेत् ॥

आदौ कर्मपदं वाच्यं मध्ये वाच्यं क्रियापदम् ।
अन्ते कर्तृपदं वाच्यमयं खण्डान्वयो भवेत् ॥

अदौ कर्मपदं वाच्यं मध्ये वाच्यं क्रियापदम् ।
अन्ते कर्मपदं वाच्यमयं शुद्धान्वयो भवेत् ॥

अन्वयस्यानुरोधेन ह्यर्थानां च क्रमो भवेत् ।
ततः स्यादन्वयेनैव कर्तव्यो ह्यर्थसंग्रहः ॥"

इत्यादि प्रवचनम् । तस्माद्दण्डान्वयाखण्डान्वयशुद्धान्वयैः सर्वार्थविज्ञानौचित्यं संभवति । अत्र च कर्ता ह्यकारनिष्ठोऽहं स्वरूपो ह्यात्मा भवति, "अहमेव सर्वस्य कर्ता सर्वस्य भोक्ता सर्वपरः परिनिष्ठितः" इत्यादि प्रवचनात् । कर्म च क्रियापरमुकारनिष्ठं सर्वभवनरूपम्, क्रियापदं च तयोः संबन्धरूपं मध्यवर्ति कर्तृकर्मणोर्योगप्रदर्शकं चेति विज्ञेयम् । एवं तत्परिवर्तनाद्यभिधानेन सर्वं भवतीति

नियमः । एतत्त्रयाणामन्वयेऽप्यस्ति तादृशो भावः, शुद्धान्वयश्चात्मा चाकारनिष्ठः, दण्डान्वयः क्रिया चोकारनिष्ठा, खण्डान्वयश्चेच्छानिष्ठः सर्वाभिप्रायसमाहारार्थकश्चेति । गद्याभिधानं चैतादृशं सर्वसमाहारवत्, पद्यानामन्वयरूपमेव गद्यमिति पद्यगद्ययोः संबन्धः । द्वयोर्मूलञ्च भावप्रकाशनमेव । तस्मात्सर्वग्रन्थस्थशब्दानां स्वरादिकं विज्ञेयम्, येनान्वये सत्यर्थस्य बोधः सम्यग्भवति । अत्रेदं सूचितं भवति—अस्मिंश्च विषये प्राप्ते सत्यस्य शब्दस्य चायं हि स्वरः, अस्यार्थोऽत्रायं भवति, तदर्थकरणमिदम्, तत्परिभावनं चैवम्, अत्र च दण्डान्वयः, अत्र च खण्डान्वयः, अत्र च शुद्धान्वयः, कारणं चात्रेदमिति । इदं च सर्वं निरुक्तबोध्यं भवति । वेदे च तत्प्रयोजनमित्थम्—अस्यां च ऋचीत्थमन्वयः, अत्रत्यशब्दस्यायमर्थः, तत्कारणमिदम्, अनेन हि शब्देन चैतद्विषयप्रकाशः, अनेन चायं संबद्धुमर्हति, अनेन चेत्थं संभवितुमर्हति, अनेनेत्थं भूताया ऋचश्चायं विषयः, अत्र चैतादृशः शब्दप्रयोगः, तस्मादेवं भावः, अयं हि भावश्चेत्यादि स्पष्टमुक्तं भवति । एवं सर्वत्र सर्वशब्दविवेचने, सर्वश्लोकछन्दःप्रयोगे च निरुक्तप्रयोजनमिदं भवति । एवमुक्तानां भूतानां निश्चयकरणम्, अत्र च वायोः कार्यमेतादृशम्, एतादृशश्चाकाशेनैवं शब्दो भवतीति । सर्वमिदं निरुक्ते व्यवस्थितं भवति । वस्तुतस्त्वयमात्मा ह्यर्थादिभिन्नश्च भवति । यथा—



"न चैवायमर्थो न दण्डान्वयोऽयं
न खण्डान्वयो नैव शुद्धान्वयोऽयम् ।
न गद्येन सिद्धो न पद्यप्रसिद्धो
न चावश्यको वाक्यसिद्धोऽनिरुक्तः ॥

अनन्तं सदातीतमोङ्काररूपं
सदैवाहमेवाहमेवाहमेवम् ।
विशुद्धं परं सत्यजं सत्यनिष्ठं
सदार्थात्मकं धारणं धारितोऽहम् ॥

अकारात्मकं सर्वरूपं विधानं
सदैवैतदेवैतदेवैतदेवम् ।
अजं निर्गुणं तं निरर्थं निरीहं
निराकालमाकालमाकालदेशम् ॥

गिरानन्तगम्यः परो भावनीयो
न कारोऽनकारो नकारोऽनकारः ।"

इत्यादि प्रवचनम् । तस्मादहमेतदन्तर्गतं सर्वथात्मानं च विद्धीत्याद्युपदेशः । एतन्निरुक्तादिकं प्रपञ्चपरम्, पृथक्त्वैकत्वज्ञापकमिति च सिद्धान्तः ।

ततः परमङ्गं छन्दश्च पञ्चमं भवति । इदमेव पद्याभिधानम्, गद्यपद्ययोः क्रमज्ञापकं च भवति । अत्र च सर्वेषां वर्णानां

शब्दानां विषयाणां च समाहार इति, शब्दानां क्रमप्रयोगेणैव छन्दो भवतीति च छन्द श्शास्त्राभिमतं भवति । यथा यथा च शब्दानां विषयानुरोधेन क्रमश्चोपस्थापितो भवति, तत्र च यादृशः स्वराणां प्रयोगश्च, तादृशं तादृशमेव छन्दश्चापीति विज्ञेयम् । छन्दश्शास्त्रे चास्मिन्—एवं भूतानां शब्दानामस्मिन्विषये चैवं प्रयोगः, एवं हि प्रयोक्तव्यः क्रमः, अस्मादारम्य चैतत्पर्यन्तमस्येदं च छन्दो वक्तव्यम्, अनेन च कारणेनैवं क्रमः, प्रथमादिप्रयोगश्च तादृशविभक्त्यनुगुणो भवति, एतद्विभक्तिस्थशब्दानां चात्र हि प्रयोगः, अत्र च क्रियायाः प्रयोगः, अत्रायं स्वरः, स्वरोच्चारणमेतादृशम्, तत्कारणमिदमित्यादि व्यवस्थितं भवति । एवमेव—एतादृक्च स्वराणां प्रयोगः, स च भावानुसारी भवति, तत्रोदात्तानुदात्तस्वरिताश्चैते भवन्ति, एष च समाहारः, इत्यादि सर्वं तत्र व्याख्यातम् । किं चात्र—एते वर्णाः प्रयोक्तव्याः, एतद्वर्णानामेष च स्वरः, तत्रैषा मात्रा, उच्चोऽयं नीचोऽयं समाहारोऽयमित्यादि व्याख्यातम् । पुनः अस्य च विषयस्य तदिदं छन्दः, अनेन चैतद्भावस्य सुप्रकाशः, अनेन दुष्प्रकाशः, एते च प्रियाप्रिये, इदं सुलभमिदं च दुर्लभमिदं सुगममिदं दुर्गमम् । कठिनमिदमकठिनमिदम्, इत्यादि सर्वं हि छन्दःशास्त्रेण बोध्यम् । अत्रापि च त्रितयक्रमः—उदात्तानुदात्तस्वरिता इति । तेषां परिवर्तनेन हि सप्त स्वरा भवन्ति, षड्जर्षभगांधारमध्यम-



पञ्चमदैवतनिषादा इति । तत्र त्रयश्चेमे मुख्या भवन्ति, षड्जर्षभगान्धारा इति । षड्जस्तावदात्मपरः, अकारनिष्ठः, उदात्तानुदात्तप्रयुक्तश्च भवति । ऋषभस्तावदुदात्तस्वरितप्रयुक्तः क्रियाभियुक्तः उकारनिष्ठश्च भवति । गान्धारो मकारपरः अनुदात्तस्वरितस्थः निषिद्धरूपश्च भवति । एवमनेन सप्त भवन्ति स्वराः । तत्र चैकविंशतिमूर्छना भवन्ति, तेषां प्रत्येकमपि त्रिभिः क्रमैश्च । एवं विधानेन चानन्तस्वराणां सृष्टिः संभवति, स्वरान्तरे स्वर इति बीजात् । तेषामेव लघुसंज्ञा गुरुसंज्ञा ह्रस्वसंज्ञा दीर्घसंज्ञा प्लुतसंज्ञा, व्याप्लुतसंज्ञा, व्याह्रस्वसंज्ञा चेत्याद्यनेके क्रमाश्च सन्ति। एतेषां क्रमेण प्रयोग एव छन्द इति विज्ञेयम् । इदञ्च सर्वं संगीतशास्त्रविषयं भवति । संगीतमिदं शब्दपरिपूर्णम् । शब्दश्चात्मा भवति । तस्मादेवात्मनः परिपूर्णत्वम् । संगीतं हि, सम्यक्प्रकारेण यत्किञ्चिद्भवति, तस्य यथावद्वर्णनमेव संगीतम् । अत एव "भावानुकथनं गीतम्" इति छन्दःसूत्रम् । तस्माच्छब्दक्रमानुधारणमेव छन्दः । तत्र च तादृशस्तृतयक्रमः वेदितव्यः अनुष्टुब्दण्डकेन्द्रा इति । तत्रानुष्टुप्चात्मपरा, छन्दसां परमा, प्राधान्यं सर्वभावप्रकाशकाकारनिष्ठञ्च भवति । ततो दण्डकं च सर्वसंसारावधारणपरमुकारनिष्ठमेतद्रूपञ्च भवति । प्रशस्तं च तदिन्द्रछन्दो नकारात्मकम्, एतत्रितयसमाहाररूपं मकारनिष्ठं विज्ञेयम् । त्रयाणामेषां परिवर्तननिवर्तनाभ्यामनेकानि छन्दांसि भवन्ति । अत एव—

" भवनं दृश्यते लोके भाव्यमेव हि सर्वशः ।
भावप्रकाशो येन स्यात्तच्छन्द इति कथ्यते ॥

तत्रानेकक्रमेणैवं शब्दानां संप्रयोजनात् ।
स्वराणां च प्रयोगेण छन्दोऽनेकं प्रजायते ॥

उदात्तेनानुदात्तेन स्वरितेन परेण च ।
सप्त स्वराः प्रजायन्ते संगीते च व्यवस्थिताः ॥

षड्जो ऋषभगांधारो मध्यमः पञ्चमस्तथा ।
दैवतश्च निषादश्च स्वराश्चैते सनातनाः ॥

प्रत्येकं च त्रयो भेदाश्चैषां स्युस्तृतयक्रमात् ।
एकविंशतिमूर्छाः स्युः स्वरो भावेन लक्ष्यते ॥

स्वराणां संप्रयोगेण रागो भवति निश्चयात् ।
एतद्वर्णस्वराख्यानं छन्दश्चैवं व्यवस्थितम् ॥

तत्र तीणि च मुख्यानि चोमित्येकपराणि च ।
अकारात्म ह्यहं रूपं छन्दोऽनुष्टुप्सनातनम् ॥

दण्डकं सकलं विश्वं क्रियारूपमुकारजम् ।
इन्द्रं छन्दो मकारस्थं तन्निषिद्धं समान्तरम् ॥

सर्वं च वर्णितं तत्वं केवलं प्रणवाभिधम् ।
ओमित्येकाक्षरेणैव सर्वं छन्दः प्रबुध्यताम् ॥ "



इत्यादि प्रवचनम् । तस्माच्छन्दोमात्रमेतादृशमेतत्प्रधानं परं प्रशस्तं भवतीति विज्ञेयम् । वेदे च तत्प्रयोजनमेवम्—अस्माच्छन्दसश्चैतासामृचामारंभः, इमाश्च ऋचो हीत्थंभूताः, अत्र चेमे स्वराः, अयं चैतत्पठनप्रकारः, तत्कारणमिदम्, अनेनैवं कार्यं भवति, एष च प्रयोगस्त्वस्मिंश्च समये कर्तव्यः, अस्मिंश्च समये न कर्तव्यः, प्रयुक्ताप्रयुक्तफलम्, एतस्यामृच्येतानि वर्णानि भवन्ति, कारणश्चात्रेदम्, एतद्वर्णान्तरे चैतत्प्रयोगः ऋचां प्रत्येकं स्थलभेदकारणम्, तासां च प्रत्येकं क्रमविध्योः संबन्धः, विषयानुरोधी च ऋचामनुप्रयोगः तत्क्रमानुप्रयोगः, तत्राचारनियतम्, तदुच्चारणविधाननियतम्, तत्फलनियतं चेति सर्वं व्याख्यातं भवति । तस्माच्चातुर्वेदमिदं छन्दः शास्त्रं सर्वोपन्यस्तम् । प्रत्येकं कमलपरमाणूनामनुरोधेन छन्दांसि प्रभवन्ति । तस्मादेव छन्दसोऽनन्तत्वं सूचितं भवति । वर्णवृत्तिर्मात्रावृत्तिश्चेति व्यवहारो द्विविधः । ताभ्यां भिन्नश्च तृतीयो भवति । मात्रावृत्तिवर्णवृत्तिव्यवहाराभ्यां च द्विनवलक्षाणि छन्दांसि संभाव्यमानानि भवन्ति । एवं प्रकारेण हि सर्वत्र पृथक्पृथग्भावप्रदर्शनं तथा पृथक्पृथग्वर्णाभिव्यवहारश्चोपन्यस्तो भवति । तस्मात्सर्वसंसारस्य क्रमिकत्वबोधाय परस्परयोगप्रबोधाय च छन्दः शास्त्रमध्येयं भवति । वस्तुतस्तु न छन्दो निरपेक्षं ब्रह्मेति बोध्यम् । यथा—

" स्वरसिद्धो नायमात्मा छन्द स्सिद्धो न चैव हि ।
नायमात्मा परो भावो न क्रमो नाभिशब्दवान् ॥

न छन्दः सर्वतो भिन्नः स्वछन्दः सर्वगोचरः ।
सर्वाश्रयः सर्वभूतः सत्यमात्मा सनातनः ॥

इत्यादि प्रवचनम् । एवमेव—

"न चैवायमात्मा स्वरैर्वेदितव्यो
न वा छन्दसा वृत्तिभावेन चायम् ।
न वा मात्रया वर्णसिद्धोऽयमात्मा
न वानुष्टुभा दण्डकस्थोऽयमात्मा ॥
न चेन्द्रः परोऽयं विधानं निरस्तं
सदावश्यकोऽहं सदावश्यकोऽहम् ।
न चैवायमात्मा क्रमेणाभिनिष्ठो
न चैवायमात्मा गुणेनाभिविष्टः ॥
सदा संवृतं चित्तमोङ्काररूपं
सदावश्यकोऽहं सदावश्यकोऽहम् ।"

इत्यादि प्रवचनम् । तस्माच्छन्दःशास्त्रं तादृशं क्रमोपादनार्थम्, सर्वेषामैक्यपूर्णत्वबोधार्थं चाध्येयं भवति । अत्र च सर्वेषां समाहारः सर्वाश्रयत्वं च प्रसिद्धं भवति ।

ततः परं ज्यौतिषं च षष्ठमङ्गं भवति । इदं च क्रियाव्यवहारपरं बोध्यम् । अत्र च प्रत्येकं शब्दानां शक्तिमात्रा गणनाश्च भवन्ति, अस्मिंश्च शब्दे एतावती मात्रा तावती च शक्तिरिति ।



मात्रा च तत्वरूपा, एतदेतत्तत्वानां वाय्वाकाशादीनां प्रयोगः, उच्चारणनियमेनैतादृशः संभावयितुमेतादृशो वर्तते, चैतादृशो भविष्यत्येतादृश आसीदेतादृशः, इत्याख्यातमत्र भवति । यादृशी शक्तिर्मात्रा च शब्दे संभवति, तादृशं कार्यमपि शब्देन भवतीति व्याकरणैश्च स्पष्टमुक्तं भवति । अतः शक्तिमात्राणां परिज्ञानमावश्यकं भवति । येनैवं बुध्यते—अस्मिंश्च शब्दे एतावती मात्रा, एतादृशी शक्तिः, पुनरेतच्छक्त्या एतन्मात्राया इमानि कार्याणि भवन्ति, एतत्कार्येणैतच्छक्तिमात्रायाश्चैतादृक्संबन्धः, इति तत्सर्वं ज्यौतिषं भवति । एवं च प्रत्येकं परमाणूनामेवं परिगणनं चास्ति, अस्मिंश्च परमाणौ एतादृग्वायुः, एतादृगाकाशः, एतादृक्तेज इत्यादि । किं चैवमपि—तादृशोऽधिकः, अल्पश्चैतादृशः, केवलोऽयमस्य परमाणुः, अयञ्च समाहारः सार्वत्रिकः, अस्मिंश्च कार्येऽस्याधिक्यम्, अस्य चाल्पत्वम्, अनेनैवं भवति वा, न वा भवतीत्यादि ज्ञानं ज्यौतिषेण भवतीति सिद्धम् । तदेवं ज्ञात्वा तादृशं शब्दादिकं प्रयोक्तव्यम्, येन तत्कार्यसाधनं भवतीति बोध्यम् । यथा स्त्रीपुरुषप्रसङ्गः । दृश्यताम्, तत्र ज्यौतिषा चैवं परिभाव्यते—पुरुषे स्त्रियां चैतादृशाकाशपरमाणुः, एतादृशश्च वायुपरमाणुः, समाहृतं चैतादृशम्, अत्रायमल्पोऽत्रायमधिकः, अत्रैषा शक्तिरधिकाऽत्र चाल्पा, कामभोगप्रसङ्गे चैतदिष्टमित्यादिकामशास्त्रेण परिज्ञाय हि

ज्यौतिषा निर्णेयं भवति, यदि सति च साम्ये तर्हि प्रसङ्गौचित्यम्, अन्यथानौचित्यमेवेति । एवं ज्यौतिषेण चेदमपि परिभाव्यम्—काले चास्मिन्निदं कार्यमकर्तव्यमिदं च कर्तव्यम्, अयं च कालस्त्वाकाशिकः, अथ वान्यकालिकः, इदं च कार्यमेतत्तात्विकम्, एतत्तात्विकेन कार्येण सह चैतत्तात्विककालस्य कीदृशः संबन्धः सानुकूलः प्रतिकूलो वा इत्यादि । किं च इदानीं चैतत्तत्वस्य चाधिक्यम्, एतस्य चाल्पत्वम्, इदं च समम्, कारणं चात्रेदम्, इत्याद्यपि चात्र विज्ञेयम् । पुनश्च अस्य च परमाणोश्चैतत्परमाणुना सह संबन्धः, अनेन संबन्धो भवितुमर्हति, अनेनास्य संबन्धत्यागः, एतेषां च विनाशः, इत्यादिकं ज्यौतिषपरं बोध्यम् । वेदे तत्प्रयोजनमिदं भवति—अस्मिन्मन्त्रे चैतत्स्वरे च, एतच्छब्दमध्ये वादौ वान्ते वा चैतच्छब्दप्रयोगः, तत्रैतावती शक्तिः, एतावती मात्रा, एतादृक्तात्विकशक्त्या चैतदुच्चारणं युक्तं भवति, एतादृशी च तात्विकी शक्तिः, एतादृशी च तात्विकी मात्रा, एतदुच्चारणेनोत्पद्यते, एतावत्तात्विकमात्राविशिष्टानामेतावच्छक्तिपराणां च शब्दानामुच्चारणेन चैतावत्तात्विकमात्राशक्तिविशिष्टानां विनाशः, इत्यादि । एतावद्बोधार्थं ज्यौतिषमध्येयम् । ज्यौतिषशास्त्रेणानेन च चतुर्वेदस्थितानां शब्दानाम्, शक्तिमात्राणां च हि परिज्ञानं भवति । तेन संसारे तत्परमाणुसंभवविनाशस्थापनानि च संभवन्तीति विज्ञेयम् ।



तस्मात्सार्वत्रिकमिदं ज्योतिश्शास्त्रमध्येयं भवति । अस्य च ज्योतिश्शास्त्रस्य त्रीणि विधानानि भवन्ति, फलितं गणितं प्रवृत्तितं चेति । फलितं तावत्, अवस्थायाः कथनम् । गणितं चावस्थाज्ञानम्, अत्रेदानीमयमेतादृश इति गणितस्वरूपम् । एतादृशेनेदानीमिदं भवितुमुचितमिति फलितस्वरूपं च विज्ञेयम् । प्रवृत्तितं तु सामुद्रिकम्, सर्वसमाहृतमिदमिति तत्स्वरूपम् । एवं विधानेन ज्योतिषमङ्गं वेदनिष्ठं सार्वत्रिकं भवति । वस्तुतस्तु—

"न चैवायमात्मा गणः सर्वतत्वं
न गण्यो न चागण्य एवानुषिद्धः ।
फलं नैव तत्र स्थितो वा प्रवृत्तो
न शक्तिर्न मात्रा परो वेदनीयः ॥

सदा सर्वदा सद्विभावप्रभावः
समोऽहं समोऽहं समोऽहं समस्थः ।"

इत्यादि प्रवचनम् । तस्माज्ज्योतिश्शास्त्रमिदं सर्वप्रगणनरूपं सर्वानुभवप्रबोधनात्मकं वेदाङ्गं सर्वपरं भवति ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे वेदाङ्गानां स्वरूपनिरूपणं नाम त्रयोदशस्तरङ्गः ॥**

ॐ

## अथ

# चतुर्दशस्तरङ्गः ॥

"अथ तदेभिर्व्याकरणादिभिश्च षड्भिरङ्गैः वेदविषयो बोध्यो भवति । वेदविषयप्रबोधाय हि, शिक्षा कल्पो व्याकरणं विरुक्तं छन्दो ज्यौतिषं चेत्यङ्गानि नियतानि भवन्ति । अत एव "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते" इत्याद्युक्तिः । अत्र च छन्दः क्रमबोधकः, क्रमबोधकत्वादेवास्य पादत्वेन प्रवचनम् । कल्पशास्त्रस्य तु व्यवस्थाबोधकत्वेन हस्तत्वेन प्रवचनम् । यो यस्य विषयः, स एव तस्य हस्तो भवति । एवं शब्दक्रमबोधकत्वेन व्याकरणं मुख्यं भवति । तत्क्रियाबोधकत्वेन शिक्षाया घ्राणत्वम् । अर्थावगमत्वेन निरुक्तस्य श्रोत्रत्वमुक्तम् । सर्वगणनप्रदर्शनात्, ज्यौतिषस्य चक्षुस्त्वेन प्रवचनम् । एवं भूतं षडङ्गं सर्वकार्याभिधायकं यथायथं नियतं भवति । अत एव—

"ज्ञात्वा व्याकरणं नित्यं शिक्षां ज्ञात्वा परावराम् ।
ज्ञात्वा कल्पनिरुक्ते च छन्दो ज्यौतिषमेव च ॥
अध्येयः प्रथमं वेदस्तत्वं प्रणवसंज्ञकम् ।
इत्थं साङ्गमधीत्यैवं ब्रह्मलोके महीयते ॥



अकारोकारमकारनिष्ठं वेद्यं त्रयात्मकम् ।
अहं ब्रह्म च त्वं ब्रह्म ह्यन्यच्च ब्रह्मसंज्ञकम् ॥
सर्वं ब्रह्मपरं ज्ञात्वा मुक्तिमान् भुक्तिमान्नरः ।"

इत्यादि प्रवचनम् । अयमेव हि स्वाध्यायो भवति । स्वस्याध्यायः स्वाध्यायः, अध्ययनं स्वाध्याय इति तदर्थात् । स्वाध्यायः सर्वथा कर्तव्य इति सर्वत्रोपदेशः । आत्मनोऽध्ययनाय, आत्मविज्ञानाय च सर्वथा यत्नः कर्तव्यः । सोऽयं यत्नश्च वेदवेदाङ्गाध्ययनमेव भवति । अतो वेदाध्ययनस्य स्वाध्यायत्वेन प्रवचनम् । अत एव—

"तपस्वाध्यायनिरतः सर्वधर्मानुवर्तकः ।
साक्षान्मुक्तिमवाप्नोति ह्योमिति ज्ञानमुत्तम् ॥
स्वाध्यायनिरतो जीवः स्वात्मानं वेत्ति सर्वथा ।
आत्मज्ञानं हि मोक्षः स्यादात्मविद्या परायणी ॥
वेदसंवर्तिनी विद्या ह्यङ्गसाध्या समानजा ।
ब्रह्मविद्या प्रतिष्ठा च ब्रह्मभावं प्रयच्छति ॥"

इत्यादि प्रवचनम् । तस्मात्स्वाध्यायः सर्वथा साध्य इति सिद्धान्तः । अस्यानध्ययनमेवाऽनध्यायः । वेदवेदाङ्गानामनध्ययनं च ह्यात्मभावाचिन्तनमेव । अनन्तसुखभवनमेवाध्ययनेनेति प्रशस्तं भवति । अत एव—

"आत्मानं यो न जानाति यावत्तत्वं न बुध्यते ।
तावत्सर्वमनध्यायः कालवैयर्थ्यमेव च ॥

आत्मज्ञानेन जीवानां सर्वज्ञत्वं हि जायते ।
आत्मैव कारणं लोके सर्वभावस्य सर्वदा ॥
सर्वथा सर्वदा नित्यं सर्वं सर्वपरावरम् ।
इदं ज्ञेयमिदं ज्ञेयं ज्ञात्वा ज्ञात्वा प्रमोक्ष्यते ॥

इत्याद्युपदेशः । तस्मात्स्वात्मज्ञानायाध्यायः प्रभवति । अन्यथा त्वनध्याय एवेति विज्ञेयम् । अत एवास्यानुकरणमसद्भावेऽपि दृश्यते । अहश्चैकमधीत्य, अहरन्तरेऽनध्यायः सर्वत्र प्रशस्तः । कार्याणां विरामश्चावश्यक एवेत्यारंभावसानबीजेन स्पष्टमुक्तो भवति । तदनुरोधेनैव पठनपाठनव्यवहारेऽपि स्वाध्यायाऽनध्यायौ च नियतौ भवतः । यस्मिन्यस्मिंश्च काले स्वार्थमध्यायः अध्ययनं युक्तम्, तस्य तस्य कालस्य स्वाध्यायपरत्वम्, अन्यश्चानध्याय इति व्याख्यानेन स्पष्टमुक्तं भवति । अत्रेदं सूचितं भवति—द्वितीयाया आरभ्य सप्तमीपर्यन्तं वेदतदङ्गाध्ययनं नियतं भवति, ज्ञानक्रियेच्छापरिवर्तनानुसारेण तदनन्तरं दिनमेकं चाष्टम्यां तिथौ तद्विरामो नियतः, तस्यामनध्यायः, पुनरेवं नवम्यां तदारंभः, अमापूर्णिमान्तमध्येयम्, प्रतिपदि पुनस्तद्विराम इति । अत्रेदं कारणं भवति—तिथीनां महामन्वन्तरेणैव हि पूर्णः संबन्धोऽस्ति, अन्हां तु न पूर्णः संबन्ध इति । यद्यप्यहरहस्तिथयो भवन्ति, तथापि कालविभागे तिथीनामेव मुख्यत्वमुक्तम् । वृद्धिक्षयसंभावना च तिथावेव संभवति । वृद्धिक्षयाभ्यामेव च संसारः ।



तस्मात्तिथीनामेव मुख्यत्वमुक्तं भवति । अत एव प्रतिपद्यष्टम्यां चानध्यायः । अन्यास्तिथयस्सर्वा अपि स्वाध्यायपरा भवन्तीति व्याख्यानेन बोध्यम् । अत एव—

"प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी ।
तस्य विद्याक्षयं याति कृष्णपक्षे यथा शशी ॥
अष्टमीं च प्रतिपदं त्यक्त्वा स्वाध्यायमाचरेत् ।
यथा ज्ञानक्रियेच्छाः स्युः समाहारस्तथा च हि ॥
तिथेर्मुख्यप्रभावेन स्वाध्यायो नियतो भवेत् ।
स्वाध्यायः सर्वथा ग्राह्यो ह्यनध्यायं परित्यजेत् ॥
पर्यध्यायः समो धर्मः तादृशः प्रणवात्मकः ।"

इत्यादि प्रवचनम् । तस्मादेवं विधानेन स्वाध्यायानध्यायपर्यध्यायास्त्रयश्चाकारोकारमकारान्तर्गता बोध्या भवन्ति । अत एव—

"स्वाध्यायस्त्वात्मनिष्ठः स्यादकारात्माहमेव च ।
अनध्यायः क्रियाः सर्वाः सर्वोकारपराः स्मृताः ॥
पर्यध्यायो मकारात्मा प्रोक्तः सोऽयं सनातनः ।"

इत्यादि प्रवचनम् । अत्र चाकारात्मकः स्वाध्याय इति सर्वत्रोपन्यस्तः । द्वितीयाया आरभ्य सप्तमीपर्यन्तं च वेदादिकमध्येयं भवति । तदिदं चात्मनिष्ठम् । तद्विरामोऽनध्यायः, अष्टमी च सा सप्ताहिकं च नियतम् । ततः परं पुनरेवं स्वाध्यायोऽनध्यायश्च-

नियतः। यद्यपि पञ्चदशतिथीनां समाहारो भवति, तर्हि तत्राष्टमीं चानध्यायः, तथापि दिनं चैकं वृद्धिक्षयप्रयोगार्थं वेद्यं भवति। तिथीनां वृद्धिक्षय इति च सर्वैश्च ज्योतिश्शास्त्रैः स्पष्टमुक्तं भवति। तद्विधानबोधार्थं दिनमेकं च व्यवस्थितम्। कदा च चतुर्दशतिथ्यात्मकः पक्षः, कदाचित्पञ्चदशतिथ्यात्मकः पक्ष इति भवति। एवं त्रयोदशतिथ्यात्मक इत्यपीति प्रसिद्धम्। तद्विधानं यथायथमेकं प्रकारेण बोध्यम्। तस्माद्वेदवेदाङ्गानां सर्वेषां संसारविषयाणां क्रियाज्ञानेच्छासमाहारपराणां च स्वाध्यायोऽनध्यायश्चैवं विधानेन बोध्यः। षण्मासा ह्यनध्याया इत्यपि चैवं विधानेन बोध्यम्। एवं षण्मासा ह्यनध्यायाश्चैकमहः। सूर्ये ह्युत्तरायणं गते सति मकरसंक्रान्तौ च प्रथममहोऽध्ययनपरं भवति। एवं दक्षिणायनं गते सूर्ये कर्कटसंक्रान्तौ च प्रथममहश्चैकमनध्यायपरं तादृशं नियतम्, विरामकालानुष्ठानात्। एवमेव, त्रिवार्षिकोऽनध्यायः। अधिमासं मासमेकम्। तृतीये वर्षे ज्ञानेच्छाक्रियाव्यवहारेणाधिमासो भवति। तस्मिंश्चाधिमाससंज्ञके मासे वेदवेदाङ्गमनध्येयम्। एवं प्रकारेणाध्ययनाध्यापनविधौ ज्ञानाद्यनुष्टानतया स्वाध्यायोऽनध्यायश्च प्रसिद्धः। अत एव—

"सप्ताहिकमनध्यायः शक्तिसंपादनाय च।
स्वाध्यायः सर्वथा प्रोक्तश्चात्मध्यानस्य कारणम्॥



षण्मासाश्च ह्यनध्यायाश्चाहश्चैकैकसंस्थितम्।
उत्तरायणगे सूर्ये दक्षिणायनगे तथा॥
परिवर्तनादेव हि षण्मासा दक्षिणायनम्।
क्रियापरमिदं प्रोक्तमुकारात्मकमेव हि॥
ज्ञाननिष्ठं मकारस्थं षण्मासाश्चोत्तरायणम्।
आत्मनिष्ठमिदं प्रोक्तं ताभ्यां भिन्नं मकारवत्॥
ओमित्येकाक्षरेणैवं स्वाध्यायादिविधिर्भवेत्।
एवं प्रबोधनार्थाय वेदवेदाङ्गनिश्चयः॥"

इत्यादि प्रवचनम्। एवमेव—

"वर्षत्रयमनध्यायो मासश्चैकश्च सन्धिजः।
ज्ञानक्रियेच्छया विद्धि चाधिमासं यथेप्सितम्॥
तृतीये चैव वर्षे स्यादिच्छाकालः परावरः।
मासश्चैकोऽधिमासः स्याच्छिवाराधनतत्परः॥
इच्छानिष्ठः शिवश्चैव तत्कालस्त्वनुवेष्टितः।
संहारः सर्वथा सर्वः तस्मात्तत्पूजनं भवेत्॥
अतस्तत्राप्यनध्यायः सर्वसंहारकारणात्।
विरम्यैवं मासमेकं पुनः स्वाध्यायमाचरेत्॥
एवं विधेन स्वाध्यायोऽनध्यायश्च विधीयते।
वेदवेदाङ्गबोधार्थं ब्रह्मज्ञानार्थमेव च॥"

इत्यादि प्रवचनम् । तस्मादेवं प्रकारश्च स्वाध्यायोऽनध्यायश्चावश्यक इति विज्ञेयम् । एवं षाण्मासिकं त्रिवार्षिकमान्हिकं चेत्यपि बोध्यम् । पुनरेवमस्यार्थे सर्वथाऽनध्याय एवेति शिष्टाचारः । ये चैतद्विधानानां संपूर्णबोद्धारो भवन्ति, तेषामाचारश्चायं स्वाध्यायोऽनध्याय इति । इदञ्च सर्वं महाविष्णोरारम्य महामन्वन्तरात्त्रुटिपर्यन्तं परिगणनं कृत्वा, स्वाध्यायोऽनध्याय इति नियमः कृतो भवति । पर्यध्यायस्तृतीयः, स च योगिनामृष्यादीनां व्यवहारपरः । न चायं पर्यध्यायश्च सर्वेषां भवति । सर्वथाऽध्ययनमिदं सार्वत्रिकं सार्वकालिकं च, सर्वसंसाराध्ययनमिति विज्ञेयम् । अतः स्वाध्यायमनध्यायं च कृत्वा पर्यध्यायं प्राप्नोतीति तत्क्रमविज्ञानफलं भवति । अत एव—

" स्वाध्यायं तमनध्यायं कृत्वा चैवं यथायथम् ।
पर्यध्यायं समाप्नोति चिन्तना नास्ति यत्र हि ॥

त्रयस्त्वेते समाध्यायाः सन्ति सर्वत्र सर्वदा ।
अणोरारम्य संसारे महाविष्णुसमाश्रये ॥

स्वाध्यायस्तदनध्यायः पर्यध्यायः परावरः ।
सर्वथा सर्वभूतार्थं विधिरेव त्रयात्मकः ॥ "

इत्यादि प्रवचनम् । तदित्थं स्वाध्यायोऽनध्यायः पर्यध्यायश्च त्रयश्चैते नियता भवन्ति । एते च ज्ञानेच्छाक्रियापरा प्रविष्टा भवन्ति । एवं क्रमेण हि साङ्गो वेदोऽध्येयो भवति, येन सर्वज्ञानं सर्वतत्व-



विज्ञानं च भवति । अन्यथा त्वयमात्मा सर्वस्मात्परमो वा भवतीति सिद्धम् । यथा—

" नायमात्मा समाध्यायो न स्वाध्यायोऽस्ति कश्च न ।
पर्यध्यायो न चाध्यायो नायमात्माभिधीयते ॥ "

इत्यादि प्रवचनम् । एवमेव—

" न चैवात्मरूपं ह्यनध्येयमेवं
न चाध्येयमेवं परं वेदितव्यम् ।
अनध्यायसिद्धं न चाध्यायसिद्धं
समाध्यायसिद्धं ह्यनध्यायसिद्धम् ॥
नचैवायमात्मा विकल्पः प्रकल्पो
न वेदो न वेदाङ्गनिष्ठः पुराणः ।
समानन्दरूपः सदानन्दरूपः
सदावश्यकः सर्वगः सर्वसिद्धः ॥ "

इत्यादि प्रवचनम् । तस्मादेवं विधानेन स्वाध्यायाऽनध्यायपर्यध्यायसमाध्यायाश्च तदोमित्येकाक्षरपराः प्रणवातीताश्च प्रतिष्ठिता भवन्तीति विज्ञेयम् । तदित्थं पूर्वविधिना च षडङ्गो वेदो ह्यध्येय इति सिद्धान्तः । एवमङ्गानां तथा तदङ्गिनां वेदानाञ्च तदेकत्वव्यवहारः सर्वथा बोध्यो भवति ।

शब्दशक्तीनां च यथावत्परिज्ञानमेतैश्चाङ्गैरेव भवति । शब्दस्त्वाकाशगुणः, आकाशपरं हि सर्वं कार्यं भवति । तस्मात्तद्बोधाय

तान्युपन्यस्तानीति विज्ञेयम् ! एतद्वेदमन्त्रद्वारैव—सर्वावश्यकज्ञानं सर्वापेक्षितविज्ञानञ्च भवति । यत्र यत्र यस्य यस्य या वाऽपेक्षा या चावश्यकता, तस्याः पूर्णप्रबन्धतया शब्दशक्त्या सर्वं सर्वत्र स्थापयितव्यम् । तत्पूर्णज्ञानेनैव तद्विषयकेण चेदं भवति । आ, समन्तात् मन्त्रेण जलवर्षः पुष्पवर्षश्च ततः प्रतिहरणं चानेकप्रकारकं संसरणव्यवहारः परमाणुकल्पनं सङ्गीतप्रस्तावः वाटिकारोपणं च सर्वं सर्वत्र भवति । एतत्स्वाध्यायज्ञानी स्वाध्यायी च ब्राह्मणो भवतीति, स ब्राह्मण एव चैतज्जगद्देवता सर्वकर्मानुष्ठाता च प्रसिद्धः, इत्यादिस्पष्टमुक्तं भवति । तस्माद्वेदमन्त्रपरं सर्वं कार्यमिति चेत्याद्युपदेशवचनं भवति । यथाकालं च ब्राह्मणाः सर्वेऽपि कार्यं कुर्वन्तीति सर्वव्याख्यानफलं भवति । अत एव मन्त्राधीनं जगत्सर्वमित्यादि व्याख्यातम् । अत एव—

“ सर्वं स्वात्मपरं विद्धि ह्यात्मा स्वाध्यायतत्परः ।
स्वाध्यायनिरतैः सर्वैर्ब्रह्मभावश्च लभ्यते ॥
ब्राह्मणः पूज्यते लोकैः तदधीनमिदं जगत् ।
तस्माद्धि जगतो देवो ब्राह्मणः प्रोच्यते सदा ॥
सर्वकर्ता नियन्ता च यथाकालं यथाभवम् ।
भाव्यं भवति सर्वत्र नानुचिन्त्यं कदाचन ॥”

इत्यादि प्रवचनम् । तस्माच्च ब्राह्मणस्य पूर्णत्वं महत्वं च भवति । एवं तत्कार्याधिकारेण वेदादेर्महत्वं व्यवस्थितं भवति ।



एतदभिधानेनैव तन्त्रशास्त्रे च षट्प्रयोगा भवन्ति । प्रयोगेषु च मारणादीनि षट् कर्माणि प्रसिद्धानि भवन्ति । शब्दशक्तेः प्राबल्येन तत्साधनं चेति विज्ञेयम् । अत एव मन्त्राणां विपरीतक्रमेण तत्प्रयोगेण च विपरीतफलमिति, संप्रीतप्रयोगेण संप्रीतफलमित्याद्युक्तिः । तद्यथा—

“ शब्दशक्तिप्रभावेन सर्वं कार्यं हि जायते ।
परमाणुकल्पनादि कार्यमेवं व्यवस्थितम् ॥
उत्पत्तिश्च विनाशश्च संस्थितिश्च त्रयस्तथा ।
कार्यरूपाश्च जायन्ते शब्दक्रमविधानतः ॥
अतस्तन्त्रप्रयोगेषु षट् प्रयोगा भवन्ति ते ।
मारणं मोहनं चैव वश्यमुच्चाटनादिकम् ॥
कार्यसंसाधनार्थाय नियतानि यथाफलम् ।
शब्दक्रमविधानोत्थं सर्वं कार्यं हि शक्तिजम् ॥”

इत्यादि प्रवचनम् । एवमेव—

“ साङ्गं वेदमधीत्यैवं ज्ञात्वा शब्दान्यथायथम् ।
स्वयं ब्रह्मपरो भूत्वा कुरु ब्रह्माण्डकल्पनाम् ॥
अनन्तं त्रितयं ब्रह्म चैकमेवेति बुध्यताम् ।
विज्ञानायैव चैतेषां स्थितं चाध्ययनं परम् ॥
तस्मात्सर्वमधीत्यैवं प्राप्यते सर्वभावना ।”

इत्यादि प्रवचनम् । तदेवं विधानेन वेदाध्ययनफलमुक्तं भवति ।

इदमेव हि ऋषिऋणविमोचकं भवति । त्रीणि ऋणानि संप्रसिद्धानि, देवऋणं पितृऋणं ऋषिऋणं चेति । देवऋणमोचकं तु यज्ञादिकं सार्वत्रिकं सर्वसेव्यं च सर्वैः प्रकारैः भोजनाच्छादनादिभिश्च क्रियाभिः क्रियमाणम् । पितृऋणमोचकं च श्राद्धादिभिः श्रद्धया सर्वस्यैकत्वविवक्षया सर्वकार्यकरणं च । एवमृषिऋणं च तदनध्ययनाध्यापनरूपम् । अध्ययनाध्यापनं कृत्वा स्वज्ञातवस्तूनां प्रदानमध्ययनरूपं ऋषिऋणोद्धारकं च भवति । अत एव—

" अकारोकारमकारक्रमसिद्धमृणत्रयम् ।
तस्मादुद्धृतये प्रोक्तः स्वाध्यायः स्यादनुष्ठितः ॥
देवर्णं च क्रियानिष्ठमुकारात्मकमुच्यते ।
सर्वार्थं सर्वथा कार्यं तस्मादुद्धृतिमाप्नुयात् ॥
श्रद्धया चैव भावेन यत्कार्यं समुपस्थितम् ।
तच्च सर्वमृणं प्रोक्तं पितॄणामेककालिकम् ॥
स्वाध्यायोऽध्यापनं सर्वमृणं स्यादृषिसंज्ञकम् ।
तच्चाकारपरं वेद्यं प्रसिद्धं प्रणवाभिधम् ॥
अकारोकारमकारस्वाध्यायादिसमन्वितम् ।
अधीत्य वेदवेदाङ्गं तत्वभावः सुलभ्यते ॥ "



इत्यादि प्रवचनम् । तस्मात्सर्वमिदं प्रणवनिष्ठं स्वाध्यायानध्यायपरं वेदवेदाङ्गमृषिऋणनिवृत्तिपरं चाध्येयं भवति । येन सर्वस्वभावसंसारस्य यथायथं प्रबोधसंभवः, तेनैवात्ममात्रस्य संसरणव्यवहारेणोकारो भवतीति विज्ञेयम् । व्याकरणं चैवात्मनः सर्वत्र विद्यमानत्वं सर्वस्यैक्यं चेति विज्ञेयम् । अन्यथा तु सर्वमेतत्प्रबन्धमात्रमनिर्णीतमसङ्गतं निरर्थं ब्रह्मपरं च बोध्यम् । अत एव—

" न चैवायमात्मा ऋणं तत्प्रदाता
न चैवायमात्मा परस्थः प्रतिष्ठः ।
अयं सर्वभूतात्मको भूतभावः
सदावश्यकोऽयं सदावश्यकोऽयम् ॥
अनन्तो न वेद्यो न च च्छेद्यरूपः
समस्तः समोऽयं महत्तत्वमेकः ।
न चात्माऽऽश्रयोऽहं ह्यनात्माश्रयोऽहं
ह्यनात्माश्रयोऽहं समाध्यस्तरूपः ॥
न वेदैकबोध्यो न वेदाङ्गनिष्ठो
निरीहः सदा सत्यसङ्कल्पनिष्ठः ।
गुणोऽहं विकल्पो निरानन्दभावः
समोऽहं समोऽहं समोऽहं समोऽहम् ॥
अनेनैवमात्मा गुरुर्भावितोऽहं
ह्यनेनैवमात्मा गुरुर्भावितोऽहं ।

अनेनैवमात्मा महान्व्यापकोऽहं
सदा सच्चिदंशः प्रभावेन युक्तः ॥
समोऽहं समोऽहं समोऽहं समोऽहं
न चाकाशरूपो न वायुर्न चान्यः ।
न चावश्यको ज्ञानगोऽतीतरूपः
परोऽहं परोऽहं परोऽहं परोऽहम् ॥"

इत्यादि प्रवचनम् । तस्मादोमित्येकाक्षरपरोऽयमात्मा सर्वसंसारश्चेत्युपदेशफलम् । एवं प्रकारेण सर्वसंबन्धबोधाय सर्वानुसाधनाय च सर्वेषां चेष्टाः संभवन्तीति विज्ञेयम् । अत एव—

"सर्वबोधाय साङ्गाश्च वेदाऽध्येया भवन्ति हि ।
अधीत्यैवं ब्रह्मविद्यां ज्ञात्वा वै वृत्तिनिश्चयम् ॥
कर्तव्यो तादृशो नित्यो व्यापारः प्रणवस्थितः ।
स्वाध्यायादिक्रमेणैवं संप्रयुक्तं सनातनम् ॥"

इत्यादि प्रवचनम् । तस्मात्साङ्गो वेदो ब्रह्मस्वरूपप्रतिपादकश्च ब्रह्मचर्याश्रमे प्रथमे वयस्यध्येयो भवति । एवं च तमधीत्य स्वच्छन्दो भूत्वा ब्रह्मकार्ये प्रवृत्तो भवेदिति तद्भावो विज्ञेयः ।

अध्ययनक्रमश्चायमस्य नियतो भवति—प्रथममुपनयनसंस्कारसंस्कृतश्च गायत्रीस्वीकारेऽधिकृतो भवति, ततस्ताद्विज्ञानिनां महावाक्यमध्येयमिति । यद्यपि तात्कालिको बोधस्त्वसंभवः, तथापि तत्पठनं प्रथमं समुचितं भवति । ततः परमेवं क्रमेण वेदाङ्गान्यध्येयानि भवन्ति । प्रथमं व्याकरणाख्यमङ्गं मुख्यम्, येन सर्वशब्दानां परिचयो भवति । ततश्चैवं परिचितशब्देन शिक्षाशास्त्रमध्येयम्, येन तत्पूर्णव्यवहारविज्ञानं भवति तेन स्वरादीनां भ्रंशो न भवति । एकस्वरस्यापि विधानव्यतिक्रमे सति कार्यभ्रंशो भवतीति विज्ञेयम् । अत एव "स्वरतो वर्णतो वा परिभ्रष्टो वाग्वज्रो भवति शब्दः" इत्याद्युक्तम् । एवमेवं "यथेन्द्रशत्रुः स्वरताऽपराधात्" इत्युक्तम् । अत्र ह्युदात्तस्वरेण प्रयोगो भवितव्यः, परन्त्वनुदात्तस्वरेण प्रयोगेण च तद्विरोधः समभवदिति विज्ञेयम् । सति चोदात्तस्वरे भवतीन्द्रस्य शत्रुरिति, एवमेव हि तत्प्रयोगः । सति चानुदात्तस्वरे प्रयोगे इन्द्र एव शत्रुर्यस्येत्यर्थो भवति, एवमेव तत्प्रयोगो भवति । मन्त्रप्रयोगस्त्वेवमेतदर्थो भवति, येन चेन्द्रस्य क्रियामात्रपरस्य संहारो भवति, तर्हि तत्प्रयोगविरोधात् ज्ञानमात्रस्य संहारश्चानुष्ठितोऽभवत् । अत्र शब्दशक्तेर्महत्वं च यथायथमभिवर्तत इति दृश्यताम् । तस्माच्छिक्षाशास्त्रं तत्परिज्ञानार्थमध्येयं भवति । ततः परं कल्पाख्यामङ्गं भवति, येन हि विषयबोधो व्यवस्थितो भवति । ततःपरं निरुक्तं चाङ्गमध्येयम् । ततः परमङ्गं छन्दश्चाध्येयम् । ततो ज्यौतिषमध्येयम् । ततश्चोपवेदाः । एवं शुक्लकृष्णशाखासमन्विताश्चोपवेदा ह्यध्येया भवन्ति । ततो ब्राह्मणानि

चाध्येयानि । ततो वेदाश्चाध्येयाः । ततश्च पुनर्महावाक्यं गायत्री चेत्यध्ययनक्रमः ।

संसारदृष्ट्या तु स्तूलाच्च सूक्ष्मं वेद्यम् । यद्यप्यात्मतत्वस्याव-श्यपूर्वत्वम्, तथापि पूर्वपरत्वयोरभावात्सर्वस्य सार्वत्रिकत्वाच्च प्रकारद्वयोऽप्यत्र ह्युपस्थितो भवति । इदं चात्र सुलभं भवति, सांसारिकाणां सांसारिकक्रमेण ह्यात्मनो बोधौचित्यमिति । प्रथमं चेमानि प्रश्नानि भवन्ति, यानि यानि चेमानि दृश्यमानानि भवन्ति, तानि च किमर्थानि कैश्च नियतानि, कथमेवं विनश्यति, कथमुत्पद्यते, केन केन च भावेन चैषां स्थितिः, किङ्गिमस्य कार्यवित्यादीनि । एतत्परिभावनन्तु सर्वथा भाव्यम्, भाव्यानु-सारेणैव सर्वं भवतीति नियमात् । दृश्यताम्—प्रथमन्तु पूर्वा-वस्थायां सुखमेव प्रचेष्टते, दुःखस्यैव रूपान्तरं सुखम्, यस्य सुखस्यान्तिमं दुःखम्, यस्य दुःखस्यान्तिमं सुखमिति कुतो-नियमः । आद्यन्तौ च नकिञ्चिदपि व्यवस्थितौ, सर्वस्या-नन्तानादित्वादतीतत्वाच्च । तस्माद्दुःखस्य रूपान्तरं सुखं सुखस्य रूपान्तरं दुःखमिति हि रूपान्तरफलं भवति । एत-द्रूपान्तरं हि न सुखं नैव दुःखम्, किन्तु सर्वदानन्द एवेति विज्ञेयम् । तस्मद्रूपान्तरे च सुखे संसरणव्यवहारस्य प्रबोधो न भवति । नापि चात्र विचारोत्पत्तिश्च । सर्वश्च सुखं प्राकृत-नियतमभिचेष्टते, पश्चाद्रूपान्तरं दुःखमाप्नोति । इदमपि प्राकृत-



नियतं भवति । दृश्यताम्—एकस्यामवस्थायां ज्ञानोत्पत्ति र्न कदापि भवति । सर्वदा च ज्ञानं वस्तुद्वयसापेक्षमेव । इदं तत्पश्चादिदं द्वयोरिदमिति हि ज्ञाने प्रवृत्तिर्भवति । यावच्चैकमिति तावन्न ज्ञातुं शक्यते, अन्यस्याभावात् । इदमेवास्ति, इदं मया ज्ञायते अन्य-स्यास्तित्वमपि न, तज्ज्ञाने प्रवृत्तिः कथमिति बीजात्, दुःखेऽपि प्राप्ते सति जिज्ञासा भवति, अह ह किमिदं यत्पूर्वमुपन्यस्तं तत्परं किमिति परिभावयति । सर्वत्र त्वेकमेव नियतमिति भेदः कथ-मत्रोपस्थितो भवति । अनेनैषाऽवस्था, पूर्वेण चान्यावस्था, इत्याद्य-वस्थायां भेदः कथमिति, किमर्थमिति प्रश्नेन च विषीदति । तद्बोधे-च्छया चैवं चेष्टा भवति, इदं च ज्ञातव्यम्, किमिदं दुःखम्, किंमिदं सुखम्, कश्चानन्दः परायण इति । एतज्जिज्ञासया सर्वान्प्रति स्वजि-ज्ञासां ज्ञापयति । तदा चैतज्ज्ञानिनः सर्वेऽपि चैवं वदन्ति—वेदाश्चाध्येयाः, अङ्गान्यध्येयानि, येन सर्वस्य यथायथं परिज्ञानं भवतीति । एतच्च सर्वमतीतमनन्तं प्रणवपरमहमेतन्नाभियुक्तं गायत्रीमहावाक्यसंस्थितं च भवति ।

संसारश्च संसरणव्यवहारः । अत्र च नानाविधाश्च पदार्था-स्सन्ति । तेषां चानेके प्रकाराश्च भवन्ति । एवं श्रुत्वापि पुनः पुनः शङ्का च समुदेति, किमिदमङ्गम्, वेदास्तत्प्रकाशकाः संसारादयश्च कीदृशा इति । तदवधार्य पठने प्रवृत्तिर्भवति । इदञ्च सामान्यकार्यम् । स चैवं पठति—अङ्गानि वेदांश्च

सर्वान्यथा यथा पठनादेव तस्य यथायथं ज्ञानं भवति, तज्ज्ञानेनैव नैश्चल्यमायाति, इदमित्थमेव नात्र भ्रम इति। भ्रमस्तु केवलमस्माकम्, इदं तु सर्वं सिद्धान्तपरं भाव्यमेवेत्यध्ययनाध्यापनफलम्। अत एव चैतदर्थमुपदेशोऽपि कर्तुमुचितः। दृश्यताम्——भाव्यमिदमेवास्ति, भाव्यप्रज्ञानं कुरु, भाव्यप्रबोधाय वेदवेदाङ्गान्यध्येयानि। अनेन हि सर्वसंसारबोधो भवतीति। यावच्च सर्वसिद्धान्तावबोधो न संभवति, तावत्सुखदुःखबद्धोऽयमात्मा भवति। अत्र चानेके विकाराः। वस्तुतस्त्वयमात्मा सर्वातीतः परः सर्वसंस्थितः, ॐकारात्मा प्रणसंज्ञश्च भवतीति विज्ञेयम्। अत एव——

"न चावश्यको धर्मरूपःप्रसिद्धः
सदा सिद्धसंगोचरो ब्रह्मरूपः।
निरीहोऽनिरीहोऽचिदंशश्चिदंशः
समानोऽसमानः समानन्दरूपः॥
स च व्यापकोऽयं ह्यखण्डस्वरूपो
न च व्यापको धर्मरूपो ह्यखण्डः।
सदा सत्यजः सत्यगः सर्वरूपः
समानोऽसमानः समानन्दरूपः॥
हरिर्नैव विष्णुर्महाविष्णुरूपो
जगन्मङ्गलो मङ्गलाकाररूपः।



सतां मङ्गलं सर्वतो भिन्नरूपः
समानोऽसमानः समानन्दरूपः॥
प्रकाशस्तमो नैव तद्भावनीयो
गुणो निर्गुणो निर्विकल्पः परेशः।
परो धर्मरूपो गुणानन्तरूपः
समनोऽसमानः समानन्दरूपः॥
अकारः परं तत्वमेकं ह्युकारो
मकारो महावेदसारः प्रचारः।
स्वयं सर्वसिद्धो ह्यतीतोऽयमात्मा
समानोऽसमानः समानन्दरूपः॥
सदाऽकालिकः कालजः कालसिद्धो
गुणानुप्रशस्तः क्रियाभावसिद्धः।
अनावश्यकोऽहं समावश्यकोऽहं
समानोऽसमानः समानन्दरूपः॥
न ऋग्वेदभावो यजुर्वेदभावो
न सामार्थसिद्धो ह्यथर्वार्थसिद्धः।
अतर्क्यः सदा सद्वितर्क्यः प्रसिद्धः
समानोऽसमानः समानन्दरूपः॥
न दृष्टान्तसिद्धो न सिद्धान्तसिद्धो
न साक्षात्प्रसिद्धो न चैवानुमेयः।

जगन्निर्णयो नैव निर्णेयरूपः
समानोऽसमानः समानन्दरूपः ॥
सदोङ्कारनिष्ठस्तदोङ्कारनिष्ठो
गुणोङ्कारनिष्ठः समः सर्वरूपः ।
विशुद्धः प्रबुद्धः प्रमाणेन सिद्धः
समानोऽसमानः समानन्दरूपः ॥
न चाकाशजो वायुजस्तैजसो वा
न चापःप्रसिद्धो धरित्रीप्रसिद्धः ।
महद्बुद्धितत्वात्मको नैव रूपः
समानोऽसमानः समानन्दरूपः ॥
समः सर्वसंस्थः सदा सर्वभावः
समस्याऽप्यभावो निरर्थः समर्थः ।
सदा सच्चिदानन्दरूपस्वरूपः
समानोऽसमानः समानन्दरूपः ॥
न वै वर्तमानो न चैवाधिभूतो
न सत्यं भविष्यो न वै गोचरोऽहम् ।
न नित्यः प्रनित्यः समानन्दनित्यः
समानोऽसमानः समानन्दरूपः ॥
न चेदं न चान्यन्न वाच्यो विधानं
न चैवान्तरं नापि देहादिकं स्यात् ।



न चैव क्रिया तन्मनो वा समूहः
समानोऽसमानः समानन्दरूपः ॥"

इत्यादि प्रवचनम् । एवमेवान्यत्रापि च—

"न सममिह समानं सर्वगं सर्वरूपं
न गुणमिह वितर्क्यं शुद्धबुद्धं प्रशस्तम् ।
प्रणतमिह परं तच्चेतसाऽसंविभाव्यं
विशदमिह विशालं सत्यमोङ्कारनिष्ठम् ॥
गणितमिह न गण्यं धार्मिकं धर्मरूपं
न भवमिह न भाव्यं सर्वभावप्रतिष्ठम् ।
करणमिह न कार्यं ह्यात्मरूपं तदेकं
सुखदमिह तदन्यं वेदवेदाङ्गगीतम् ॥
पठितमिह न पाठ्यं प्रार्थितं याचितं वा
लवितमिह न लाव्यं लाभहं तन्निषिद्धम् ।
तदिह गुणगणाढ्यं सत्यमोङ्काररूपं
न भवति परमात्मा प्रार्थितो वेदतत्वम् ॥
न भवति सुखमात्मा नैव सर्वाङ्गवेद्यो
न भवति गुणशीलो नैव मानं मितो वा ।
सकलमिदममोघं ब्रह्मरूपं समानं
ह्यजयमिदमनन्तं चादिहीनं प्रभिन्नम् ॥

प्रथितमिदमनन्यत्तत्वसर्वाभिधानं
न भवति च स देशी सर्वदेशी न चात्मा ।
न भवति च स भावो यश्च वेदान्तवेद्यो
न भवति च स भेदो येन चिन्त्योऽयमात्मा ॥
असति च वसतीशस्तत्वमेवं समस्तं
समधिगतमहिम्ना सत्यमोङ्कारगीतम् ।
भवनमिह हि शान्तं चञ्चलं चारुसिद्धं
भवनमिह समं स्याद्गौणमुख्याभिसिद्धम् ॥
तदिह विमल आत्मा निर्विकारो निरीहः
न सममिह न साम्यं ज्ञानकर्मादि भिन्नम् ।
प्रभवति स च काले सर्वगः सर्वनिष्ठः
प्रभवति परिणामी चाक्षुषो न प्रमेयः ॥
असति सति च निष्ठः सत्यसत्योवरिष्ठो
ह्यमननमयमन्यः सर्वमान्यः परोऽयम् ।
विगतसुगतभाग्यो ज्ञानगम्यः प्रवाच्यो
वचनमयमवाच्यः कालधर्माभिधेयः ॥
भवनमिदमवश्यं सर्वदावश्यकोऽहं
करणमयममोघं वेदवेदाङ्गगीतम् ।"

इत्यादि प्रवचनम् । ततश्चैवं भूतश्चायमात्मा वेदवेदाङ्गनिष्ठो विज्ञेयो भवति । तस्माच्छिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषं



ऋग्यजुस्सामाथर्वाणश्चैवं प्रकारेणात्मानं प्रवदन्तीति विज्ञेयम् । तस्मादेव हि चेत्थं सर्वाभिगतं सर्वस्थं सर्वैक्यं सर्वथा सर्वदा सर्वाध्ययनेन सर्वकार्येण सर्वाश्रयेण च, स्वात्मानं सर्वानन्दमयं ओङ्कारमयं प्रातिष्ठितं सर्वातीतं सर्वभूतं सर्वसंस्थितं च विद्धीति तु वेदवेदाङ्गसिद्धान्तः ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे वेदवेदाङ्गाध्ययनक्रमनिरूपणं नाम**
**॥ चतुर्दशस्तरङ्गः ॥**

ॐ

अथ

# पञ्चदशस्तरङ्गः ॥

अथ षडुपवेदाङ्गानि नियतानि भवन्ति तादृशानि । प्रणवसिद्धान्तप्रदर्शनपरत्वेन हि तेषामुपाङ्गानामावश्यकत्वं विज्ञायते । वेदवेदाङ्गानां च यत्तत्वं ज्ञानपरमिच्छापरं क्रियापरं परिवर्तनरूपं च, तत्सर्वमुपाङ्गेषु व्यवस्थितं भवति । उप, समवर्तनसिद्धान्तोऽभिवर्तते यस्मिन्, तदुपाङ्गमिति व्याख्यानात् । उपाङ्गानि च वेदसाध्यानि वेदानुभूतानि चेति विज्ञेयम् । अत एव "अङ्गसाध्या वेदाः,

वेदसाध्यान्युपाङ्गानि, अतः साङ्गोपाङ्गा वेदा ह्यध्येया भवन्ति" इत्याद्युपदिश्यते । अङ्गानि च व्याकरणादीनि भवन्ति । तैश्च पुनर्वेदमात्रस्य पूर्णो बोधो भवति । पुनस्तद्वेदप्रकारव्याख्यानं च तदुपाङ्गैर्विज्ञेयं भवति । अत एव—

"साङ्गोपाङ्गमधीत्यैवं वेदतत्वं यथायथम् ।
प्राप्यते ब्रह्मभावश्च नित्यः प्रणवसंमतः ॥
अयमात्मा निराधारो निराधेयो निरामयः ।
समस्तं त्रितयं ब्रह्म सर्वानन्तमगोचरम् ॥
अतीताद्यन्तरहितं समभूतं सनातनम् ।
अङ्गोपाङ्गपरं विद्धि सर्वस्वं ज्ञाननिश्चितम् ॥
सर्वज्ञानस्य मूलं स्यादोमेतत्त्यक्षरं परम् ।
सर्वसंपन्नहेतुस्थं सर्वकारणकारणम् ॥"

इत्यादि प्रवचनम् । ततः सिद्धान्तस्यातिविस्तृतत्वाद्वेदवेदाङ्गप्रकार-बोधनात्मकान्युपाङ्गानि भवन्ति । संसारेऽस्मिंश्च विस्तारोऽल्पत्वं च सर्वथा सिद्धं भवति । यो हि विस्तारः, तस्याल्पत्वं च नियतम्, यदल्पम्, तस्य विस्तारश्चापि नियतो भवतीत्येव संसरणगतिर्विज्ञायते । अत एव—

"अल्पविस्तारयोर्योगाद्भवेत्सांसारिकी क्रिया ।
संप्रसिद्धा परा चैवं निर्दिष्टा प्रणवाभिधा ॥"



इत्यादि प्रवचनम् । तदेवं विधानेन प्रणवात्मकमिदं विस्ताराल्पत्वम्, सर्वावश्यकत्वेन तदावश्यकं भवतीति व्याख्यानफलम् । वस्तु-तस्त्वयमात्मा नाल्पो न च विस्तारश्च भवति । अत एव—

"न चैवाल्पभावेन युक्तोऽयमात्मा
न वा विस्तृतत्वेन सिद्धोऽयमात्मा ।
अणुर्नैव रूपान्तरस्थोऽयमात्मा
न वा विस्तृतो नाल्पसिद्धः समस्तः ॥
निरस्तः परो भावरूपोऽयमात्मा
ह्यनाद्यन्तभिन्नः प्रकृष्टोऽयमात्मा ।
सदैवाहमेतन्नकारोऽयमात्मा
ह्यतीतात्ययं गोचरं नैव किञ्चित् ॥
शुभो गौरवो वा लघुश्चायमात्मा
ह्यणीयान्महीयान्वियुक्तोऽयमात्मा ।
सदैवाहमेतन्नकारोऽयमात्मा
सदा सर्वगःसच्चिदानन्दरूपः ॥"

इत्यादि प्रवचनम् । तस्मादेवं विधानेनोपाङ्गपरमात्मानं विस्तारानु-प्रवचनरूपत्वेन विद्धि । एवं साङ्गोपाङ्गो वेदश्च सामान्यावधारण-परः सार्वत्रिकः सर्वसिद्धान्तप्रबोधकश्चेति विज्ञेयो भवति । अन्यथा तु प्रत्येकमणूनां तादृशैकत्वप्रतीत्या बाहुल्यं सिद्धमेव । तत्र च ह्यनन्ता सृष्टिः, अणूनामनन्त्यम्, तथा चानन्तं जगत्, जगति

चानन्ता ह्यणवः, तस्य तस्य च तादृशानन्तावधारणमिति च बोध्यम् । यथा—

“ तदेकाणुभूतं जगत्सिद्धमेकं
  जगत्सिद्धमेकं ह्यणुत्वं ह्यनन्तम् ।
पुनस्तत्परं तत्परं चैकभावं
  सदा भावमाभावरूपं प्रमेयम् ॥
अणुर्भूत एवं जगद्भूतमेवं
  परं सर्वगं सर्वतत्वं तदेकम् ।
सदा जायते श्रीयते वर्धते वा
  सदा नश्यते भाव्यते चैकभाव्यम् ॥
न चावश्यकोऽयं ह्यनावश्यकोऽयं
  सदावश्यकोऽयं न लोकप्रसिद्धः ।
सदा सर्वदा सर्वशुद्धप्रबुद्धं
  जगन्मङ्गळं मङ्गळं मङ्गळस्थं ॥
सदा ज्ञानरूपं सदा भक्तिरूपं
  सदा कर्मरूपं स्वयं सर्वसिद्धम् ।
अतोऽहं ह्यसर्वं ह्यसर्वं च सर्वं
  ह्यसर्वं परं भावनीयं हि तत्वम् ॥
गुणानन्तरं ज्ञानगम्यं विलक्षं
  महानन्दमानन्दमानन्दरूपम् ।



जगन्मङ्गळोङ्कारमाकारमेवं
  निराकारमाकारयुक्तं तुरीयम् ॥

सदैवायमात्मा परः सर्वनिष्ठः
  सदा सत्यमोङ्काररूपस्वरूपः ।
न चाहं न चैतन्न नेति प्रसिद्धः
  परोऽहं परोऽहं परोऽहं परोऽहम् ॥

अपारो ह्यसारस्तथासारसारो
  जगत्सारभूतो ह्यणुः सारभूतः ।
स्वयंभूः परः सर्वनित्यः प्रशस्तः
  परोऽहं परोऽहं परोऽहं परोऽहम् ॥”

इत्यादि प्रवचनम् । तदित्थं भूतश्चात्रैव सोऽयमात्मा तदुपाङ्गसिद्धत्वेन बोध्यो भवति । षडुपाङ्गानि तादृशानि चैकसिद्धान्तपराणीति विज्ञेयानि । तानि च—वेदान्तमीमांसान्यायवैशेषिकयोगसांख्यानीति प्रसिद्धानि भवन्ति । यद्यप्येषां पृथक्पृथक्सिद्धान्तः, तथापि सत्ताप्राधान्येन, अहमेतन्नेति वाचकतया, संसाराद्युपहेतुतया चैकत्वमेव तत्सिद्धान्तानामिति निर्णयः । यद्यपि ब्रह्मणः संज्ञापि नाना षड्भिरेभिरङ्गैरुपस्थिता भवति, तथापि त्रितयस्य सार्वत्रिकत्वात्तस्य चैकत्वाच्च तदेकत्वमेव बोध्यं भवति । अत एव—

" उपाङ्गनियताश्चैव षट्प्रकाराः परायणाः ।
अङ्गैश्च विहितं सर्वं तादृशं स्यात्परावरम् ॥
वेदब्राह्मणयोर्भावो ह्युपवेदाद्यवस्थितः ।
तस्य स्याद्वाचकत्वेन षडङ्गं च सनातनम् ॥
वेदप्रकारसिद्धान्तो व्याख्यातो विस्तरेण हि ।
वेदानां मूलमंत्रेण प्रसिद्धः प्रणवस्थितः ॥
व्याख्यातस्तत्वतो नित्यं वेदोपाङ्गे यथायथम् ।
वेदान्तश्चापि मीमांसा न्यायो वैशेषिकस्तथा ॥
योगः सांख्यं क्रमेणैवं षडङ्गानि भवन्ति हि ।
साङ्गोपाङ्गं परं ब्रह्म ताभ्यां वेद्यं सनातनम् ॥
अहमेतन्नेति सर्वं प्रदिष्टं स्यात्परावरम् ।

इत्यादि प्रवचनम् । ततश्चैवं प्रकारेण वेदान्तमीमांसान्यायवैशेषिक-योगसांख्यानि षडङ्गानि चैवं क्रमेण नियतानि भवन्तीति, एतेषां विषयोऽपि तादृशः पृथक्त्वैकत्वयुक्तो भवतीति च विज्ञेयम् ।

अथ च वेदान्तः प्रथमो भवति । अत्र जिज्ञासामात्रस्यारंभः अतस्तस्य मुख्याङ्गत्वेन प्रवचनम् । अत एव—

" वेदान्तः सर्वतः श्रेष्ठो ब्रह्मबीजप्रबोधकः ।
तयोश्च प्रोच्यते माया नियता त्रितयात्मिका ॥ "

इत्यादि प्रवचनम् । तस्मात्सार्वत्रिकस्य त्रितयस्य सर्वस्य च



निश्चयोऽनेन भवतीति स्पष्टं सिद्धान्तितं भवति । तस्मादेव सर्वे च वेदान्ता ब्रह्मपरा विज्ञानप्रतिष्ठिताश्च भवन्तीति विज्ञेयम् । अतश्च वेदान्तानाम्, त्वात्मपरत्वादात्मनो मुख्यत्वाच्च मुख्यो पाङ्गत्वम् । अत एव हि ब्रह्मजिज्ञासामात्रं सर्ववेदान्तप्रदर्शितं भवति, " आत्मनो हि बोधानुष्ठानं सिद्धान्तः " इति ब्रह्मसूत्रात् । " जिज्ञासामात्रमात्मतत्वप्रतिष्ठितम् " इत्यनुमानप्रवचनाद्वा । तस्मादणूनां च प्रत्येकम्, अभिधानं कार्यं अवस्था जिज्ञासा चेत्येतेषां विधानेन वेदान्तानुभाव्यं विज्ञेयं भवति । अत एव—

" यं ब्रह्मेति वदन्त्येवं सर्वे वेदान्तिनस्तथा ।
स ब्रह्मेत्यहमेवास्ति प्रत्यण्वपि विभासते ॥
योऽयमात्मा परोऽरूपः सर्वभिन्नः परायणः ।
स चैवाहं स चैवाहं स चैवाहं वदन्ति ते ॥ "

इत्यादि प्रवचनम् । अत्र हि त्रित्वप्रकारश्चाहंशब्दप्रयोगः । इदं चात्र कारणम्—यदहं तदेतत्, यदेतत्तन्न यन्न तदहमेतदित्यादि कार्यं सर्वं वेदान्तेष्वाख्यातं भवति । अणूनां च प्रत्येकं प्रधान-सत्ता चैकरूपा भवति, " तदन्तर्गताश्च सर्वाः क्रिया भवन्ति । तत्क्रियान्तर्गतः सर्वात्मा, सर्वात्मान्तर्गतं त्रितयं ब्रह्म परायणं बोध्यमित्यादि सर्वं वेदान्ते व्यवस्थितं भवति । परमाणूनां च प्रत्येकं या वा प्रधानसत्ता, यश्च प्रधानव्यवसायः, यच्च तद्व्य-वसायफलम्, यच्च तत्सामान्यं विशेषश्च तत्सर्वमेवं वेदान्तेन

बोध्यं भवति । तस्माद्वेदान्तिनामिदं प्रवचनं प्रसिद्धम्—सर्व-मिदम्, सर्वस्येदम्, नाहमा तु कुत्र चित्परिगणना भवतीति । किं त्वहमो ह्येतदो नकारस्य च समात्मकत्वं समानशीलत्वं साम्यं वा सार्वत्रिकत्वं ब्रह्मस्वभाव इति विज्ञेयम् । अत एव "अहं परं ब्रह्म विज्ञानमूलं क्रिया हि सार्वत्रिकी सार्वत्रिकोऽयमात्मा चैवं स्वतस्सिद्धः सर्वभिन्नोऽयमात्मा इत्यादि प्रवचनम् । तस्माज्ज्ञान-विषयं सांसारिकं च सर्वं वेदान्ते व्यवस्थितं भवति । अत एव प्रथमसूत्रम्, "अथातो ब्रह्मजिज्ञासा" इति स्पष्टमुक्तं भवति । अथ एतत्संसारविज्ञानानन्तरमेतत्संसारप्रदर्शनानन्तरं वा, सुख-दुःखस्वभावाभिज्ञतया ब्रह्मैकत्वं तज्ज्ञातव्यमिति बुध्या वेदान्तो ह्यध्ये-तव्यो भवति । यद्यप्येवं भावोऽस्य भवति—यदिदं वेदादिकं पूर्वमुपन्यस्तम्, तच्च भिन्नं प्रवचनरूपम्, तदभेदप्रवचनमस्य कर्तव्यमित्यभिप्रेत्य वेदार्थविज्ञानानंतरं ब्रह्मजिज्ञासा भवतीति ; तथापि वेदमात्रानुरोधेन महाविष्णोरवधारणरूपेण प्रणवनिष्ठेन च तदनुपयुक्तं भवति । वेदमात्राध्ययनानन्तरं तु सर्वजिज्ञासा-मात्रस्य विनाशो भवति । वेदस्य चायं परमः सिद्धान्तो भवति—यो हि जानाति स न किञ्चिज्जानाति, यो हि न जानाति स च सर्वविज्ञानी भवति । ततश्च वेदाध्ययनानन्तरं ब्रह्मजिज्ञासाया असंभव एवेति विज्ञेयम् । तथा च—एतत्संसारप्रवेशानन्तरं नाम, सांसारिकसुखदुःखस्वरूपविज्ञानानन्तरं च वा ब्रह्मजिज्ञासा तथैतस्य द्वित्वमात्रस्य मूलज्ञानकामना च वा भवतीति विज्ञेयम् ।



इदं तु निश्चितं भवति—यस्य हि द्वित्वं तस्य चैकत्वमावश्यकं द्वित्वमात्रे संबन्धानुभवात्, यदि चेत्केन चित्प्रकारेण चैकत्वं नास्ति, तर्हि द्वयोः संबन्धस्यासंभव एव, संबन्धानामेकत्वानु-प्रदर्शनमिति न्यायाधिकारात्, अत्र चाणूनां प्रत्येकमप्येकेन संबन्धः, तन्मूलं च सत्ताप्राधान्यमैकाधिकरण्यमेवेति विज्ञेयमिति । तस्माद्वेदान्तमात्रे सर्वस्यैकत्वविज्ञानमुच्यते । तस्मात्सर्वविजिज्ञासा-याश्चोत्तरं वेदान्ते स्पष्टमुक्तं भवति । अत एव—

"यज्जगद्भासते चेदं साक्षाद्दृष्टं यथाभवम् ।
स्वयं भूतं स्वयं भाव्यं स्वभावावश्यकं परम् ॥
जिज्ञासा जायते तत्र चाणोः स्यादेकभाव्यता ।
तदुत्तरं च वेदान्ते संसारज्ञानकारणम् ॥
एतत्संसारमात्रे तु यज्ज्ञानं चानुवर्तते ।
सर्वं चात्मपरं विद्धि ह्यात्मा मुख्यो निरामयः ॥
अतो वेदान्तिनस्तत्वं जानन्ति ब्रह्ममूलकम् ।
द्वित्वमात्रे हि चैकत्वं वेदान्तेन हि बुध्यते ॥"

इत्यादि प्रवचनम् । एवमेव—

"सर्वं वेदमयं परावृतपरं संसारसारावळी-
विद्याज्ञानमपारसागरपरं माया च हारावळी ।
एकत्वं सकलं प्रयाति निखिलं वेदान्तसारानुगं
सर्वं ब्रह्मपरापरं परिवृतं सवार्थजं सर्वगम् ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वानुगतः सर्वसारः सार्वत्रिकः सर्वतत्वप्रवाचको वेदान्तो बोध्यो भवति । अन्यथा त्वयमात्माऽजिज्ञास्योऽज्ञेयोऽवाच्योऽप्रतर्क्यश्च भवति । अत एव—

"न च ज्ञानविज्ञानसिद्धोऽयमात्मा
न जिज्ञासया कल्पितो नायमात्मा ।
स्वभावान्तरो नाभिषिद्धोऽयमात्मा
गुणादिप्रभिन्नो विचित्रोऽयमात्मा ॥

इदं ह्यत्र चैवं प्रवेद्यं तदेवं
परं त्वत्र चैतत्प्रचारः प्रधानम् ।
सदा शुद्धसंक्षिप्तरूपोऽयमात्मा
सदैवाहमस्थः प्रविष्टोऽयमात्मा ॥

इदं ब्रह्म मायापरं जीववेद्यं
तथैवायमात्मा परस्थः परात्मा ।
न च प्रत्यगात्मा न वा चेश्वरोऽयं
वियद्व्यापकोऽयं ह्यखण्डोऽयमात्मा ॥

न यस्यास्ति रूपं न संशुद्धमेतत्
न यस्यास्ति वाक्यं न वै वाचकत्वम् ।
न चाऽवाच्यमेवं न वा वाच्यमेवं
सदैवाहमेतन्नकारोऽयमात्मा ॥"



इत्यादि प्रवचनम् ।तस्माद्वेदान्ताख्यमुपाङ्गं जिज्ञासापरं संसाराद्वित्वैकत्वबोधकं वेदितव्यम् ।

ततः परं मीमांसोपाङ्गं द्वितीयं कर्मपरं भवति । तत्रापि पूर्वमुत्तरमपरं चेति भागत्रयं भवति । पूर्वमीमांसायां त्वात्मविषयकर्मणां प्रवचनम्, उत्तरमीमांसायां कर्ममात्रस्यानुवर्णनम्, अपरमीमांसायां प्रळयमात्रानुवर्णनं निषेधजं चेति विज्ञेयम् । एतत्समाहरणं तु मीमांसैवेति विज्ञेयम् । एवं त्रितयं तु सर्वत्र व्यवस्थितं भवति । वेदान्तेऽपि, एवं प्रकारं जिज्ञासाभवनं तदुत्तरं परितोषश्च दृश्यते । अत एव—

"प्रत्येकं तदुपाङ्गानां तादृशी त्रिविधा क्रिया ।
अकारोकारमकारसंस्थिता सर्ववर्तिनी ॥
जिज्ञासा त्वुत्तरं चैव परितोषस्त्रयात्मकाः ।
प्रणवार्थपराश्चैव वेदान्ताः संप्रतिष्ठिताः ॥
एवं मीमांसया साध्यं त्रितयं प्रणवस्थितम् ।
पूर्वमुत्तरसंपन्नं परं त्रितयगोचरम् ॥"

इत्यादि प्रवचनम् । ततस्तादृशमुत्तरपूर्वापरं पूर्वोत्तरापरं च समाहृतं बोध्यम् ।

अस्यां हि पूर्वमीमांसायामात्मपराणां च कर्मणां यथावद्व्यवहारश्च प्रतिपादितो भवति । किं च योऽयमात्मा येन येन च भावेन गर्भमधिशेते, या याऽवस्था चास्य संभवति, येन येन

चायमुपन्यस्तो भवति, प्रकारेण च येनास्य रक्षणादिकं भवति, तत्सर्वमत्राख्यातं भवति । पुनरेवमुत्तरमीमांसायामपि तद्व्यवहार-प्रबोधनव्यापारश्चोक्तो भवति । ततश्चैवं प्रळयकर्मणां व्याख्यानम्, प्रळये च या याऽवस्था भवति, यां चावस्थां प्राप्य प्रळयो भवति, तत्सर्वमपरमीमांसायां बोध्यं भवति । कर्माख्यानत्वादे-वास्य मीमांसेति संज्ञापि चोच्यते । एवं हि किल मीमांसाशब्दो व्याख्यायते—या च मी, सा मृतमेतत्, यश्च मा, स समोऽय-मात्माऽहं परः, या च सा, तन्नकारस्थं प्रळयात्मकं संबन्धरूपं च भवतीति । एतयैव सर्वं कर्म भवति । अतो म्यां मांसा भवन्तीति तद्व्याख्यानफलमुक्तं भवति । अतो मांसयोरभिवर्तनं तयोर्व्या-वर्तनं च, म्यां मृतक्रियायां भवतीति बोध्यम् । तस्मात्कर्मत्रय-वाचिका मीमांसेति संज्ञोक्तिः ।

यद्यपि मीमांसायामेवं प्रवचनमस्ति—

“ कर्तव्यश्च द्विधा यज्ञो नित्यो नैमित्तिकस्तथा ।
पशुं हत्वा बलिं दत्वा यष्टा स्वर्गमवाप्नुयात् ॥
सर्वलाभो भवेद्यज्ञात्सौत्रामण्यां सुरां पिबेत् ।
यज्ञमांसं च भोक्तव्यं भुक्त्वा मोक्षमवाप्स्यसि ॥
यज्ञीयां च सुरां तां हि पिबेदमरवारुणीम् ।

इत्यादि प्रवचनम्, तथापि—

“ कर्मणा मोक्षमाप्नोति कर्म मीमांसयेरितम् ॥



कर्तव्यं क्रियतां नित्यमात्मतत्त्वपरायणम् ।
नानुहिंस्यो न हन्तव्यो हन्यमानो न हन्यताम् ॥

सर्वं सदेकवन्मत्वा सर्वाणौ संप्रतिष्ठताम् ।
क्रियतां सर्वथा प्रीतिरात्मा सर्वत्र विद्यते ॥ ”

इत्यादिवचनेन ह्यविरोधो द्रष्टव्यः । दृश्यताम्—एकस्मिंश्च स्थले परस्परविरुद्धानां ह्यनुपस्थितिरेवेति सिद्धान्तो निश्चित इति । इयमेवानुपस्थितिर्भवति, यस्य यस्य च परस्परविरुद्धत्वम्, तस्य तस्य तत्र तत्रानुपस्थितिरेवेति । अन्यथा तु सर्वस्य सार्वत्रि-कत्वात्, सर्वत्र सर्वोपस्थितिरिति च व्याख्यानफलं विरुध्यते । यद्यप्येवं कर्मणां मोक्षसाधकतमत्वमाख्यातम्, तथापि तत्र ज्ञाना-द्युत्पत्तौ सत्यामेव कर्मणः संभवः । अन्तरा च ज्ञानं न किंचिदपि कर्म भवतीति, परिभावनया, यावन्न जानासि तावत्किं करोषि किं च करिष्यसीति व्यवसायफलाख्यानेन च बोध्यम् । तस्मात्केवलेन च कर्मणा मोक्षकथनमसङ्गतं भवति । यदि चास्त्येव कर्मणा मोक्षः, तर्हि सोऽयं ज्ञानेच्छापरो बोध्यः । यद्यपि कर्म च सर्वं सर्व-प्रकारभूतम्, तथापि सर्वैश्च कर्मभिरपि मोक्षो ह्यसंगत एवेति विज्ञेयम् । यद्यपि सर्वतो भिन्नो नकार एव, तथाप्यावश्यकेन योगेन साधकतमत्वमसाधकतमत्वं च स्पष्टमुक्तं भवति । मोक्षसाधकतमत्वं च तादृशानां कर्मणामेव, यत्र च येषां चावश्यकत्वं समुपस्थितं भवति । सति च सर्वस्मिन्नावश्यकत्वे,

सर्वस्यैकवद्भावारोपे च सति, सर्वक्रमविनाशो नियतः । अन्यथा क्रमविनाशे दोषः संभवति । तस्मात्सर्वमेककालिकं नाम करणीयम् । किं तु यदा यदा च यस्य यस्य वा ह्यावश्यकता, तदा तदा तस्य कर्तव्यत्वमेव विज्ञायते । विधानेन चानेन मांसहव्यकव्यप्रदानमुक्त्यनुगतमनुपयुक्तं भवति । पशुहननं तु यज्ञे, पदार्थावगमनं भवति । "हनहिंसागत्योः" इति धातोः सन्निधानेन, द्व्यर्थानुगततद्धातोरर्थद्वयस्य चारितार्थ्यकल्पनं समुचितं भवति । मोक्षसाधकत्वविषये स्वर्गलाभसाधकत्वविषये च पदार्थावगम एव हनधात्वर्थ इति वक्तुमुचितो भवति । गतिर्गमनम्, गतिर्मोक्षः, गतिः प्राप्तिः, गतिर्ज्ञानम्, इति भेदचतुष्टयम् । अतो पदार्थानामवगमनं हि प्राप्तिकरणं भवति । तस्माद्यज्ञे, पशुं हन्यात्, इत्यस्य पशुसंज्ञकान्पदार्थानवगच्छेदित्यर्थः समुचितो भवतीति विज्ञेयम् । तथा सौत्रामण्यां सुरां पिबेदित्यपि युक्तं भवति । सुरा चामृतद्रवः, तच्च पिबेदिति तदर्थो विज्ञेयः । ब्रह्मभावं प्राप्यामृतत्वमायातीति तु, तद्रवपानमित्यस्यार्थ इति विज्ञेयः । अत एवामरवारुणीं पिबेदिति भावः सङ्गच्छते । तस्मादेव मोक्षः प्राप्यते । मोक्षसंबन्धिकर्मण एव प्रयोगौचित्यम् । अत एव—

"यथामोक्षं कर्म कार्यं कुरु सर्वं च सर्वथा ।
कुर्वन्मोक्षमवाप्नोति लभेदमरवारुणीम् ॥



यस्याः पाने कृते चैवं पुनर्जन्म न विद्यते ।
पशून्हत्वा बलिं दद्यात्स्वर्गः संप्राप्यते ततः ॥
पूर्णा मनोरथाः सर्वे कृतयज्ञानुभावतः ।"

इत्यादि प्रवचनम् । तस्मादित्थं भूतां सुरां मांसं च यज्ञशिष्टं भोक्तव्यम् । मांसश्च मानसवृत्तिजो व्यापारः । मांसादिके तु पशुसंबन्धिनि सर्वथा निषेध एव । निषेधकारणमिदं भवति—यादृशं च यस्यान्न तादृशं हि तत्कार्यमपि भवति, अन्नाद्धि शरीरसंभव इति बीजात्, शरीरानुसारिणी वृत्तिरिति व्याख्यानाच्चेति । पशुमांसादीनां तादृशी वृत्तिर्भवति । तया च सांसारिकस्थूलक्रियाकारणं संभवति । अणोरन्तर्गतश्च जगद्विचारः, जगदन्तर्गतश्चाणुविचारः । तस्मात्तन्निषेधः सर्वथैवेति विज्ञेयः । तस्मान्मीमांसाशास्त्रस्य परमसिद्धान्तभूतं कर्मविधानम्, सार्वत्रिकं सर्वोपकारकं सर्वावश्यकसाधनं च कर्म, मोक्षप्रदं ब्रह्मभावकल्पनारूपं च भवतीति विज्ञेयम् । वस्तुतस्त्वयमात्मा न मीमांसया वेदान्तेन वा निर्णेयः । यथा—

"न चैवायमात्मा परः कर्मसिद्धो
न मीमांसया वेद्यरूपः प्रशस्तः ।
अजश्चामृतो मानसः कर्मभावः
स सत्यं समानन्दरूपो विधिस्थः ॥"

इत्यादि प्रवचनम् । तस्मान्मीमांसाशास्त्रं कर्मपरं च विधानेन बोध्यं भवति । अणूनां च प्रत्येकमपि यथायथं कर्मणां प्रतिपादनं

प्रणवपरं वेदितव्यं भवति । यश्च कश्चित्पुनरनात्मव्यवहारः सनातनः, स च मीमांसानुप्रवचनपर एवेति निश्चयः । इदं च सर्वं तादृशमकारादिक्रमेण व्याख्येयमिति विज्ञेयम् ।

एतच्च मीमांसाविहितं कर्म तादृशं त्रिविधम्, प्रारब्धं सञ्चितं प्राप्तं चेति । प्रारब्धं कर्म तु पूर्वकृतम् । यच्च पूर्वं कृतम्, तस्यैवाद्य भोगः संभवति, इति हि प्रारब्धफलं विज्ञायते । यद्यपि तात्कालिकमिदं जगत्, इति प्रवचनम्, तथापि कालस्य सर्वातीतत्वात्, प्रणवपरत्वाच्च सर्वथा स च काल एवेति तद्विज्ञेयम् । अत एव वर्तमानाद्यश्चापरः काल उक्तो भवति । ततः प्रारब्धस्य हीदानीं भोग इति विज्ञेयम् । यावच्च परिपाको न संभवति, तावद्भोगस्यासंभव एवेति लोकोदाहरणेन बोध्यम् । यथा— अस्ति कश्चिदिदानीं बालकः, स च न पूर्वकालकार्यकर्ता भवति, किं तु क्रमेण प्राप्ते सति तस्मिन् तस्मिंश्च काले, बाल्यकौमारादिवयोनियमेन कार्यकरणे प्रवृत्तो भवति, एवमिदानीं भुक्तमन्नं भोक्तृपुष्टिकारकं परिपाके सत्येव भवतीति । अत एव कषायं परिपक्वं च फलप्रदं सुखप्रदं च भवतीति विज्ञायते । तस्मात्प्रारब्धानां च पूर्वेषां कर्मणामद्यैव भोगो भवति । अद्यतनानां हि कर्मणां कालान्तरे हि भोग इति नियमेन सर्वेषां च कर्मणां प्रारब्धरूपत्वं सिद्धं भवति । एवं सञ्चितमपि कर्म प्रारब्धभेदरूपमेव । यश्च प्रारब्धे क्रमः, तस्य चेदानीं प्राप्तिः । तदनन्तरं हि, इदं पुनरिदमिति सञ्चितं



कर्म भवति । प्राप्तं चेदं कर्म भवति, यदिदानीं क्रियते तस्यान्यकाले प्राप्तिर्भवतीति प्राप्तकर्माशयः । प्रारब्धं सञ्चितं प्राप्तं चेति तु कर्मणां त्रिविधमवस्थास्वरूपं भवति । प्रकृष्टेन च स्वयत्नेन यदारब्धम्, तत्प्रारब्धमिति प्रारब्धशब्दार्थः । प्रारब्धान्तर्गतमेव हि सञ्चितं भवति । प्राप्तं च प्रारब्धस्यैव भूतभविष्यवर्तमानरूपं चेति यथायथं बोध्यम् । अत एव—

"प्रारब्धान्तर्गतं सर्वं सञ्चितं प्राप्तमेव च ।<br>
प्रारब्धं परमं विद्याद्विषयः प्रणवो मतः ॥<br>
पूर्वं यच्च कृतं चास्ति तच्च प्रारब्धसंज्ञकम् ।<br>
तत्र यद्व्रियते नित्यं क्रमात्तत्सञ्चितं भवेत् ॥<br>
यच्चैव क्रियतेऽद्यात्र तत्प्राप्तं चेति बुध्यताम् ।<br>
इदमेव हि सादृश्याद्भवेत्प्रारब्धसंज्ञकम् ॥<br>
तस्माद्वै त्रितयं कर्म समाहारपरं भवेत् ।<br>
मीमांसाशास्त्रसंपन्नं प्रविष्टं प्रणवावृतम् ॥"

इत्यादि प्रवचनम् । तस्मान्मीमांसापरं प्रारब्धादिकं कर्म विषयभूतं यथायथं नियोजितं भवति । तस्मादेवं प्रकारकं प्रारब्धादिकमेव सर्वथा प्राप्नोतीति विज्ञेयम् । वस्तुतस्तु न चैवैतदात्मनः प्रारब्धाद्यनुभवो भवति । यथा हि—

"न चैवायमात्मा महान्सञ्चितार्तो<br>
न वै सञ्चितं प्राप्यमानं न किञ्चित् ।

न चारब्धभूतं परं नैव किञ्चित्
न च प्राप्तमप्राप्तमेवं न च स्यात् ॥
न च प्राप्तमप्राप्तसंभावनीयो
गुणानन्तरूपः समानन्दवेद्यः ।
सदा सुप्रकाशो निराभासरूपो
ह्यनात्मा परो वेदतत्वं न जाने ॥"

इत्यादि प्रवचनम् । तस्मात्तादृशो हि मीमांसकसिद्धान्तः प्रशस्तो भवतीति बोध्यम् । इदं च सर्वं हि भवति कर्मशास्त्रम् । अस्मादेव हि शिल्पशास्त्राद्युत्पत्तिर्विज्ञायते ।

ततः परं न्यायाख्यमुपाङ्गं तृतीयं भवति । कार्यनिर्णायकत्वेनास्य स्वरूपं व्यवस्थितं भवति, सर्वपदार्थानां याथार्थ्यप्रबोधाय न्यायोपाङ्गमध्येयमित्युपदेशात् । अयमेव हि निर्णयो भवति—योऽयमात्मा स चानात्मभिन्नः, यश्चानात्मा स चात्मभिन्नः, द्वयोरनभिन्नत्वं च परमः सिद्धान्त इति । द्वाभ्यां च विरुद्धप्रदर्शनाभ्यां निर्णयो हि निश्चितः सिद्धान्तः । तथा च यथायथं प्रयोजनानामैक्यं पदार्थैक्यं च भेदप्रदर्शनमात्रपरमेवेति विज्ञेयम् । तन्निर्णायकत्वेन ह्यभिधानमनेकं भवति । तथा हि—प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवेत्यादयः षोडश प्रकाराः । सर्वं चैतज्ज्ञानेच्छाक्रियाजायमानमिति विज्ञेयम् । संसारेऽस्मिंश्च चत्वारः पदार्था भवन्ति परिवर्तनपराः, ते च ज्ञानेच्छाक्रियासमाहारा



भवन्ति । एतेषां परिवर्तनेन हि सर्वा संख्या पुनरनन्ता त्वतीता च भवति । वस्तुतस्त्विमे च चत्वारः सर्वत्र संस्थिता भवन्ति । पुनश्चतुर्णामपि परस्पराश्रयत्वेन चैक्यमपि विज्ञेयं भवति । अत एव हि "एकस्मादनन्तः प्रजायते" इत्याद्युक्तिः । एवं भावेन हि चतुर्णां परिवर्तनमेव सर्वमूलं भवति । या च संख्या यादृशी भवति, तादृशं तत्परिवर्तनं भवति । एवं व्यवहारेण पुनः सा परिवर्तिता संख्या स्वात्मानं परिवर्तयतीत्येवं व्यवहारेण सर्वमिदं जगत्प्रशस्तं भवति । यथा—चैकस्माद्वृक्षाद्वीर्यं चानेकं संजायते, एवमेकवीर्यादनेकत्वम्, तद्वीर्यजायमानो यो वृक्षः, स एव तदनुभावको भवति, अन्ये सर्वेऽपि च तद्वृक्षजायमाना भवन्तीति । एवं तद्भेदभावः । यद्यपि तत्रापि वीर्यवत्ता तिष्ठति, तथापि भवनप्रबन्धेन तद्वीर्यस्य व्यवहितत्वं सिद्धमिति विज्ञेयम् । यद्यप्येवं सर्वासां संख्यानां परिवर्तनं भवति, तथापि चतुर्भिः चतुर्णां परिवर्तनं, त्रयाणां त्रिभिः परिवर्तनम्, तथा द्वयोर्द्वाभ्यां, एकस्यैकेनेति हि विज्ञेयम् । सत्येवं परिवर्तमाने सर्वथा परिवर्तनं भवति चानन्तं परं च ।

इत्थमेव हि सृष्टिः । यथा—चतुर्णां परिवर्तने हि षोडश, तथैव षोडशानां परिवर्तनेऽपि चतुष्षष्टिरिति व्यवहार इति । एवमेव हि सर्वगणनामात्रस्य परिवर्तनं सर्वैश्च सह भवतीति संख्याशास्त्रैः स्पष्टमुक्तं भवति । यद्यपि चतुर्णां त्रिभिर्द्वाभ्यामेकेन

च परिवर्तनम्, तथापि सर्वसंख्योत्पत्तये चैतत्परिवर्तनं तादृशं युक्तमेव । एवमेकस्मिन्ननेकपरिवर्तनं चतुर्थांशेन चार्धव्यवहारेण भवति । तथा पुनश्चार्धे चतुर्थांशेऽपि तादृशार्धत्वं चतुर्थांशत्वं च प्रतीयते। एवं सृष्टेरुपाख्यानं चानन्तं बोध्यम्। तस्मात्सर्वाङ्कानां सर्वाङ्केन परिवर्तनं तादृशं तत्प्रबोधनार्थकं च वेदितव्यं भवति ।

अत एव महान्यायशास्त्रे पदार्थानां शतं सहस्रं च समुपन्यस्तं भवति । अत्र हि षोडश पदार्थाः निर्णयसाधकाः प्रयुज्यमाना भवन्ति । वस्तुतस्तु त्रयः पदार्था मुख्याः, तेच प्रमाणप्रमेयसंशयाख्या भवन्ति । ज्ञानांशं च प्रमाणम्, ज्ञानेन हि सर्वनिश्चायको निर्णयो भवति। एवं प्रमेयोऽनात्मरूपः क्रियापरः। आत्मानात्मनोः संमुखीकरणं हि ज्ञानम्, ज्ञानविषयश्च ज्ञेय इति हि विज्ञायते । यद्यप्यात्मानात्मनोर्मध्ये ज्ञानस्य योगरूपत्वात्, द्वयोः परस्परत्वेन ज्ञानरूपत्वं ज्ञेयरूपत्वं च समुपन्यस्तम्, तथापि द्वयोराधाराधेयरूपत्वात्परस्परमभिन्नतया साम्यं व्यवस्थितं भवति । तथा च ज्ञानमात्रस्य सत्ताप्राधान्येन चित्स्वरूपोऽयमात्मा भवति, ज्ञानासत्स्वरूपक्रियारूपोऽनात्मा ज्ञेय इति च विज्ञेयम् । इत्थं हि किल श्रूयते—यो ह्यत्र, सोऽहं सर्वेषां कर्ता नियन्ता भोक्ता च भवति, अहं करोमि, अहं भवामि, अहं बह्वस्मि, अहमन्यः, अहमित्थम्, अहं तथा, अहं यथा, अहं सर्वथा, अहं सर्वदा, सर्वत्राहम्, इत्यहमेव सर्वत्र भासते, अन्येषां च सर्वपदार्थानामेतत्वेन प्रवचन-



मिति। तस्मादेव चैतदो ज्ञेयत्वम्, अहमो ज्ञातृत्वं च स्पष्टमुक्तमेव। तस्माच्च हि ज्ञानं परमात्मनिष्ठम्, तच्च प्रमाणं भवति। क्रियापरो ह्येतन्निष्ठश्च प्रमेयः । इच्छापर एव हि संशयः । इदं भवति वा न भवति, इदमित्थमस्ति वा नास्तीति तु संशयस्वरूपम् । इदं च सर्वमिच्छापरं नियतम् । विषये चास्मिन्ममेच्छा चैवम्, इदं च भवितुमर्हति वा न वा, इति हि तद्भावो विज्ञेयः । अन्यथा तु सर्वमावश्यकमेव भवति । तत्र संशयकारणं केवलमिच्छारोपणमेव भवति । तस्मात्त्रयाणामेषामेव मुख्यत्वं विज्ञेयम् । यद्यपि संशयो न कश्चनेति विस्तरेण स्पष्टमुक्तो भवति, तथापि निषेधावश्यकत्वेन संशयस्याप्यावश्यकत्वमभ्युपगम्यते । तदेवं विधानेन प्रमाणप्रमेयसंशयाख्याश्च त्रयः पदार्था ह्यकारोकारमकारपरा वेद्या भवन्ति । अन्ये च पदार्थास्त्वेतदन्तर्गताः संभाव्यमाना भवन्ति । अत एव—

"ज्ञानं क्रिया तथैवेच्छा समाहारानुवर्तनात् ।
सर्वनिर्णायकास्तत्र नियताः षोडश श्रुताः ॥
तज्ज्ञानेच्छाक्रिया निष्ठाः पदार्थास्त्रितयात्मकाः ।
अकारोकारमकारपरा वेद्याः क्रमेण हि ॥
प्रमाणं च प्रमेयश्च संशयश्च व्यवस्थितम् ।
एतदन्तर्गतं सर्वं प्रसिद्धं सर्वकारणम् ॥"

इत्यादि प्रवचनम् । तस्मादिदं प्रमाणादिकं तादृशं बोध्यम् ।

प्रमाणप्रमेयसंशयानां हि समाहारः प्रयोजनं भवति । अत एव—"प्रमाणयुक्तं प्रमेययुक्तं संशययुक्तं प्रयोजनम्" इत्याद्युक्तिः । एवं दृष्टान्तोऽपि प्रमाणांतर्गत एव, प्रमाणस्यैव क्रमो दृष्टान्त इत्यनुभवात् । यद्यपि दृष्टान्तेन नैव किंचिन्निर्णयं भवतीति नैयायिकमतम्, तथापि तस्य प्रमाणपरत्वेन प्रवचनस्यावश्यकत्वं भवति । एवं सिद्धान्तोऽपि प्रमेयान्तर्गतो भवति, प्रमेयस्यैव क्रमः सिद्धान्तः, यो हि प्रमेयः स एव सर्वप्रमाणसिद्धो भवतीति न्यायात् । तत्सिद्धिस्तु तद्बोधस्वरूपैव । अन्यथा भावपक्षे सर्वोऽपि सिद्धान्त एव । सिद्धान्त इत्युक्त्या ह्यसिद्धान्तस्यापि सूचनं भवति । वस्तुतस्तु न कश्चिदसिद्धान्त इति व्याख्यानेन ह्यावश्यकपरो भवति सिद्धान्तः । कालिकश्च प्रमेयक्रमः । सर्वस्मिंश्च काले सर्वस्य सिद्धान्तरूपत्वं ह्यतीततायामेव भवति । परन्त्वस्मिन्काले चायमेव सिद्धान्त इति, कालक्रमानुरोधेनावश्यकेन च प्रवचनम् । तस्मादत्रायमेव सिद्धान्त इति सुप्रयोजका वदन्ति । अनेनेदं सूचितं भवति—यश्च पुनरस्मिन्काले विरुद्धः, सोऽप्यन्यस्मिंश्च काले सिद्धान्त एव भवतीति ।

एवमवयवोऽपि संशयान्तर्गत एव भवति, यो ह्यवयवः, तत्रैव संशयसंभवात् । सति च सर्वविज्ञाने, सत्यां च सर्वप्राप्तौ संशयस्यासंभव एव सूचितो भवति । अवयवत्वेनैव संशय इति सर्वैः स्पष्टमुक्तं भवति । यत्र यस्य पदार्थस्य पूर्णेच्छा भवति, तत्र तस्य पूर्ते-



रावश्यकत्वं, इच्छायाश्चावश्यकत्वप्रवचनात्, आवश्यकतया सर्वभवनाद्वा । यस्याश्चेच्छायाः पूर्तिर्न भवति, तत्कारणमवयवत्वेनाव स्थितिरेव । यदि चेत्समूहत्वेनेच्छा संभवति, तर्हि तत्पूर्तेरावश्यकत्वम् । यदा चेच्छास्त्यवयवत्वेन, तदा प्रतियोगिनि समाहाररूपत्वेन सा भवति । तत्प्राबल्यानुरोधेन हि पूर्तिर्न भवतीति हि तत्वम् । इदमेव संशयफलम् । एवं तर्कस्तु प्रयोजनपरो वेदितव्यो भवति । यत्र हि प्रयोजनम्, तत्रैवोहो भवति । केन प्रकारेणास्य प्राप्तिर्भवितुमर्हति, कथमिदं, किमिदम्, इति तु तर्कस्वरूपम् । तथा चेत्थं चेदिदं, तर्ह्येवं भावः, इत्थं चेदम्, तर्ह्येवं विरोधः, अनेन प्रकारेण चेदमित्थमेवेत्यादीनां तर्कस्वरूपत्वेन प्रयोजनान्तर्गतत्वं बोध्यम् । एवं वादस्यापि प्रमाणान्तर्गतत्वं भवति । यस्य च ज्ञानं भवति, तज्ज्ञानानुरोधेन हि वादो भवति । यद्यपि वादस्यापि द्वौ भेदौ सद्वादोऽसद्वादश्चेति, तथापि द्वयोर्ज्ञानपरत्वात्सदसतोरेकत्वं च सर्वथा प्रसिद्धं भवति । तस्माद्वादोऽपि प्रमाणपरो बोध्यः । एवं जल्पनमपि प्रमेयपरं प्रमाणान्तर्गतं बोध्यम् । यत्र चात्यन्तविरोधो न ज्ञातः तथानेकविवर्तनपरिवर्तनव्यवहारश्च भवति, तत्रैव जल्पो भवतीति विज्ञेयम् । इत्थं हि जल्पनस्वरूपं भवति—येन हि यथा दृष्टं तथा चोच्यते, एकेनेत्थं दृष्टं कथंचित्प्रकारेण ज्ञातं च तर्ह्येवं प्रवचनम्, इदमित्थमेव, द्वितीयं त्विदमित्थमेव, तृतीयं त्विद-

मन्यथैव भवतीति । सर्वप्रकाराणां च सर्वत्रोपस्थितत्वात्तस्य सत्यत्वं सर्वत्रोपन्यस्तं भवति। संसारस्य चास्य संसरणव्यवहारात्, इदनीमित्थं तदानीं तथा अन्यथेदानीमन्यथा इत्याद्यनेका चावस्था प्रतिक्षणं संभवत्येव । तद्बुध्यैव जल्पनस्यापि प्रयोजनम् । जल्पनात्सिद्धान्तबोधो भवतीति बीजात्प्रमेयपरमिदमिति व्याख्यातम्। एवं वितण्डापि संशयपरा प्रसिद्धा भवति । वैतण्डिकं तदेव, यच्च यच्च संदिग्धम् । यच्च संदिग्धम्, तदबोध्यं भवति । संशयोऽप्यसंबोधफलः । ततो वितण्डायास्तत्रैवोपपत्तिः । प्रयोजनं च निर्णयपरं बोध्यम् । निर्णय एव सर्वप्रयोजनं भवति । यदा च निर्णयो भवति, तदैवात्मबोधः । निर्णेता चेत्थम्, निर्णेयमित्थम्, निर्णयश्चेत्थम्, एतेषामयं संबन्धः, इत्थं भावेन हि त्रितयप्रवर्तनाद्यावश्यकत्वम्, अयं भेदप्रभासः, तदेकत्वं चेत्यादिकं च सर्वं प्रयोजनरूपं सार्वत्रिकं बोध्यम् ।

एवं जातिछलहेत्वाभासाश्च भवन्ति । जातिस्तावत्, पदार्थानां चाणुरूपाणां प्रत्येकं भेदानुभवः । यो ह्ययं सोऽयमित्थं तत्संज्ञा चेयम्, यच्चेत्थं तदिदम्, परस्परसंबन्धश्चेत्थमिति हि जातिस्वरूपं प्रमाणपरमिदं भवति । छलस्तावत्प्रमेयान्तर्गतः प्रसिद्धः । इदं चेदित्थं तर्ह्येवं कर्तुमुचितमेतदावश्यकतया चेति तत्स्वरूपं विज्ञेयम् । संशयपरस्तु सर्वो हेतुरिति विज्ञेयम् । सर्वेषां हि कारणानां हेतुसंज्ञा । हेतुरप्यज्ञेय इति सोऽयं संशयस्वरूप एव । यदिदमित्थं प्रभासते, तत्र किं कारण मिति हि हेतुस्वरूपम् । आभासश्च प्रयोजनपरः, यच्च किंचिदाभाति दृश्यते, तत्सर्वं प्रयोजनपरं भवति सर्वावश्यकत्वात् । तस्मादित्थं सार्वत्रिकव्यवहारपराः षोडश पदार्थास्त्रितयात्मका भवन्ति, अकारोकारमकारान्तर्गतं निर्णयस्वरूपं न्यायोपाङ्गं च भवति । परमाणूनां च प्रत्येकं निर्णयकारणं तदिति विज्ञेयम् । अयं च ज्ञानांशः, अयं च क्रियांशः, अयं चेच्छांशः, अयं च समाहारांशः, इत्थं हि भावः, इत्थं चाभावः, एतद्भावश्चेत्थम्, एतदभावश्चेत्थमित्यादि सर्वं न्यायानुगतं बोध्यम् । वस्तुतस्तु—



“ न चैवायमात्मा प्रमाणेन सिद्धः
प्रमेयो न चावश्यकस्संशयस्थः ।
न वै संप्रयोज्यो न चानुप्रयोज्यः
सदा निर्णयो निर्णितब्रह्मरूपः ॥

न दृष्टान्तसिद्धान्तनिष्ठोऽयमात्मा
न चैवान्यथा तर्कसिद्धोऽयमात्मा ।
न वै संविवादो न वै संप्रवादो
न वादः परो जल्पनस्थोऽयमात्मा ॥

न वैतण्डिको नान्तरस्तर्ककार्यो
न वै निर्णयः सत्यतद्ब्रह्मरूपः ।

न जातिश्छलो नैव भेदप्रयुक्तो
न हेतुर्न चाभाससिद्धोऽयमात्मा ॥
न तत्वं परं ज्ञानविज्ञेय आत्मा
न च स्थानमन्यत्परस्थानमन्यत् ।
स्वभावात्परश्चागमस्थोऽयमात्मा
न चाभावभावस्वरूपोऽयमात्मा ॥"

इत्यादि प्रवचनम् । तस्मादित्थं भूतं न्यायोपाङ्ग सर्वावश्यकमोङ्कारपरं वेद्यं भवति ।

अकारोकारमकारनियमेनात्रापि वेद्यं त्रितयत्वम् । तच्च हि तत्वन्यायलोकन्यायप्रशस्तन्यायरूपमिति प्रशस्तम् । तत्वन्याये तु सर्वतत्वपरिभावनं सर्वस्यैकीकरणं च भवति । एकोऽहं द्वितीयो नास्तीति हि तत्वस्वरूपम् । इदं च ज्ञानपरमकारनिष्ठम् । द्वितीयश्च लोकन्यायः क्रियापरोह्युकारनिष्ठः । तत्र चैतत्तत्वनिष्ठविरुद्धप्रतिभास इति तद्व्यवहारः । एकोऽहं द्वितीयं त्वेतत्, अहमेतदोः संबन्धश्चेति तत्स्वरूपं सूचितं भवति । तृतीयश्च प्रशस्तन्यायो मकारात्मकः । सर्वं च नास्तीति तत्प्रबोधः । अत हि परिणामभावेन तत्वमेव सर्वाभिप्रेतसिद्धान्तः,। एतन्न्यायत्रयेणापीदमैक्यसूचितं भवतीति विज्ञेयम्। सर्वदृष्ट्या सर्वस्य सिद्धान्तरूपत्वं व्यवस्थितम्। यदहं तदेवमूलम्, अभेदात्। अहमेव सर्वमिति ज्ञानदृष्ट्या सर्वस्य ब्रह्मरूपत्वेन प्रवचनम्, त्रितयस्यैकान्तर्गतत्वा-



देकरूपत्वाच्च । क्रियादृष्ट्या हि यच्च किंचिदस्ति, तदेतदेव । अत्र हि—एतत्कुरु, इदं कुरु, इदं कर्तव्यं, एतच्च मुख्यम्, एतच्चामुख्यम्, इत्याद्यावश्यकनियमपरिभावनायाः संसारस्यैव प्रदर्शनम् । अस्यैव हि सिद्धान्तत्वमुक्तम् । अत एव संसारसाधनार्थमेवाहं संसारसाधनमिति सिद्धान्तः । एवं परिणामवादेन, योऽहं यश्चैतत्, तस्य सिद्धान्तो नैव भवति । एकस्मिंश्च काले नैतंत् न चाहम्, एकस्मिन्काले केवलमहम्, एकस्मिन्काले केवलमेतत्, एकस्मिन्नहमेतत्, एवमेतन्न, एवमहमेतन्नेति त्रितयमित्यादि सर्वं न्यायेन बोध्यं भवति । वस्तुतस्तु—

"स चैकोऽहमेकोऽहमेकोऽयमात्मा
द्वितीयो द्वितीयो द्वितीयोऽयमात्मा ।
तृतीयश्चतुर्थः समस्तोऽयमात्मा
गुणः सर्वगौणो विभिन्नोऽयमात्मा ॥

विरुद्धः परो भावनीयोऽयमात्मा
न च न्यायवेदान्तसिद्धोऽयमात्मा ।
तथा सर्वमीमांसया नैव वेद्यः
सदा सच्चिदानन्दरूपोऽयमात्मा ॥"

इत्यादि प्रवचनम् । तस्मादित्थं भूतं न्यायरूपमुपाङ्ग प्रणवपरं सर्ववेद्यं भवति ।

ततः परं वैशेषिकाख्यमुपाङ्गं चतुर्थं भवति । विशिष्यत इति विशेषः, तत्र भवं वैशेषिकमिति तदर्थो विज्ञेयः । संसारस्थानां च पदार्थानां प्रत्येकं विशेषेण परिगणनं वैशेषिकं भवति । अत्र हि क्रियाज्ञानेच्छापरं समाहारनिष्ठं च सर्वमुक्तं भवतीति विज्ञेयम् । तत्परिवर्तनयोगेन सप्त संभवन्ति । एतत्सर्वं सप्तान्तर्गतं भवति । प्रमाणप्रमेयादयश्च सार्वत्रिकाः षोडश पदार्थाः, संसारमात्रपराः संभेदविभेदैकत्वसहिता बोध्या भवन्ति । अत्र हि केवलं विशेषभेदानां व्याख्यानं दृश्यते । सामान्यबोधं विना विशेषबोधस्य संभव इति तु न्यायोपाङ्गमन्तरा न भवति । तस्मात्प्रमाणादीनि षोडश न्यायस्थितानीति बुध्वा संसारस्य विशेषप्रकारो वेदितव्यो भवति । ब्रह्माण्डे चास्मिन्नेतत्सप्तपदार्थानामेवावश्यकत्वं विज्ञायते । सर्वविज्ञानाय हि न्यायोऽध्येतव्यो भवति । तदेकदेशविज्ञानाय तु वैशेषिकमध्येयमित्युपदेशः । केवलोऽयमेव भेदो भवति । अन्यथा न्यायवैशेषिकयोरैक्यं सिद्धमेव भवेत् । समुदायैकदेशयोरेव सर्वभेदमात्रप्रवचनम् । अन्यथा तु प्रधानसत्तैक्यं सर्वस्येति निश्चितं भवेत् । अत एव—

“तदध्येयं यथान्यायं सर्वं संसारसंज्ञकम् ।
वैशेषिकमधीत्यैवं कुरु ब्रह्माण्डकल्पनाम् ॥”

इत्यादि प्रवचनम् । तस्माद्ब्रह्माण्डकल्पनविज्ञानसाधनं वैशेषिकं भवति । अत्रापि सप्त पदार्था भवन्ति, द्रव्यगुणकर्मसामान्य-



विशेषसमवायाभावा इति । अत्राप्यकारोकारमकारविधिना चाहमेतन्नेति प्रयोगेण मुख्यं पदार्थत्रयं भवति । तच्च द्रव्यं गुणः कर्म इति भवति । द्रव्यं तावदिच्छापरं प्रशस्तम् । तच्च सर्वसंबन्धमूलम् । गुणश्चायमात्मा भवति । कर्म च क्रिया ह्यनात्मपरा । यद्यप्यत्र न युक्तः क्रमभेदोपन्यासः, तथापि परिवर्तनव्यवहारेण क्रमभेदो मन्तव्यो भवति । अन्तरेण द्रव्यं न केषां चिदपि प्रकाशो भवति । तस्माद्द्रव्यस्यैव प्राधम्यं सिद्धम् । अत एव “इच्छया हि सर्वसंसारः” इत्यादि प्रवचनम् । एवमेव—

“द्रव्यभूतं जगत्सर्वं द्रव्यमिच्छापराव्ययम् ।
इच्छया सर्वसंसारश्चेच्छा माया परायणी ॥
द्रव्यमिच्छा मकारस्था नेति नेति प्रयोजिका ।
गुणश्चात्मा ह्यकारस्थो ह्यहं संज्ञो ह्यनन्वयः ॥
अतो द्रव्याश्रयं विद्धि गुणस्तन्मूलकारणम् ।
तेन जाताः क्रियाः सर्वाः क्रमश्चैवं व्यवस्थितः ॥”

इत्यादि प्रवचनम् । ततो द्रव्याश्रयो गुण इत्याद्युक्तिः । तत्र गुणश्चात्मा, कर्म च क्रिया, द्रव्यमिच्छा चेति विज्ञेयम् । अत एव “शक्तिस्वरूपं द्रव्यम् , द्रव्ये च सर्वाः शक्तयः” इत्याद्युक्तिः । शक्तेरिच्छारूपत्वादिच्छा ह्यावश्यकीति बीजाच्च द्रव्यस्यापि तादृशत्वं बोध्यम् । गुण एव हि ज्ञानम्, ज्ञानस्वरूपोऽयमात्मा, अतो गुणस्वरूपो ह्यात्मा भवति । क्रियत इति कर्म । करणमेव क्रिया ।

सा चानात्मपरा भवति। एवं भूतः पदार्थश्च त्रितयात्मकोऽकारो-कारमकारस्थो विज्ञेयः। ततः परं च सामान्यविशेषौ भवतः। तत्र सामान्यं च समाहारस्वरूपं द्रव्यगुणकर्मनिष्ठं च भवति। इच्छाया ह्यात्मानात्मनोश्च सार्वत्रिकत्वात्त्रितयावश्यकत्वात्तदैक्याच्च सर्वं सामान्यमेव। अत एव "इच्छा च सामान्यं, अहं च सामान्यम्, क्रिया च सामान्यम्" इत्यादि श्रवणम्। तथा "सामान्यो विधिरयं सार्वत्रिकः" इत्याद्युच्यते। तस्मात्सामान्यं त्रितयसमाहाररूपमिति विज्ञेयम्। सामान्येनैव विशेषसंभवः। अतः "सामान्यान्तर्गतो विशेषः" इत्यादि प्रवचनम्। "सामान्यैकदेशो विशेषः, विशेषः समुदायश्च सामान्ये" इति वैशेषिक-वचनम्। एवं सामान्यविशेषयोः द्रव्यगुणयोश्च कर्मणां संबन्धः समवायः। एतत्समवायवतामैक्यमभावरूपमिति स्थितिः। यद्यपि समवायवति पदार्थे भेदभावना, भेदमन्तरा समुदायस्यानुपपत्ति-रिति, तथापि सत्ताप्राधान्येन चैकाधिकरण्येनैकत्वं विज्ञेयम्। अयमेवाभावः। अतो "नाभावः कश्चित्" इत्यपि स्पष्टम्। यो ह्यभावः, त्रितयैकत्वरूपः, स न कश्चन। यत्, तत्, कश्चित्, क्वचित्, अयम्, अन्यत्, त्वमहमित्यादिप्रपञ्चस्तु भेदप्रदर्शने समवाये सत्येवेति विज्ञेयम्, एकत्वे तु न कश्चिद्वाचको वाच्यो वचनमिति बीजात्। अभावस्य तु नास्तित्वेन प्रवचनम्। यद्यपि तस्यापि चातुर्विध्यमुक्तम्, प्रागभावः प्रध्वंसाभावोऽत्यन्ता-



भावोऽन्योन्याभावश्चेति, तथापि तदेकदेशपरं समुदायपरं च बोध्यम्। यद्यपि समुदायग्रहणे चैकदेशग्रहणं सिद्धं भवति, तथापि पृथग्बोधे प्राधान्यबोधाय ह्येकदेशस्यापि वचनमवश्यं भवति। ततो ह्यभावश्चतुर्विधो बोध्यः। प्रथमं प्रागभावः, स च केवलं स्मृतिविषय एव। एवमासीन्नेदानीमिति तत्स्वरूपम्। एवं यश्च प्रध्वंसः, तस्य नष्टत्वेन प्रवचनम्। तस्याप्यविनाश्यत्वात्प्रभानौचित्याच्च प्रध्वंसोप्यभाव एव। तत्र च बीजं प्रध्वंसः। यश्च प्रध्वस्तः स पुनर्भवति, यश्च भवति तस्य प्रध्वंसो भवति, इति नियमात्। अत्यन्ताभावश्चैवं भवति। अत्यन्ततया तदभावः। तस्य च नाम्नो विद्यमानत्वम्, इन्द्रियगोचरत्वं च नास्ति, परं तु पदार्थास्तित्वं सर्वथैव सिद्धं भवति। अन्योन्याभावश्चैवम्, एकेन पदार्थेनैकस्य विनाशः, तद्विनाशेऽन्यविनाशः, तद्भवनेऽप्यन्यविनाशः, इति परस्पराभाव एव। दृश्यताम्—बहवः पदार्थाश्चैतादृशा वर्तन्ते, येषां च भवने बहूनां विनाशः, पदार्थाश्च बहवश्चैतादृशाः सापेक्षा वर्तन्ते, सति चैकस्य विनाशे द्वितीयस्य नाश इति बीजादन्योन्याभावप्रदर्शनमिति। सर्वथा भेदप्रणाश एवाभाव इति व्याख्यानतयाऽभावस्य परिगणनमपि पदार्थे नास्ति। सांसारिकाश्च षट्पदार्थाः। ते च द्रव्यगुणकर्मसामान्यविशेषसमवाया भवन्ति। एतदन्तर्गतं सर्वमिदं ब्रह्माण्डं यथायथं क्रियातत्त्वपरं बोध्यम्। येषामपि त्रितयत्वं तेषां प्रत्येकं बोधौचित्यं च भवति। कर्मादीनां च सर्वेषां भेदस्य

तु संसारपरत्वं संसरणव्यवहारेण बोध्यम् । एतञ्च वैशेषिकमपि तादृशं त्रितयपरम् । भेदत्रयोऽप्यत्राभिधीयते, आत्मवैशेषिकं क्रिया-वैशेषिकमपरवैशेषिकं चेति । आत्मवैशेषिकसिद्धान्तस्तु सर्वपदार्थानां गुणस्यैकीकरणरूपः, क्रियावैशेषिकं च कर्मैकीकरणरूपं भेदानिष्टं च भवति, अपरवैशेषिकं च तदिच्छामात्रस्य पूर्णत्वादिव्यवसायै-कत्वरूपमिति च विज्ञेयम् । तदिदं वैशेषिकं ह्यात्मानात्मनिषेध-विध्यन्तर्गतं प्रधानं भवति । वस्तुतस्तु सर्वस्मात्परः शुद्धबुद्ध-श्चायमात्मा भवति । अत एव—

"न लोको न लोकंस्थितश्चायमात्मा
न संसारजः सर्वसिद्धोऽयमात्मा ।
विशेषो न वैशेषिकश्चायमात्मा
सदा सर्वथा शुद्धबुद्धस्वरूपः ॥
न वै द्रव्यमूलं गुणः कर्मयुक्तो
न तावद्विरुद्धः समानस्वरूपः ।
समाहारसामान्यमेको विशेषः
सदा सर्वथा शुद्धबुद्धस्वरूपः ॥
न भावो न चाभावरूपः समूहो
न चैवैकदेशो विधिस्थोऽयमात्मा ।
गुणः सद्गतः सच्चिदानन्दरूपो
ह्यखण्डो ह्यजो निर्विकल्पो निरस्तः ॥"



इत्यादि प्रवचनम् । तस्मात्तादृशं त्रित्वैकत्वपरं द्रव्यगुणकर्मपरं च सर्वात्मस्वरूपं विद्धीत्युपदेशः । तस्मादेव विशेषविधिप्रबोधाय हि वैशेषिकमकारोकारमकारान्तर्गतं विज्ञेयम् ।

ततः परं च योगाख्यमुपाङ्गं पञ्चमं भवति । युज्यते सर्वं क्रमेणेति योग इति तदर्थः । अत्र हि संसारमात्रस्य योजनाभि-धानं तदेकत्वप्रज्ञापनसहितं वेदितव्यम् । एतदन्तरे चेदम्, एतदन्तरेचैतत्, एवं भूतमनेन कारणेन युज्यते, इति हि योगार्थः । योगशास्त्रेण ह्यात्मनः सर्वस्मिन्प्रयोग इति विज्ञेयम् । योऽहं पृथक्, स सर्वमहमिति तिष्ठामि, इति योगस्वरूपं भवति । एतदभिप्रायेणैव योगसाधनमुक्तं भवति । अत्र हि पृथगुक्तानां व्यापाराणामेकीकरणं नाम सर्वैक्यरूपम्, तथा सर्वत्र चैकत्वबोधः, एकत्र सर्वबोध इति योगफलमुक्तं भवति । येन येन भावेन व्यापारो भवति, येन येन भावेन तदैक्यं भवति, तत्सर्वमत्र चाख्यातं भवति । अत्र प्राणायामाद्यभिधानमपि तत्परं बोध्यम् । सर्वेषां च पदार्थानां योजनव्यावहारश्च स्वात्मन्येव द्रष्टव्यः, इति योग-सिद्धान्तः । एवं तत्रोङ्कारादिजपोऽपि प्रशस्तो भवति । तज्जपश्च तदर्थभावनार्थक इति प्रवचनतया, ओङ्काराद्यर्थानां च सार्वत्रि-काणां भावनैव तज्जप इति व्याख्यानेन बोध्यम् । तत्र नियमोऽपि वर्तते । यदिदं च सार्वत्रिकं सर्वत्राविर्भूतम्, तत्र च यो नियमः सर्वाविर्भवनस्य, तत्प्रज्ञापनरूपश्च स इति विज्ञेयम् । एवं योजनाभि-

धानार्थकस्तादृशाकारोकारमकाररूपो भेदश्चानेक इति विज्ञेयः। योगशास्त्रस्य चास्य परमिदं तत्वं भवति, यच्च सर्वेषामेकदेशिनां समुदायत्वेनैकत्वव्यवस्थापनम्। समुदायैकदेशिनोरावश्यकत्वेन तन्निर्धारणे सत्येकत्वं प्रज्ञापितं भवति। वस्तुतस्तु नायमात्मा योगी योगो योज्यश्च भवति। यथा—

"न योगः स चाहं वियोगो न चाहं
परं सत्यसंयोगमूलं न चाहम्।
न तद्योजको योज्यरूपो न चाहं
सदा सर्वथाहं नकारस्थसिद्धः॥
न योगी वियोगप्रशस्तो न चाहं
न तद्भावितो भावनात्तो न चाहम्।
न वै मन्त्रसिद्धो जपार्च्यो न चाहं
सदा सर्वथा सत्समाहाररूपः॥"

इत्यादि प्रवचनम्। तस्मात्सर्वमिदमोङ्कारस्वरूपं प्रशस्तं भवति। योजनकार्ये चास्मिन्नपि तादृशं भेदत्रयं स्पष्टमुक्तं भवति, राजयोगो हठयोगो लक्ष्ययोगश्चेति। राजयोगस्तावत्, ज्ञानपरः सर्वप्रकाशमूलं भवति। हठयोगश्च तादृशयोजनकरणं भवति। लक्ष्ययोगश्च तृतीयः सर्वाभिलक्षणो ह्येकपरो बोध्यः। तस्मात्सर्वं चैतद्योगशास्त्रं सिद्धमकारोकारमकारान्तर्गतं बोध्यं भवति।



ततः परं सांख्याख्यमुपाङ्गं च षष्ठं भवति। अत्र च सर्वस्याऽसांख्यत्वं प्रबोध्यम्, संख्याया अभावोऽसांख्यमिति तदर्थात्, नैतन्न चान्यन्न सर्वं सार्वत्रिकं सांख्यमिति प्रवचनाच्च। संख्यामात्रपरिगणनव्यावृत्तश्चारंभावसानादिरहितः स्वात्मनो बोध इति सांख्यसंमतं भवति। अस्मत्पूर्वमस्मदुत्तरमपरमधरं चोर्ध्वं चेति सर्वस्य सांख्यत्वमेव। अत एव—

"न वै पूर्वं गण्यो गणनमपि काले न सकलं
समावर्त्तः सर्वः परमसुखधामावधि न यत्।
सदा नित्यं शुद्धं सकलसुखसंपत्तिसहितं
समानन्दं ब्रह्म प्रवरसुखभावं प्रपतितम्॥"

इत्यादि प्रवचनम्। एवमेव—

"अनन्तस्तथा पूर्वरूपोत्तरस्थः
स सन्सर्वभावात्मको भावरूपः।
अनाद्यन्तभिन्नः स चाद्यन्तभिन्नः
स एकोऽहमेकोऽहमोकोऽहमात्मा॥
गुणो द्रव्यरूपो न च श्रद्धशीलो
न वा शुद्धबुद्धः समासस्वरूपः।
क्रियाकारणं सर्वभिन्नः स एवं
स एकोऽहमेकोऽहमेकोऽहमात्मा॥

न चैको द्वितीयस्तृतीयश्चतुर्थः
सदा सर्वथा सांख्यमद्वैतरूपम् ।
समं सर्वभिन्नं स्वयं सर्वसिद्धं
स एकोऽहमेकोऽहमेकोऽहमात्मा ॥

स चानन्दरूपो ह्यनानन्दरूपः
स्वयं ब्रह्मरूपः स्वयं ब्रह्मरूपः ।
परं पौरुषं यत्प्रकृत्याहितं तत्
तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥"

इत्यादि प्रवचनम् । तस्मात्सांख्यशास्त्रेण सर्वस्वभावात्मपरमात्मनोरतीतत्वबोधो महाविष्ण्वाद्यवस्थाराहित्यबोधश्च कथितो भवति । एवं निष्प्रयोजनत्वं सर्वपरत्वं च सांख्यसिद्धान्तः । सांख्यशास्त्रे क्रमाभाव एव संसूचितो भवति । तस्मादीश्वरो महाविष्णुरिति, तत्परेषां च सर्वेषाममान्यत्वमिति, निराधारः स्वच्छन्दः स्वात्मैव ब्रह्मेति, तत्प्रतिष्ठापरो ह्योङ्कारोऽयमिति चैतत्सर्वं षडुपाङ्गपरं भवति । एतत्प्रबोधाय हि नियतक्रममिदं वेदान्तादिकं भवति । यस्याध्ययनेऽध्यापने च—सार्वत्रिकस्यापि विनाशः, परिवर्तननिवर्तनादिव्यवहारश्च न किञ्चित्, सर्वथा स्वभावस्थं ब्रह्म, इति प्रबोधनसिद्धान्तश्च भवति । इदमेव सर्वार्थं सर्वाधिगतं सर्वसंपन्नोपदेशफलमित्यलम् ।



तदेवं प्रकारेण षडुपाङ्गानि भवन्ति । एषामयमेव हि क्रमः सर्वसिद्धान्तः । यद्यपि—

"सांख्यं पूर्वं ततो योगस्ततो मीमांसको विधिः ।
ततो न्यायः समध्येयस्ततो वैशेषिकं परम् ॥
वेदान्तश्चान्तिमः प्रोक्तः सर्वसिद्धान्ततत्परः ।"

इत्याद्युक्तम्, तथापि तथा कथनं सिद्धान्तपरं बोध्यम् । वेदो ज्ञानम्, ज्ञानस्यान्तश्च नाम तत्वप्राप्तिः, इति वेदान्तशब्दार्थत्वेन सर्वस्य वेदान्तत्वमिति वाच्यम् । एवं रीत्या तु सर्वस्यानादित्वमनन्तत्वं च सिद्धं भवति । अन्यथा तु जिज्ञासामात्रस्य पूर्वं प्रदर्शनमेव समुचितं भवति । अत एव—

"वेदान्तं समधीत्यैवं जिज्ञासामात्रसंग्रहम् ।
भवेन्मीमांसको नित्यं ततो नैय्यायिकी क्रिया ॥
कार्यं वैशेषिकं चैवं योगः सांख्यं समोत्तरम् ।
एवं विधमुपाङ्गं स्याज्ज्ञात्वा तद्ब्रह्मविद्भवेत् ॥"

इत्याद्युक्तिः । तदेवं क्रमेण सर्वमिदमकारोकारमकारपरं वेदवेदाङ्गमुपाङ्गं बोध्यं भवति । अत एव—

"वेदस्त्वकारनिष्ठोऽयमात्मा संसारभावनः ।
ततश्चोकारनिष्ठं स्यादङ्गं संसारवाचकम् ॥
उपाङ्गं स्यान्मकारस्थं द्वयोः संबन्धहेतु च ।"

इत्याद्युक्तिः ।

इमाश्च हि चतुर्दश विद्या भवन्ति प्रसिद्धाः । ताश्च संसारावधारणपराः सार्वत्रिक्यः सर्वविज्ञानदायिन्य इति विज्ञेयम् । षडङ्गानि षडुपाङ्गानि द्वादश, वेदोपनिषद्ब्राह्मणोपवेदशुक्लकृष्णशाखासमन्विता त्रयोदश विद्या भवन्ति । चतुर्दशी त्वविद्या चाज्ञानरूपा भवति । एवं प्रकारेण हि चतुर्दशविद्या भवन्तीति विज्ञेयम् । कारणभूताश्चेमा विद्या भवन्ति सर्वेषाम् । अत एव—

इमां चतुर्दशीं विद्यां सर्वमूलां सनातनीम् ।
ज्ञात्वा भावं समाप्नोति सर्वतत्वं परावरम् ॥

एतदर्थं समध्येयं वेदवेदाङ्गनिश्चितम् ।
अधीत्यैवं ब्रह्मचर्ये कुरु संसारसाधनम् ॥"

इत्याद्युपदेशः । एवमेव—

"ब्रह्मविद्या प्रतिष्ठा च परा निष्ठा चतुर्दशी ।
सर्वार्थदायिनी चैषा संसेव्या स्यान्महात्मभिः ॥"

इत्यादि प्रवचनम् । एतच्चतुर्दशविद्यान्तर्गत एव सर्वव्यवसायः, सर्वविधयश्चेति विज्ञेयम् ।

वेदवेदाङ्गोपाङ्गानां हि वेदत्वेनैक्यं परस्पराश्रयत्वं च बोध्यम् । कर्ता त्वेतेषां त्रयाणामेक एव । यथा च क्रमेणायं संसारः, तथैव चैतत्करणमपि बोद्धव्यम् । वेदानां कर्तारस्तु विष्णुः ब्रह्मा



शिवो महाविष्णुरिति स्पष्टमुक्तम् । एवमङ्गोपाङ्गानामपि तादृशोपाख्यानं वेदितव्यं भवति । यस्मिन्यस्मिश्च कार्ये यो यो नियुक्तः, तेन स्वस्वकार्यप्रबोधाय स्वकार्यावधारणसाधकाङ्गोपाङ्गमपि निर्मितं भवति । एतत्सर्वस्यापि मूलशक्तेरावश्यकता भवति । तस्मादावश्यकपरं सर्वाङ्गादिकं व्यवस्थितं भवति । दृश्यताम्—इच्छाप्रज्ञापनं शिवकार्यं, ततो ह्येवं शैवं व्याकरणं समाख्यातम् । यद्यपि शिवस्येच्छानिष्ठत्वमेव सूचितम्, प्रज्ञापनं तु ज्ञानांशं विष्णुकार्यं च भवति, तथापीच्छारूपे हि कार्ये शिव एव तिष्ठति । यस्मिन्कार्ये च यस्तिष्ठति, स एव तन्नियन्ता भवतीति स्पष्टव्याख्यानेन शिवो व्याकरणकर्ता भवति, शिक्षायाः कर्ता साक्षाच्छिव एवेति । अत्रेदमवधेयम्—स्वेष्टफलार्था हि शिक्षा भवति । यदिष्टं तच्च ग्राह्यम् । यदनिष्टं तत्त्याज्यम् । इष्टानिष्टे चावश्यकपरे भवतः । आवश्यकं च कालनियतम् । कालश्च क्रमानुगतः । तस्माच्छिक्षाप्येवं विधा भवतीति । काले चास्मिन्निदमिष्टम्, इदमनिष्टम्, अत्रेदं कारणमित्यादि सर्वमिच्छापरं प्रशस्तम् । तस्माच्छिक्षामात्रस्य नियन्ता शिव एवेति विज्ञेयम् । अत एव शिक्षाव्याकरणयोः परस्परसंबन्धः । न च शिक्षया विना व्याकरणम्, न च व्याकरणमन्तरा शिक्षेति तयोः परस्परापेक्षत्वमुक्तम् । अत एव—

"शिक्षया वर्णविज्ञानं तस्माच्छन्दोऽभिजायते ।
ज्ञात्वा शब्दं यथायोगं भवेद्ब्रह्मस्वभावधीः ॥

उक्तं व्याकरणज्ञानं शिक्षाध्ययनतः परम् ।
एतद्द्वयोर्विधानेन भवेत्प्रज्ञापनक्रिया ॥"

इत्यादि प्रवचनम् । तस्मात्प्रज्ञापनं तृतीयं मकारनिष्ठम्, क्रियानिष्ठं व्याकरणमुकारपरं, शिक्षामात्रमात्मपरमकारनिष्ठं चेति विज्ञेयम् । अत एव —

"प्रज्ञापनं मकारस्थं तृतीयं परिकथ्यते ।
व्याकरणमुकारस्थं शिक्षा कालसमन्विता ॥
शिक्षाव्याकरणे चैव स्यातामिच्छापरायणे ।
कर्ता चास्य शिवः साक्षात्सर्वव्यापी सनातनः ॥"

इत्यादि प्रवचनम् ।

ततः परस्य कल्पाङ्गस्य निरुक्तस्य च कर्ता विष्णुरेव, द्वयोरर्थपरत्वात् । अर्थ एव हि ज्ञानम्, ज्ञानांशो विष्णुश्च भवति । वेशयत्यर्थान् सर्वस्मिंश्च शब्दे इति विष्णुः । तथाविधार्थबलेनैव तथानुमितमिति विज्ञेयम् । शैवाश्च सर्वे शब्दा भवन्तीच्छापराः । परं तु ते ज्ञानविशिष्टा एवेति नियमेन शब्दार्थयोरभेदः, द्वयोरेकत्रावस्थितत्वं च व्याख्यातम् । सर्वे शब्दा ह्यव्यक्ता भवन्ति ध्वनिपराश्च प्रसिद्धाः । तेषां ज्ञानांशेनैव व्यक्तिमत्वं स्पष्टमायाति । यादृशो यस्येष्टोऽभिप्रायः, स च तादृशः सुस्पष्टशब्दोऽपि भवतीति विज्ञेयम् । तथा ज्ञानानुसारी च शब्द इति चात्र सूचितं भवति । अत एव—



"वागर्थौ नैव भिन्नौस्तो यथा ज्ञानेच्छया युतौ ।
नैव ज्ञानं विनैवेच्छा सा च ज्ञानप्रकारिणी ॥
वागर्थयोस्तु संबन्धश्चान्योन्यमभिधीयते ।
यच्च वाक्यं भवेल्लोके तस्यार्थः संभवेदिति ॥
सार्वत्रिकेण बीजेन शब्दार्थौ समुपस्थितौ ।
तस्मात्सर्वं यथायोगं कल्पाङ्गं कोशसंज्ञकम् ॥
विष्णुना वेष्टितो बोधः सर्वः प्रणवसंज्ञकः ।"

इत्यादि प्रवचनम् । तस्माद्विष्णुरेव कल्पनिरुक्तयोरङ्गयोः कर्तेति विज्ञेयम् । यद्यपि ज्ञानस्य प्राथम्येन कल्पनिरुक्तयोः प्राथम्यमुपन्यस्तम्, तथाप्यवश्यकतावाचकत्वेन व्याकरणस्य शिक्षायाश्चोपाख्यानं पूर्वं भवति । आवश्यकतैव सर्वनियन्त्री भवति । आवश्यकता चेच्छापरा । तस्मादावश्यकतायाश्चेच्छायाः पूर्वत्वेन शिक्षाव्याकरणयोः पूर्वाङ्गत्वमिति युक्तम् । ज्ञानादेर्यथावत्क्रमस्तु वेदपरः प्रतिष्ठितः । परिवर्तनविधौ तु सर्वस्य पूर्वत्वमुत्तरत्वं च सिद्धम् । तस्मादिच्छाजायमानं च पूर्वमाख्यातम् । ततश्च परं ज्ञानात्मकमर्थप्रदेशभूतं कल्पो निरुक्तं च भवति विष्णुप्रणीतम् ।

ततश्च छन्दोऽभिधानं समाहारजं महाविष्णुप्रणीतं भवति । छन्दस्तु गीतम् । तस्यैव भवति, यच्च किंचिद्भाव्यमानमावस्यकं च । तस्यानुकथनमेव छन्दसेति व्याख्यातम् । यश्च संसारस्य भावः,

तस्यानुवर्णनमेव तद्भावविशिष्टशब्देन च तादृशक्रमेण, इति हि छन्दः सिद्धान्तः। तस्माच्छान्दसार्णवं महाविष्णुप्रणीतं सर्वच्छन्दोऽनुवाचकं प्रवेद्यं भवति। ततः परं ज्यौतिषं ब्रह्मप्रणीतम्, ब्रह्मा ज्योतिर्वेदलेखकश्चेति सर्वत्राख्यातत्वात्। ज्यौतिषमात्रं तु, कालानुगतसृष्ट्यवस्थाऽनवस्थानुवर्णनपरमेवेति बोध्यम्। तस्य ज्ञाता तु जगत्कर्ता पितामहः। यच्च यत्करोति, स तज्जानातीति तद्भावः। तस्मादवस्थादिनिर्माणं क्रियामात्रनिर्माणं च ब्रह्मणः कार्यं भवति। तस्य तदनुरोधोऽपि तादृशो भवति। तस्माद्ब्रह्मैव कर्ता ज्यैतिषशास्त्रस्येति सर्वसिद्धान्तः। षण्णामङ्गानां चाप्येतेषां प्रत्येकं व्यवहारः, चतुर्णां कर्तृत्वमपि च यथाक्रमं बोध्यम्। अत्रेदमवधेयम्—व्याकरणे शिक्षायां कल्पे निरुक्ते छन्दसि ज्यौतिषेऽपि च, तत्तदनुरोधेन महाविष्णुविष्णुब्रह्मशिवैश्च ज्ञानक्रियेच्छासमाहारानुसारेण प्रबन्धा निर्मिता भवन्ति, तथा सर्वे च वेदसाधकाः प्रणवनिष्ठाः सर्वसंसारस्वरूपबोधकाश्च भवन्तीति। वस्तुतस्तु—चत्वार्यङ्गानि मुख्यानि व्यवस्थितानि। तत्र चैकं व्याकरणम्, निरुक्तं च द्वितीयम्, जौतिषं च तृतीयम्, समाहारपरं छन्दश्चेदं चतुर्थम्, अनेनैव यथायथं व्यवहारो विज्ञेयः। तदेवं विधानेन च षट्प्रकारेण वेदसाधनमुपाङ्गं तत्सिद्धान्तप्रबोधाय समुपन्यस्तम्। बीजेनानेनैव षट्कं बोध्यम्। षण्णां च तेषामुपाङ्गानामप्येवं नियमेन कर्ता विज्ञेयो भवति। अत्र च सिद्धान्ताभि-



धाने ज्ञानक्रियेच्छानुसारिणी वृत्तिरिति विज्ञेयम्। तत्र वेदान्तो विष्णुप्रणीतो ज्ञानप्रादेशिकश्च भवति। एवं मीमांसाशास्त्रं ब्रह्मप्रणीतं यथायथं प्रशस्तम्। अत्र कर्माख्यानबीजं व्यवसायश्च व्यवस्थितं भवति। पुनर्निर्णयश्च तृतीयः। न्यायश्चेच्छापरः शिवप्रणीतो नकारात्मको भवति चतुर्थः। एवं वैशेषिकं समाहारपरं भवति। एतैश्चतुर्भिरुपाङ्गैः सर्वाः क्रिया बोध्यमाना भवन्ति। एवं योगः सांख्यमपीति विज्ञेयम्। योगश्च ब्रह्मप्रणीतः सर्वस्य सर्वत्र प्रयोजकत्वात्, योजनं योग इति तदर्थाच्च। एवं सांख्यमिच्छापरं शिवप्रणीतमनन्तानन्तप्रबोधकं च भवति। आवश्यकतायाश्चानन्तत्वात्सर्वेषामनन्तत्वमतीतत्वं च प्रसिद्धम्। तस्मात्सांख्यस्यापि समाहाररूपत्वेन प्रवचनम्। एतेषां च षण्णामुपाङ्गानां समाहारात्मकः सिद्धान्तग्रन्थः सप्तमो भवति। सोऽपि भवति महाविष्णुप्रणीतः। तस्मादेवाङ्गोपाङ्गानां वेदसाधनत्वम्, वेदस्य सिद्धरूपत्वं चोक्तं भवति। अङ्गोपाङ्गयोरप्येवं भेदश्च वेदितव्यो भवति। अङ्गेन तु केवलावधारणमात्रस्यैव बोधः, यच्चावधारणरूपं वाक्यम्, तस्य ज्ञानहेतुरङ्गम्, तत्सिद्धान्तरूपमुपाङ्गं च भवति। अत एवोपाङ्गानां दर्शनत्वेन प्रवचनम्। दृश्यते सर्वमनेनेति दर्शनम्। सर्वं त्वतीतमनन्तं च भवति। तस्माद्दर्शनस्याप्यनन्तत्वमतीतत्वं च वेद्यं भवति। सर्वस्य सर्वत्र विद्यमानत्वात्, सर्वभाषायां सर्वान्तरे च सर्वस्य तत्वाच्च सर्वत्र दर्शनशब्दप्रयोगः। तदेवं प्रकारेण षड्दर्शनानि भवन्ति। तेषामुपाङ्गानामपि तादृशो ह्यध्ययनाध्यापनक्रमो भवति। यथा—

"अधीत्याङ्गं प्रथमतस्तथोपाङ्गं ततोऽभ्यसेत् ।
पश्चाद्वेदः समध्येयः साङ्गोपाङ्गं यथेप्सितम् ॥
ब्रह्म विज्ञाय संसारे ब्रह्मकार्यं सदाऽऽचरेत् ।
सर्वं विज्ञाय चैकस्थमोङ्कारं प्रणवाद्दतम् ॥
अनन्तत्वमतीतत्वमनादित्वं प्रजप्यताम् ।
मूलभूतमिदं वाक्यमोमित्येतत्समाश्रयम् ॥
प्रभावश्चास्य सर्वस्वो वेदितव्यो यथाक्रमम् ।"

इत्यादिप्रवचनम् । तस्मादेवं क्रमेण साङ्गोपाङ्गो वेदोऽध्येयो भवति । यथा कालं प्राप्य बुद्धिं समभिवर्ध्यातीततां पर्यालोच्य ब्रह्मकार्यं क्रियतामित्युपदेशफलम् । केवलं सर्वस्यैकत्वं विज्ञाय, सर्वान्तर्गतं सर्वमनन्तमतीतमनव्ययं चेति ज्ञात्वा प्रतिष्ठतामिति व्याख्यानफलम् । अन्यथा त्वात्मनोऽभिन्नत्वमनभिन्नत्वं भिन्नत्वं च प्रसिद्धम् । अत एव—

"न वै चायमात्मा भवेदङ्गसिद्धो
न चोपाङ्गसिद्धो न वेदप्रसिद्धः ।
स तद्भावजं ब्रह्म वेदस्वरूपं
महानन्दरूपो ह्यनाद्यन्तभिन्नः ॥
न शिक्षापरो नैव शब्दप्रबुद्धो
न वा छन्दसां सिद्धरूपस्तुरीयः ।



न वा कल्पयुक्तो निरुक्तः प्रयुक्तो
न वा ज्यौतिषो तत्वमेकं षडङ्गम् ॥
तदोङ्कारमोङ्कारमोङ्काररूपं
सदावश्यकोऽहं सदावश्यकोऽहम् ।
न वेदान्तसिद्धो न मीमांसयार्च्यो
न च न्यायसिद्धो न वैशेषिकोऽहम् ॥
न योगप्रयुक्तो न वा तद्वियुक्तो
न वै सांख्यसिद्धो न संख्यापरोऽयम् ।
सदा सच्चिदानन्दरूपोऽयमात्मा
समोऽहं समोऽहं समोऽहं समोऽहम् ॥
न शैवः कुतो नैव विष्णुप्रसिद्धो
महाविष्णुना साधितो नायमात्मा ।
न च ब्रह्मसिद्धो न वा योगयुक्तः
सदा सर्वथा भिन्न एकोऽहमात्मा ॥
न शैवो न शाक्तं न वा वैष्णवोऽहं
न च ब्राह्मभूतो न च ब्राह्मणोऽहम् ।
सदैवैकरूपः सदानन्दरूपः
सदा सर्वथा भिन्न एकोऽहमात्मा ॥
समोऽहं समोऽहं समोऽहं समानो
विधोऽहं विधोऽहं विधोऽहं पुराणः ।

तदोङ्कारमोङ्कारमोङ्काररूपं
सदैवाहमेतन्नकारानुषक्तम् ॥"

इत्यादि प्रवचनम् । तस्मात्तदित्थं भूतं प्रपञ्चपरं च वेदवेदाङ्गोपाङ्गम्, संसारप्रबोधनरूपं सर्वान्तर्गतं सर्वसिद्धं सर्वस्थं प्रणवपरं च वेदितव्यमिति वेदवेदाङ्गोपाङ्गसिद्धान्तः । एतत्प्रबोधनायैव सर्वश्च प्रपञ्चः । तदेवं प्रकारेण ह्योमित्येकाक्षरं नित्यमवधार्यताम्, येन संसारमात्रस्य भ्रममण्डलस्य बोधो भवतीति विज्ञेयम् । अत एव चोङ्कारोऽयं प्रणवो ब्रह्मनिष्ठस्त्रितयात्मकः, पूर्णः शाश्वतः सदसदनुसत्परो ह्यगोचरः सर्वाविर्भूतः सर्वाश्रयः सार्वत्रिकः सर्वोत्तमो ह्यतीतश्च, वेदवेदाङ्गोपाङ्गैरेकैकैश्चाणुभिः विज्ञेय इति सर्वसिद्धान्त इत्यलम् ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे वेदोपाङ्गस्वरूपनिरूपणं नाम**
**॥ पञ्चदशस्तरङ्गः ॥**

ॐ

**अथ**

# षोडशस्तरङ्गः ॥

एवमेतच्चतुर्दशप्रकारं शास्त्रमनेकविधं चेति व्यवस्थितं भवति, सर्वस्यानेकत्वादनेकस्याप्यतीतत्वाच्च । यथा चैकानुगतमनेकं



सर्वसंसरणमात्रम्, तथैव शास्त्रसंसरणमपि बोध्यम्, अवधारणस्य प्रणवपरत्वात् । अत एव—

"संसारोऽयमतीतः स्यादनन्तः प्रणवाभिधः ।
सार्वत्रिको ह्यतीतः स्यात्तादृशः प्रणवो मतः ॥
अयमात्मा परो भूतः सर्वस्थश्च सनातनः ।
तस्मात्तत्त्रितयं विद्धि तादृशं प्रणवस्थितम् ॥"

इत्यादि प्रवचनम् । एवमेव—

"यथैवायमात्मा स्वतः सर्वभिन्नः
सदावश्यकः सर्वसंस्थः प्रसिद्धः ।
सदा संप्रसिद्धः सवेदेन वेद्य-
स्तथा तक्रियानन्तरूपप्रवाहः ॥"

इत्यादि प्रवचनम् । तस्मादेतदङ्गोपाङ्गान्तर्गतं च सर्वं शास्त्रं व्यवस्थितं भवति । यथा—

"साहित्यसङ्गीतकलाकलापो
वैद्यस्तथा शिल्पपुराणसंज्ञकः ।
तथेतिहासः परितः स्मृतिश्च
नाना हि शास्त्राणि भवन्ति तत्परे ॥"

इत्यादि प्रवचनम् । तस्मादेतत्परमेव साहित्यं संगीतं कलाकलापमित्यादिकं यथायथमकारोकारमकारानुभूतमहमेतन्नान्तसिद्धं सर्वं

बोध्यं भवति। यस्य यस्य च यत्र यत्र प्रयोजनं ज्ञानेच्छाक्रियानुषिद्धं तस्य तस्य च तत्र तत्र प्रयोगोऽपि वर्तते । सर्वेषां हि सर्वत्र विद्यमानत्वाद्यथावच्च सर्वं प्रयोजनमिति विज्ञेयम् ।

अत्र हि सर्वेषामेषां भागद्वयेन प्रवचनम्, एकः श्रौतधर्मः, द्वितीयः स्मार्तधर्मश्च । आभ्यां परं तृतीयमपि संबन्धरूपकं धर्मशास्त्रम् । एतच्च समाहारसिद्धान्तपरमिति विज्ञेयम् । अत्रेदमवधेयम्—सर्वमिदं त्रितयानुरोधीति व्याख्यानेन स्पष्टमुक्तं भवति, त्रितयं च तादृशं श्रौतस्मार्तविषयेऽपि बोध्यम्, श्रौतं च ज्ञाननिष्ठम्, स्मार्तं च क्रियानिष्ठं धर्मशास्त्रं प्रकारपरं च वेदितव्यम्, इच्छानिष्ठत्वादेतत्समाहारपरं सिद्धान्तशास्त्रं च व्यवस्थितमिति । अत एव—

"धर्मद्वयं विधौ ज्ञेयं सर्वसंसारकारणम् ।
श्रौतस्मार्तपरं धर्मं ज्ञात्वाऽसौ ब्रह्मविद्भवेत् ॥
श्रौतं स्मार्तं धर्मशास्त्रं सिद्धान्तं च चतुष्टयम् ।
ज्ञात्वा तत्वमवाप्नोति तेन सर्वानुवर्तनम् ॥
परिवर्तविधं सर्वं ततश्चैवं विवर्तनम् ।
संवर्तनानुवर्तं च तस्माद्बोधो यथा भवेत् ॥"

इत्यादि प्रवचनम् । तस्मादिदं च चतुष्टयं यथायथं वेदितव्यमित्युपदेशः । श्रौतं तु श्रुतिपरं सर्वैकनिष्ठमपृथग्बोधकं च भवति । स्मार्तं तु केवलं पृथक्पृथग्भावबोधकं भवति । धर्मशास्त्रं



च तृतीयं ताभ्यां भिन्नं च कर्तव्याकर्तव्यनियामकं भवति । यद्यपि सर्वं कर्तव्यमेवेति स्पष्टम्, तथापि संसरणव्यवहारे कार्यस्य पृथक्प्रवचनतयाऽकर्तव्यमप्यस्तीति विज्ञेयम् । वस्तुतस्तु कर्तव्याकर्तव्ययोरैक्यं हि सर्वथा बोध्यम् । तदेवं सर्वं धर्मशास्त्रपरं मकारनिष्ठम् । सिद्धान्तस्तु जीवस्याखण्डतां सार्वत्रिकतां च बोधयतीति विज्ञेयम् । न तत्र श्रौतस्मार्तधर्मशास्त्राभिधानम्, किं तु सर्वतो भिन्नः सर्वसिद्धोऽयमात्मा सिद्धान्तबोध्य इति स्पष्टमुक्तम् । अत एव—

"न च श्रौतसिद्धो न च स्मार्तसिद्धो
न तद्धर्मसिद्धो न सिद्धान्तसिद्धः ।
सदैवायमात्मा ह्यहं तत्वमेकः
सदा सर्वथावश्यकः सर्वनिष्ठः ॥
न च स्मार्तरूपो न च श्रौतरूपो
न वै धर्मसिद्धः परो वेदनीयः ।
सदा सच्चिदानन्दरूपस्वरूप-
स्तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥
यतो भासते दृश्यते सर्वमेकं
यतः कल्प्यते नीयते सर्वकार्यम् ।
स सर्वैरभिन्नस्स सर्वैश्च भिन्न-
स्तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥

यतो वेदवेदान्ततत्वं प्रतिष्ठं
यतश्चाङ्गमेवं प्रशस्तं प्रधानम् ।
यतस्सर्वमेवं समोपाङ्गसिद्धं
तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥
अहं सर्वमेको द्वितीयो न कश्चित्
तृतीयो न कश्चिच्चतुर्थो न कश्चित् ।
न चानेकमेकं तपस्तत्वभूतं
तदेकोऽहमेकोऽहमोकोऽहमात्मा ॥''

इत्यादि प्रवचनम् । तस्मात्सर्वनिष्ठः सर्वभूतः सर्वसिद्धोऽयमात्मा भवति । अन्यत्सर्वमपि तद्विशिष्टं तादृशं बोध्यम् । तदेवं क्रमेण श्रौतस्मार्तधर्मद्वयमभिधीयते । श्रौतविषयस्तु सन्यासिनाम्, सन्यासाश्रमे हि सर्वेषामेकीकरणप्रयोजनतया श्रौतमध्येयम्, येन सर्वविरोधपरिहारो भवति । यच्च किंचिन्नानात्वेन प्रतिभासते, तत्सर्वमसत्यम्, अहमेव सर्वं खल्विति तत्प्रबोधः । स्मार्तं तु सति च गृहस्थाश्रमे विहितम्, येन सर्वथा चैकत्वनिष्ठा भवति । बुद्ध्यैव हि बहुत्वप्रकल्पनमिति विज्ञेयम् । सति च बहुत्वे, सर्वत्र बहुत्वप्रयोगः । तदेवं क्रमेण बाहुळ्यस्य प्रयोगानुसंधेयत्वेन सर्वप्रबोध इति विज्ञेयम् । तस्मात्स्मार्तानां कार्यं बहिरित्युच्यते । बहुभवनं च बहुत्वप्रयुक्तकार्यमिति स्पष्टम् । अत एव—



"सन्यासिनामयं प्रोक्तः स्मार्तधर्मः परायणः ।
एकस्थं तदिदं सर्वमेकस्थं ज्ञानगोचरम् ॥
स्मार्तो धर्मः क्रियानिष्ठो नानात्वस्य प्रदर्शकः ।
एकनिष्ठे परे ज्ञाने नानात्वं तद्विभाव्यते ॥''

इत्यादि प्रवचनम् । तस्मात्सर्वानुगतं सर्वनिष्ठमेकानेकरूपं द्वयोरुपस्थितं श्रौतं स्मार्तं च धर्मद्वयं भवति । तृतीयं च धर्मशास्त्रं कर्तव्याकर्तव्यनिर्णायकम् । एतादृशश्रौतनिष्ठानामिदं कर्तुमुचितम्, एवं स्मार्तानामिदं कर्तुमुचितमिति धर्मशास्त्रव्यवहारः । स्मृतिशास्त्रे तु सर्वमिदं परिभाव्यम्, कैषा, कुत्रत्या, का वाऽवस्था, कयोः कः संबन्धः, कारणं चात्रेदम्, इत्यादि । किं चात्र—अस्माच्चोपाधेरयमुपाधिः, अयमस्य भक्षकः, अयमस्य विनाशकः, अयमस्यैवोत्पादकः इत्यादि च प्रतिपादितं सर्वम्, सत्ताप्रधानमेकत्वविशिष्टं चेति बोध्यम् । अन्यथा त्वनेकत्वं बहुत्वं च बोध्यम् । अत एव स्मृतिशास्त्रे सर्वस्याभिधानं संप्रदृश्यते—इदं च भक्ष्यमिदमभक्ष्यम्, तत्रेदं सूचितम्, अस्यायं भक्षकः, अस्यायं विनाशकः, अयमेतस्याभक्ष्य इति ; संबन्धविरहात्तदवस्थानियमाच्च । अन्यथा तु सर्वस्य सर्वं भक्ष्यमभक्ष्यं भवति । उत्पाद्योत्पादकभावस्तु सर्वत्र प्रसिद्ध एव । स्मरणं स्मृतिरिति तदर्थोत्कालव्यपेक्षयैव तत्र स्मरणमात्रमाख्यातम् । किं चात्र—अस्य पूर्वमेषा योनिः, अस्य चैषाऽपरा योनिरित्यादिपरिभावनमप्याख्यातम् । योनीनां

प्रत्येकमपि चैवं व्याख्यानम्, अस्याश्चेतादृशं भवतीति । एवं श्रौतांशे सर्वस्योदाहरणात्सर्वैक्यविज्ञानमेव तत्कार्यं भवति । योऽयमात्मा, सत्वेकः परश्च । तस्य प्राधान्ये सति, सर्वस्यैक्यं संप्रभासितुं योग्यम् । तस्मात्सर्वैक्ये संप्रतिभातीति तत्सिद्धान्तः । अत एव—

" एकाभ्यस्तं तदेकस्थं सदेकं प्रणवात्मकम् ।
सर्वं सर्वेण संबोध्यं सर्वाखण्डं निरामयम् ॥
अङ्गोपाङ्गपरं सिद्धं वेदसिद्धं सनातनम् ।
आत्मा चैको निराधारो निमित्तं ब्रह्मसंज्ञकः ॥
सर्वं प्रकल्पितं रूपं सर्वं सामर्थ्यसंभवम् ।
सर्वानन्तं तदाद्यन्तमोमित्येकाक्षरान्वितम् ॥
अमृतः प्रणवोऽनन्तो गायत्री च परावरा ।
आत्मा चैको जगद्भूतो जगत्सिद्धो जगन्मयः ॥ "

इत्यादि प्रवचनम् । तस्मात्तद्बाहुल्यं बहूनामेकत्वं च सिद्धम् । एकस्य सर्वस्वरूपत्वं मान्यम्, तत्सर्वस्यैकत्वबाहुल्यबोधाय च सर्वाणि शास्त्राणि भवन्ति । किंचित्तु शास्त्रं महाविष्णोरवधारणम्, किंचिच्च ब्रह्मणः, तथा विष्णोः शिवस्य चेति विज्ञेयम् । एवं तन्नियमक्रमगतानामपि कार्यानुरोधेन शास्त्रमनन्तमावर्तितं बोध्यम् । शास्त्रं तु किंचिदतीतं प्रणवगोचरम्, किंचिच्च अपरं महाविष्णोरवधारणम् । तदेवं विधानेन शास्त्राणामनन्तत्वमतीतत्वं च भवति ।



एवमार्चितेष्वपि प्रबन्धेषु । एवमार्षशास्त्राण्यप्युपास्थितानि भवन्ति, तदार्चितानां प्रबोधव्यवहारादिति विज्ञेयम् । दृश्यताम्—अवस्था च बोधस्य द्विविधा भवति, प्रथमा तु स्वात्मनो बोधरूपा, केवलानुगमनरूपा च द्वितीयेति । अन्यस्यां हि व्यक्तौ तत्प्रबोधकरणसामर्थ्यमिति तद्भावः । स्वात्मनो ह्यधिकप्रबोधेनैव यथार्थज्ञानेनैव चान्यबोधो भवतीति सर्वाभिमतम् । तस्मादृषयः सर्वे ब्राह्मणाश्च तमेवं स्वात्मानं ज्ञात्वा—अयं चाणुरित्थमेव, एतद्व्यवहारश्चायमित्थं भवति, इत्थं हि जगत्, इदं च जगत्, अयमेवात्मा, अयं चानात्मा, आत्मानात्मनोश्चायं संबन्धः, अनात्मनोऽप्यात्मत्वप्रवचनम्, एकया हि दृष्ट्यानात्मसंस्थापनम्, परस्परमनात्मत्वसंस्थापनं, आधाराधेयभावसंबन्धप्रदर्शनम्, तयोरन्तर्गतं न किंचिदिति प्रवचनम्, नामोत्पत्तिस्थितिप्रळयतत्कारणावश्यकत्वम्, इत्यादि सर्वं च ज्ञात्वा शास्त्रार्चितैः क्रमावधारणैश्चाणूनां प्रत्येकं यथा ह्यवस्था, तदवस्थानुरोधेन प्रबोधयन्तीति निश्चितः सिद्धान्तः । एवं कृते सति सर्वत्वात्मनो विद्यमानतया सर्वत्र सर्वस्य स्थितत्वेन च यथार्थं च बोधं प्राप्य पुनः सोऽपि तद्गतिमुपलभते, लब्ध्वापि तादृशमेव करोतीति सिद्धान्तः । एवं बीजेनानेन संसारे परस्परसापेक्षता भवति । परस्परात्मत्वस्यैक्यात्क्रियादृष्ट्या च परस्परसापेक्षत्वेऽपि सर्वस्य पृथक्त्वेन प्रवचनम् । नेति प्रवचनेन नु सर्वैश्च सर्वं निरपेक्षमित्यपि सिद्धं भवति । यद्येवं योऽहं स

एवायमिति, तर्हि एतेन ममाभीष्टसाधनमिति बुद्धेरभावः। तदभावप्रयोगेणैवायमात्मा सर्वतो निरस्तः। अतश्च स्वात्मनः सर्वकारणं सर्वबीजं सर्वानुगतं च स्वरूपं जानातीति व्याख्यानफलम्।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे शास्त्राणां स्वरूपविज्ञानं नाम षोडशस्तरङ्गः**

---

ॐ

## अथ
# सप्तदशस्तरङ्गः ॥

---

अथ चात्मनां ह्येतेषां व्यष्ट्यवस्थितानां चैकत्वेनोदाहरणं तु सूत्रग्रथितमाला भवति। यथा—एकस्मिंश्च सूत्रे ह्यनेकेषां ग्रथनम्, पुनस्तदेकत्वं यथा स्यात्, तथैवायमात्मा व्यष्टिगत इति। यथैकस्य वृक्षस्य चैकं वीर्यम्, यथा स्वर्णानि समीयमानानि यथा रजतानि काञ्चनानि च यत्किञ्चिन्निर्माय, तेषामेकस्मिंश्च सूत्रे ग्रथनम्, यथा तद्वृक्षदृष्ट्या स्वर्णदृष्ट्या सत्ताप्राधान्येन चैकत्वम्, सूत्रदृष्ट्यापि चैकस्मिन्ननेकत्वप्रकाशः; तथैव संसारव्यवहारः। यद्यपि तत्रैको मुख्यः, अत्र चानन्तत्वादतीतत्वाच्च सर्वस्य मुख्यत्वम्; तथापि क्रमव्यवहारेणात्रापि मुख्यत्वममुख्यत्वं



च व्यवस्थितं भवति। अत्रेदं सूचितं भवति—यदहमेतन्नेत्यनेन पूर्णं परावरं सूत्रसदृशम्, तत्रैव सर्वस्य ग्रथनमिति विज्ञेयम्। यद्वा—यदिदमोङ्कारस्वरूपं तच्चैकम्, तत्र. अ. उ. म. इति सूत्रम्, तस्मिन्नहमेतन्नेत्यादीनां ग्रथनमिति च। यथैवं प्रसिद्धमालायामप्यनेकवृक्षवीर्याणां स्वर्णादीनां च संग्रथनम्, तथैवात्रापीति बोध्यम्। संसारेऽस्मिंश्चान्तर्यदृष्ट्या सर्वेषां लघुत्वं महत्वं चोपन्यस्तम्। क्रमदृष्ट्या तु लघौ महान्, महति लघुश्चेति प्रयोगः। एवं जातिव्यक्तिभेदोऽपि भवति जातावेव व्यक्तिः, व्यक्तौ च जातिप्रकाश इति तदेकत्वविज्ञानाय वेद्यं भवति। एवमेवानेकजातीयानामनेकव्यक्तीनां च तत्कार्यमेकं न संप्रतीयते। इदमेव सापेक्षत्वफलम्, माला चायं संसारः। अणूनां च प्रत्येकमपि वीर्यं तत्प्रतिनिधित्वेन सिद्धं भवति। अस्य चैकं सूत्रम्, भवनव्यापारमात्रमतीतम्, तदत्र मुख्यं च महाविष्णोरिति सर्वाचरणेन बोध्यम्।

संसारमात्रे च यदेकत्वम्, तदेव सूत्रात्मरूपं भवति। अतीतत्वसंबन्धेन प्रणवपरत्वेन च योऽयं व्यवहारः, तद्विषयभूतः सूत्रात्मा भवति। स एवास्य नियामकः सर्वेषामिति विज्ञेम्। यत्र ब्राह्मणजातिरित्युच्यते, तत्राहं ब्राह्मणः, त्वं ब्राह्मणः, अयं ब्राह्मणः इति व्यवहारः। तत्र त्वहमयं त्वमिति च ग्रथिता माला, ब्राह्मणश्च सूत्रम्। तदेवं भावेन सर्वजातावपि बोध्यम्। एकजातिमात्रस्याप्येककर्तृकत्वेन चैकजातिमत्वम्, सत्ताप्राधान्येन

व्यक्तीनामेकत्वं च वेदितव्यम् । अत एव सर्वस्मिंश्च जातिव्यक्ति-प्रयोगो नास्ति, क्रमाधाने सत्येव चैता जातयो भवन्ति । तत्र च प्रत्येकमेता व्यक्तय इति सम्यग्विधानेन बोध्यम् । सार्वत्रिके तु समष्टिव्यष्टिप्रयोगेण पृथक्त्वैकत्वनिर्धारणम् । एकस्तु समष्टिपक्षः, तदनुकरणमेवात्र जातिः । द्वितीयो व्यक्तिपक्षः, तदनुकरणमात्रं च व्यक्तिः । विचारेण चैवं द्रष्टव्यम्—यथा चात्र जातीयाः, तज्जातीयानां समष्टिप्रयुक्तसंबन्धेन त्वेकत्वं भवति, एवमत्रत्य-जातीनामेकत्वं सार्वात्रिकसमष्टिमत्त्वं च संभवत्यवश्यम्, अन्यथा त्वन्यजातीयानां तदन्यजातीयैः सह रागद्वेषादयो भवन्तीति तद्भवनरूपत्वेनैवानुमेयमिति सर्वेषामेषां परस्परं सापेक्षनिरपेक्ष-धर्मवत्त्वेन समष्टिमत्त्वम् । तत्र व्यक्तिमत्त्वं चाप्यवश्यं हि भवति । दृश्यताम्—यो ह्यहमेतन्नेति, तस्य च समष्टिः, तत्राहम्, एतत्, न इति हि व्यष्टिस्वरूपमिति । यद्यप्यहम्येतत्, एतद्यहम्, द्वे च न स्थे, नकारश्च तयोरन्तर्गतः, तथापि चैकैकस्थितौ व्यष्टि-भाव एवेति निश्चयः । समष्टिभावेनैव ह्यहमा चैतन्नयोः संबन्धः, एतदहमोर्न संबन्धः, नैतदो ह्यहमा संबन्धः, अहन्नयोरेतदा संबन्धः, इति परस्परान्तर्गतत्वम् । तद्व्यवहारसाधनं च समष्टि-पक्षः । एकैकत्वे तु व्यष्टिपक्ष एव । एतत्समष्टिव्यष्टिभावेनैव सापेक्षत्वमेकैकनिष्ठं पृथक्त्वं च सिद्धम् । यस्य हि समष्टिः, स च समष्टिभूतत्वे सत्येव पूर्णो भवति । यस्य व्यष्टिः, स च समष्ट्य-



भावादपूर्णः । अपूर्णत्वे हि सापेक्षता, पूर्णत्वे तु निरपेक्षता चेति सर्वैश्चोदाहरणैर्विज्ञेयम् । अत्र च त्रितयस्यैव पूर्णत्वमपि सिद्धम् । सति चैकभावे तदपूर्णत्वमेवेति बीजेन, परस्परसापे-क्षत्वम् । अहं त्वेतदपेक्षते, एतच्चाहमपेक्षते, द्वौ च न कस्यचिद-पेक्षकौ, नकारस्तयोरपेक्षक इति व्याख्यानेन व्यष्टिसमष्ट्यो-र्निर्धारणं सापक्षत्वनिरपेक्षत्वनिर्धारणं च विज्ञेयम् । अत एव "अहमेतन्नास्मीति पूर्णं परापरं परामृतमावश्यकमनावश्यकं सर्व-संस्थं सर्वं च परं ब्रह्म" इति प्रवचनम् । अस्य च देशकाल-परिणामविपरिणामाऽपरिणामाः, देशकालाभावः, निष्कर्तृकत्वम्, अकारणत्वम्, अकार्यत्वम्, सर्वशक्तिमत्त्वं च भवति । अत्रैव हि सर्वं च सामर्थ्यं सार्वत्रिकं च वेद्यमस्ति । यद्यप्योमित्यपि संदृश्यते, तथापि स्वबुद्धिविरामेण हि चाह-मेतन्नेत्यत्रैव तदारोपणं युक्तं भवति । तत्र चायं भेदः—ओमित्यत्र केवलातीतताऽनन्तता च भवति, अहमेतन्नेत्यत्र तु परमातीता, एतदतीततायाः परिमितत्वोपन्यास इति । यद्यप्यतीते परिमितत्वस्यासंभवः, तथापि क्रमाभिधानेनास्य लघुत्वव्यवहारेण च तस्यातीतत्वमुपन्यस्तम् । अस्ति च केषां चिद्दृष्ट्या परि-मितत्वमपि । तेषां चातीतता चानुकूलता । अस्माकं तु चातीत-प्रतिकूलतया स्वलघुत्वव्यवहारेण चाणेरारभ्य महाविष्णुपर्यन्तमती-तत्वमेव । यद्यपि शास्त्रदृष्ट्या तत्परिमितत्वम्, तथापि शास्त्रीय-

परिमिताऽपरिमितत्वयोः, अभावप्रदर्शनात्सर्वथातीतत्वमेव मान्यम्, इति तु शास्त्रे न कदापि दृश्यते, नान्यत्रापि च । तदेवं भूतपरिमितत्वप्राप्तौ क्रियावरोधो भवति, नात ऊर्ध्वं गन्तव्यमिति व्याख्यानेन निश्चयो भवति । इदमेव स्थानम्, किं तु सर्वथैवं भावः । "अत ऊर्ध्वं तत ऊर्ध्वं ततश्चोर्ध्वम्, पुनः कार्यं पुनः कार्यं पुनः कार्यं परावरम्, कार्यान्तरमिदं कार्यं कार्यं हि कार्येण भाव्यते, कर्ता कार्यं कार्यकर्ता कारणं तदुपस्थितम्" इति व्यवहारतया, अनन्तानन्तत्वमेव संसूचितं भवति । अन्यथा त्वेकस्माच्चाणोरूर्ध्वं यावदणुव्यवहारम्, तत्र सर्वं च परिमितं भवति । तस्मात्परमातीतत्वाऽपरमातीतत्वसर्वातीतत्वं च निरर्थं भवति, "परिमितत्वमपरिमितत्वं च सर्वं न किं च न" इति ब्रह्मसूत्रात् । प्राधान्यबोधाय हि—अस्मादारभ्यात्र गच्छ, अस्मिंश्च स्थाने सतीदम्, अस्यां च स्थितौ सत्यामेवं भावो ह्युपलभ्यते, सर्वत्र भावलाभार्थ एव प्रयत्नो भवति, इति तु न कुत्राप्यस्ति । एवं प्राप्ते सति सर्वातीतत्वं परमातीतत्वमपरमातीतत्वं च लभ्यं भवति । अतश्चोर्ध्वं पूर्वं च न व्यवसायः । सर्वथा निश्चितेयं परमातीतताऽपरमातीतता चेति सर्वत्र विज्ञेयम् । अत एव न तदर्थं कदाचिदपि यत्नश्च कर्तव्योऽस्ति । अस्ति कस्य चित्स्यामहं महाविष्णुरिति भावः, तेन किं भवति । एवं स्यामहं ब्रह्मा शिवश्चैवं महाशिवः, तथा महाब्रह्मा महारुद्रो महेश्वरः, इति



भावनापि । तेनापि सर्वभावो नोपलभ्यते, किं तु तदपरेषां दृष्ट्या त्वत्रत्यानामिवाणुत्वमेव । तस्मादेतत्क्रमिकव्यवहारश्च विज्ञेयः प्राधान्यपरः । न यत्नश्चैतदर्थः समुचितो भवति, किं तु स्वात्मानं सार्वकालिकं ब्रह्मस्वरूपं विज्ञाय हि कार्यं च कर्तव्यं भवति । संसरणव्यवहारेण च भावानुसारिणा यस्यामवस्थायां प्राप्तिर्भवति, सा भवत्येव । न च तेन युष्माकं शोकहर्षौ सुखासुखे लाभालाभौ च व्यवस्थितौ भवतः, किं तु स्वात्मनोऽवस्थायां स्वात्मानं सर्वथा सच्चिदानन्दं सर्वस्वभावं सर्वसंस्थितं त्रिमूर्तिरूपं ब्रह्मभावेन विद्धि, इत्युपदेशः । यद्यपि क्रमश्च नानार्थस्तन्मानेऽचितो भवति, तथापि तस्य भाव्यपरत्वाद्भाव्यस्य च भवनपरत्वात्तल्लाभो नियतो भवति । क्रियायाः सर्वपरत्वात्सर्वस्यातीतत्वाच्च सर्वथा कर्म भवत्येव । तथा कर्मफलमपि प्राप्नोत्येव । न तत्र च काचिच्चेष्टा भवति कर्तव्या, किं तु यथालाभं तथा लभेत्, यथा भाव्यं तथा भवेदिति च सर्वशास्त्रसिद्धान्तः । एवं विज्ञाय हि स्वात्मनो ब्रह्मभावेन विवक्षा । स्वात्मानं ब्रह्मभूतं ज्ञात्वा, स्वात्मभाव्यं च सर्वं कार्यं विज्ञाय कर्तव्यं च कार्यं संसारे क्रियतामिति च सर्वत्र सूचितं भवति । तत्र परिमितत्वमपरिमितत्वं सर्वरूपत्वं च ब्रह्मरूपमेव । एतत्त्रितयाज्ञानरूपमेव तत्त्वविज्ञानम् । यच्चैतत्त्रयाणां तत्त्वं तद्ब्रह्मप्रतिष्ठितं भवति । तदतीतत्वं तु केवलमेव भवति, तज्ज्ञानादेव मुक्तिरिति व्याख्यानतया स्वात्मनो मुक्तात्मस्वरूपत्वं विज्ञेयम् । यथा—

"न चैतन्मितो मानरूपोऽयमात्मा
न चातीतसंभाव्यरूपोऽयमात्मा ।
न चैको ह्यनन्तस्वरूपो न चायं
न च व्यष्टिसिद्धः समष्टिप्रधानः ॥
सदातीतरूपो न चातीतरूपः
स्वयं ब्रह्मशक्तिः समः सर्वदाऽयम् ।
न वै सूत्रबद्धः सदा सूत्रबद्धो
न चावेष्टितो वेष्टितः सर्वसिद्धः ॥
न चावश्यकोऽयं सदावश्यकोऽयं
सदैकप्रभावः सुसिद्धोऽयमात्मा ।
अनाद्यन्तरूपः सचैकस्वरूपो
जगद्भावितो भावितैकस्वरूपः ॥
न चैको द्वितीयस्तृतीयो न चाहं
न वाऽनेकरूपस्सदैकप्रमेयः ।
न जानाति किं चित्स्वयं ज्ञेयतत्वं
न चायं समोऽयं क्वचिच्चैवमन्यः ॥
स जानाति सर्वं विजानाति सर्वं
समस्तोऽसमस्तस्समस्तैकरूपः ।
सदा कालजः कालनिष्ठः परेशः
स चानन्तगौणः सदैकस्वरूपः ॥



न चाश्चर्यरूपः सदाश्चर्यरूपः
समस्तोऽसमस्तस्समस्तैकरूपः ।
न वै सर्वगः सर्वनिष्ठः प्रमेयो
निराधारनिर्लिङ्गरूपः स एकः ॥
जगद्भावभूतो ह्यभावप्रभूतः
समस्तोऽसमस्तः समस्तैकरूपः ।
न वै सर्वदेशी न चैकप्रदेशी
न चैवायमात्मा लघुर्वा परः स्यात् ॥
सदा शुद्ध एकः समानन्दरूपः
समस्तोऽसमस्तः समस्तैकरूपः ।
परो बोधरूपः सदैकप्रबोधः
क्रियाज्ञाननिष्ठस्तदिच्छापरस्थः ॥
महाविष्णुना साधितः साध्यरूपः
समस्तोऽसमस्तः समस्तैकरूपः ।
महारुद्रदेवो जगल्लोकदेवः
सदाविष्णुदेवो न वैधातृदेवः ॥
अनेकस्तथा शून्यरूपो ह्यशून्यः
समस्तोऽसमस्तः समस्तैकरूपः ।
परो गोचरश्चाभिरूपेण वेद्यः
पराऽकर्मणा कर्मजः कर्मनिष्ठः ॥

सदा सच्चिदानन्दरूपस्वरूपः
समस्तोऽसमस्तः समस्तैकरूपः ।
अहं त्वं ह्यहं त्वं न चायं न च त्वं
न चाणुप्रसिद्धःप्रकल्पैकरूपः ॥
पुराणास्त्रयो ब्रह्मभावप्रसिद्धाः
समस्तोऽसमस्तः समस्तैकरूपः ।
न वै जायते हन्यते तत्वसिद्धः
सदानन्दसिद्धः सदानन्दरूपः ॥
न वै चिन्त्यरूपो न शोको न हर्षः
समस्तोऽसमस्तः समस्तैकरूपः ।
विशुद्धः सदा तत्वसिद्धः प्रशस्तो
महानन्दसिद्धस्वरूपोऽयमात्मा ॥"

इत्यादि प्रवचनम् । तस्मात्तादृशमेतदात्मस्वरूपं सर्वस्वं सर्वमयं सर्वरूपं वेदितव्यं भवति । न तत्राकुलत्वं व्याकुलत्वम्, अस्मिन्प्राप्तमस्मिन्न प्राप्तम्, एवं कृतमेवं न कृतम्, इत्यादि तु भवति, किं तु सर्वथा सर्वं त्यक्त्वा भाव्यमनुष्ठीयतामित्युपदेशः । तदित्थं प्रकारेण सर्वसंसारकार्यं कर्तुमुचितं भवति । इदमेव भवति व्यष्टिसमष्ट्योः फलम् ।

सूत्ररूपत्वमस्यैवं विज्ञेयम्— यो ह्ययं संसारश्चैकक्रमस्थो महाविष्णुमधिष्ठितः, तस्य च यदेकत्वमेकनियामकत्वं वा, तदेव



सूत्ररूपत्वम्, तन्नियामकश्च सूत्रात्मा भवतीति । यद्यपि तन्नियामको महाविष्णुः, तथापि महाविष्णौ व्यष्टिपक्षः, अत्रत्यानामणूनां च दृष्ट्या ह्येको मुख्यो महाविष्णुः, इति तु तत्प्रमाणम् । सूत्रात्मा च भवति महाविष्णोर्बुद्धिरेतादृशी । सा चानेन बीजेनानेन विधिना च सर्वं नियाम्यमित्यवधारणरूपा । सूत्रात्मा नाम संसारनियतः, तस्यैव सूत्रात्मेति तत्परिभाषा, "एतन्नियतश्च सूत्रात्मा" इति ब्रह्मसूत्रात् । एतत्संसारनियमस्यापि तादृशी चावस्था भवति । यो ह्येवमिदमित्थमित्यादिनियामकः, सोऽपि कस्य चिन्नियाम्य एव । तद्दृष्ट्या तस्यापि चानियन्तृत्वं सिद्धम् । अत एव सर्वेषां नियमानां सर्वनियम इति प्रवचनम् । यो ह्येकस्य नियमः, स चान्यस्यानियमो भवति, यो ह्यनियमः, स चान्यस्य नियमो भवतीति विज्ञेयम् । तस्मात्सर्वनियमानां सर्वैर्नियमैः सह संबन्धः प्रसिद्धः, इति बीजेनैतत्सूत्रात्मनोऽपि तादृशाणुत्वानियमोऽपि सिद्धः । अस्यापि सूत्रात्मत्वम्, एवं तस्यापि ततः परमपि तस्मात्परमपीत्यतीतश्च संबन्धः । आत्मधारणानुकूलव्यापारः सत्ता, इति व्याख्यानात्सत्ताया ह्यतीतत्वं सर्वत्रैवोपन्यस्तं भवति । आत्मनो धारणं नाम सामर्थ्यम्, आत्मा यद्धरति चैतदादिकम्, तदेतदादिधारणसामर्थ्यम् । यदात्मनि तदेव हि सत्तानामात्मनः स्वभावो भवति । यया चावश्यकभवनमात्रं सैव सत्ता, सा त्वेकैव भवति । तयैव हि समष्ट्यां व्यष्ट्यां चैकं सूत्रं भवति ।

यथा—अहं त्वमयमिति त्रितयस्य ब्राह्मणत्वप्रवचनतया ब्राह्मणत्वजातेः सूत्रत्वं सिद्धम्, एवमेव चतुर्णां वर्णानामाश्रमाणां च जातीयानामन्यजातीनां धातुवृक्षपश्वादीनां तदन्तर्गतयोनीनां चापि समष्टिपक्षे यदेकत्वं तदेव सूत्रं भवतीति । अत एव "ईश्वरश्च सर्वेषां सूत्रात्मा भवति" इत्युच्यते । सर्वैश्वर्यसंपन्नश्च यः, स चेश्वरो भवति, ईशत्वं विद्यतेऽस्मिन्निति तदर्थात् । यस्य चेश्वरत्वमिष्टम्, तेनैव तद्भवनं भाव्यं च । तस्मादीश्वरो भवति सूत्रात्मा सर्वसिद्धः । ईशसत्तायामित्यस्माद्धातोरेवमीश्वरार्थसाधनं युक्तम् । यदिष्टं तदेव सत्ता, भाव्यपरत्वात् । सत्तात्वभिचरति सर्वत्रेति व्याख्यानादीश्वरस्य सूत्रात्मत्वं सर्वथा सिद्धं भवति । अत एव—

"स सूत्रात्मा सर्वकर्ता सर्वभोक्ता नियामकः ।
सर्वसिद्धः स्वयंभूश्च सर्वस्थः सर्वसंस्थितः ॥
सूत्रात्मानमिमं विद्धि चेश्वरं सर्वशक्तिकम् ।
येन वै नीयते सर्वं यथावृत्ति यथाभवम् ॥"

इत्यादि प्रवचनम् । तस्मादीश्वरः सर्वभाव्यक्रमनियामकः सूत्रात्मेति विज्ञेयम् । सोऽपि कश्चिज्जीव एव । न तस्यातीततायां तन्महत्त्वम् । यथा—एकस्मिंश्च कुटुंबे कुले गोत्रे वा ह्येक एव नियामकः नियमश्च वा भवति, अस्य जातिमात्रस्यायं नियमः, एतन्नियमानुवर्तनेनैव चेयं जातिरिति व्याख्यानेन तन्नियमस्य तन्नियामकस्य च सूत्रात्मत्वं वेद्यं भवतीति । एवमेव ब्रह्माण्डमात्रस्य



जगन्मात्रस्य विश्वमात्रस्य संसारमात्रस्य च सूत्रात्मत्वं विज्ञेयम् । यथाऽतीतस्य सूत्रात्मरूपमिदमोमित्येकं परावरम्, तथैवमसंसारस्यापि सूत्रात्मा चेश्वरः । सूत्रात्मा चायं स्वयं सर्वनियमः, तन्नियमेनैव संसारसारं प्राप्नोति । तस्मात्तन्नियमस्मरणम्, तदनुरोध्याचरणं च सूत्रात्मनो भजनम्, यतः संसारसारः सारभूतः, येन नियमेनायं संसारोपन्यासः, यतः संसरणरूपा क्रिया, तेषां बोधश्च भवति । तद्बोधस्वरूपमेव ब्रह्मेति सर्वानुष्ठानवेद्यतया चेश्वरस्य भक्तिः समुपन्यस्ता भवति । तदेवं भावेन सूत्रात्मा वेदितव्यो भवति । अत्रेदं सूचितं भवति—एतत्सूत्रात्मभावनया सारप्रबोधाय सर्वाणि शास्त्राणि भवन्तीति । वेदवेदाङ्गोपाङ्गानां साहित्यसंगीतकलादीनां च शास्त्राणां श्रौतस्मार्तधर्मसिद्धान्तानां च सारबोधकत्वेन प्रवचनम् । यच्च सारभूतं तदेव ब्रह्म, तत्कार्यं हि संसरणम् ! तस्य करणाय, सर्वस्य ब्रह्मस्वभावनिरूपणाय च तस्य सर्वातीततायाः प्रबोधनाय च तानीमानि वेदाङ्गादीनि समुपन्यस्तानीति व्याख्यानैः स्पष्टमुक्तं भवति । तस्मात्सर्वमिदं ज्ञात्वा ब्रह्मकार्यं कल्पयन्त्वित्युपदेशः । अत एव—

"साङ्गोपाङ्गं यथायोगं ह्यध्येयो वेद उत्तमः ।
साहित्यमथ सङ्गीतं कलापः कोकसंज्ञकः ॥
शिल्पादिकं च ह्यध्येयं यथाकर्म यथाभवम् ।
सारं विज्ञाय लभते सारो ब्रह्माभिधः परः ॥

ब्रह्मीभूय यथाकार्यं सर्वस्थं तत्समानजम् ।
न तत्र च परः शोको न च हर्षो शुभाशुभे ॥
सर्वं कार्यं हि सर्वत्र क्रिया सार्वत्रिकी भवेत् ।
विज्ञानार्थं हि सर्वेषामेषां संपूर्तये तथा ॥
अध्येयं तत्समध्येयं ब्रह्मतत्वमुपास्यताम् ।
वेदाङ्गादि यथाकालं यथादेशं यथाक्रमम् ॥"

इत्यादि प्रवचनम् । तस्माच्छिल्पकलापादीनामपि तत्सारबोधकत्वोपन्यासो भवति । यद्यपि भाव्यं त्वावश्यकनियमेन भवत्येव, किं तत्र ज्ञानादिप्रयोजनमिति शङ्क्यम् , तथापि ज्ञानस्यात्र परत्वात्सर्वस्य व्यवहारस्याऽऽत्मनो जायमानत्वाच्च तदावश्यकत्वम् । अत्रेदं विज्ञेयम् —यो हि जानाति, ज्ञात्वा च करोति, तत्र ह्यन्यश्च भावः, विना तु ज्ञानमन्ये भावा इति लोकोदाहरणेन स्पष्टमिति । यद्यपि ज्ञानाऽज्ञानयोर्द्वयोरावश्यकत्वेन प्रवचनम् , तथापि स्वदृष्टया हि तत्स्वप्रतिकूलमिति विज्ञेयम् । यथा— यो हि जानाति सर्वमिदं स्वभावजमावश्यकं च जननमरणजीवनादिकं, च स तु जायमाने न हि मोदते, म्रियमाणे न शोचतीति, सर्वथैवं भाव्यं भवत्येवेति च मत्वा स्वात्मानं परितोषयति, यो हि न जानाति विधिमेवम् , स च जायमानेन मोदते, म्रियमाणेन शोचतीति । तत्र शोकेन मोदेन च संसरणव्यवहारो न भवति, किं तु शोकावस्थायां वा तद्विरुद्धमोदावस्थायां वा संप्राप्य



स्वात्मानम् , तत्रैव स्थापयति । तेन कार्यहानिर्भवति । एतत्संसरणकार्यं तु नावरोधपरम् , किं तु सर्वथैवास्याभिसंचरणमेव भवतीति बीजेन तद्बोधौचित्यम् । "मृते शोकं माकुरु जाते हर्षं माकुरु समभावेन तिष्ठतु" इति हि तत्फलं भवति । यद्यपि कथं प्रमोदशोकौ सर्वोपन्यस्तौ, यदि चेदनावश्यकाविमौ ; तयोर्निष्प्रयोजनत्वेन हि प्रवचनम् , निष्प्रयोजनं त्वनावश्यकम् , अनावश्यके च न किंचिदिति, व्याख्यानेन स्पष्टमुक्तं भवति ; तथापि प्रमोदशोकयोरुपन्यासश्चायमेवं भावेन बोध्यः—याविमौ शोकहर्षौ, नैतत्संसारावरोधकौ, किं तु चैतदनुरोधेन संसारप्रसरणं भवत्येवेति । अत एव—

"हर्षशोकसमः सिद्धः संसारोऽयं सनातनः ।
सार्वत्रिकी क्रिया भाति चैतदो ह्यनुरोधिनी ॥"

इत्यादि प्रवचनम् । तस्माज्ज्ञानफलं केवलं यत्किंचिदवरोधकम् , तत्सर्वथा परित्याज्यं भवति । यद्यपि विरामदृष्टया क्रमिकान्वाख्यानपक्षे कार्यावरोधकस्याप्यावश्यकत्वम् , तथापि भाव्यपरं सर्वं मान्यमेव भवति । यद्यपि भाव्याद्विरुद्धं कार्यं न भवतीति व्याख्यानतया शोकहर्षकरणेन च कार्यावरोधकस्याप्यसंभव इति स्पष्टम् , तथापि स्वात्मनः सर्वोत्तमस्वरूपत्वं कर्तृत्वं च विज्ञाय तदनुरोधकरणं तदवरोधकरणं च स्वातन्त्र्यं विज्ञेयम् , स्वतन्त्रः कर्ता इति व्याख्यानात् । तस्मात्तदवरोधकरणं शोकहर्षाभ्यां स्वाधीनम् ,

तदनुरोधकरणं च स्वाधीनमिति सिद्धान्ततया स्वकार्यस्य ज्ञान-परतया च स्वत्वं ज्ञाननिष्ठमिति बीजाच्च ज्ञानप्रयोजनं भवति। प्राप्ते तु ज्ञाने शोकहर्षयोश्च यत्स्वाभाविकमवरोधकत्वं च भाव्यम्, तज्ज्ञात्वा हानिर्न मन्यते; न च लाभश्च मन्यते। किं तु तत्त्वैवं भावो हि विज्ञेयः—यच्चेदं भाव्यं तद्भवति, कार्यस्यास्मात्कालादे-तत्कालपर्यन्तमवरोधकत्वमपि भाव्यम्, तदनुरोधकत्वमपि भाव्यं भवतीह सर्वथा, इति बुध्या कार्यं भवतीति। तत्प्रबोधायैव सूत्रात्मा वेदितव्यो भवति। सूत्रात्मनो विधानमिदं भवति। यथा—

"कृतं चाकृतं कार्यमेव प्रशस्तं
सदा सर्वदा भाव्यमेवैककार्यम्।
अतीतं प्रभाव्यं ह्यनन्तं प्रभाव्यं
सदा सच्चिदानन्दमाभाव्यरूपम्॥"

इत्यादि प्रवचनम्। एवमेव—

"भाव्यमेव हि सर्वत्र भवत्येवं यथायथम्।
अनुरोधोऽवरोधश्च तदारोधस्त्रयात्मकः॥
ओमित्येकाक्षरस्थोऽयं प्रतिष्ठः सार्वकालिकः।
ज्ञानं तदात्मनिष्ठं स्यादतो ज्ञानानुसारि च॥
भाव्यं विद्धि यथायोगमवरोधानुरोधकम्।
आरोधं तादृशं विद्धि क्रियाज्ञानेच्छया वृतम्॥



अनुरोधगतं कार्यं क्रियां विद्धि परायणीम्।
अवरोधगतं कार्यमात्मानं विद्धि सर्वथा॥
आरोधं तत्परं विद्धि चेच्छानिष्ठं सनातनम्।
सूत्रात्मनियतं सर्वं नियमश्च यथाक्रमम्॥
तं ज्ञात्वा सारतां प्राप्य तादृशं कुरु नित्यशः।"

इत्यादि प्रवचनम्। तस्मात्सूत्रात्मनः कार्यत्रयमवरोधानुरोधारोध-रूपं भवति। अवरोधं चाहमः स्वरूपमात्मनिष्ठं ज्ञानावृतम्, तथा नामावरोधकं च दृष्ट्वा चानुरोधो भवति। सर्वे चैते सांसारिकसंसरणव्यवहाराः, सर्वानुरोधगतं कार्यमिति व्याख्या-नात्। आरोधश्च द्वाभ्यामज्ञेयः केवलः, भाव्यमात्रं हि सर्वथैव भवतीति, नैष कश्चिदनुरोधो नावरोधश्चेति च व्याख्यानैश्च सर्वैः स्पष्टमुक्तं भवति। तस्मात्सर्वमेतदकारोकारमकारान्तर्गतम्, अहमे-तन्नेति प्रभूतं च वेद्यं भवति। अन्यथा तु नायमात्मा सूत्रं न तदात्मा न तद्व्यवहार इत्यादि विरुध्येत। तद्यथा—

"न चैवायमात्मा स्वयं सूत्ररूपो
न तत्सूत्रसिद्धः समानः प्रसिद्धः।
सदा सर्वदा सत्वसामीप्ययुक्तो
सदावश्यकोऽयं सदावश्यकोऽयम्॥
न चैवानुरुद्धो न चैवावरुद्धो
न चैवायमात्मा सदैवं हि शुद्धः।

स्वयं सर्वकालात्मकः कालरूपः
सदावश्यकोऽहं सदावश्यकोऽहम् ॥

अहं सर्वरूपो निरस्तः समस्त-
स्तथैवैतदन्तं नकारान्तमेतत् ।

अतीतं महद्ब्रह्मजं ब्रह्मतत्वं
स्वयं ब्रह्मनिष्ठं सदावश्यकं स्यात् ॥

न चैवाभिनेयो न चानीयसिद्धः
समः सर्वगः सर्वजः सर्वनिष्ठः ।

सदैवान्तरूपः समान्तप्रसिद्धः
समोऽयं समोऽयं समोऽयं समोऽयम् ॥"

इत्यादि प्रवचनम् । एवमेव—

"न भवति परमात्मा सूत्रसिद्धो न चात्मा
न भवनमिह भूतं कालिकं कार्यरूपम् ।

विदितमिह न वेद्यं नित्यतत्वस्वरूपं
ह्यसममिह समं वा सत्वमोङ्कारनिष्ठम् ॥

अजमिह न हि जातं चामृतं वामृतं वा
भवनमिह च भाव्यं चापरस्थं मितं वा ।

विभवमहमनेकं तत्वमेकं प्रसिद्धं
अहमिहतदनित्यं नित्यजं ब्रह्मसिद्धम् ॥



नियतमिह न याम्यं नित्यमानीतरूपं
प्रथितमहममोघं व्यक्तिजातिप्रसिद्धम् ।

भवनमिह समष्टिव्यष्टिरूपं तदेकं
तदिह भवति सिद्धं सत्यसिद्धान्तवेद्यम् ॥

भवनमिह न दृश्यं दृश्यमानप्रवाहं
परममिह हि तत्वं कालसिद्धं तदेकम् ।

अकृतमिह कृतं वा योगयुक्तं प्रभूतं
विशदमिह न नेयं सत्यमोङ्काररूपम् ॥"

इत्यादि प्रवचनम् । तदेवं प्रकारेण सर्वथात्मानं सर्वानुगतं विद्धीत्युपदेशः । तत्रैवं भावेन सूत्रात्मा सर्वसंसारनियामकस्तिष्ठतीति, यदेतन्मूलभूतं तदहमेतन्नेति वाचकमिति च विज्ञेयम् । स च परमात्मा, परमश्चासावात्मेति परमात्मा चेत्यर्थावबुद्धो भवति । तेन परमत्वम्, परिमितत्वं परिमितातीतत्वं च भवति, स एवायमात्मेति तदर्थात् । अस्मद्दृष्ट्या तु परमः संसारः परिमितः, स एवात्मा परमात्माऽहमेतन्नरूपो भवति । यद्यप्यहमेतन्नेति त्रितयस्य ह्योमित्येकाक्षरनिष्ठत्वमकारोकारमकारस्थत्वं तादृशमतीतत्वं चोक्तम्, तथाप्यतीततायां बुद्धेरप्राप्तौ सत्यां परमात्मत्वेन प्रवचनम्, अहमेतन्नातीतभावे, अकारोकारमकारभावे च प्रगमनेन यत्र स्थानं भवति, तदेव परिमितं विज्ञेयम् । दृश्यताम्—अतीततायां कियत्पर्यन्तं गंतुमुचितम्, किं तु भाव्यक्रमेण सर्वत्र स्थानमेवास्ति, तदनियतत्वात्, अनाद्यन्त-

त्वाचेति। तस्माद्यो ह्यस्माकं परः, स चात्मा परमात्मा इति विज्ञेयो भवति। तत्संज्ञा चाहमेतन्नेति बोध्या भवति। यद्यपि कीदृशानि पुनरन्यानि नामान्यपि, तथापि तानि नास्माकं प्रतिकूलानि, न तत्प्रयोजकं येन स्वात्मनः परितोषो भवति। यत्र च स्वबुद्धिस्तिष्ठति, यच्चास्माकं वाक्यम्, यच्चास्माकमनुमानेन प्रत्यक्षेण च सिद्धम्, यच्च निर्णयदृष्टान्तसिद्धान्तसिद्धम्, येके च प्रकारा ह्यस्माकमभिवर्तन्ते, तैश्च सर्वैर्यत्किंचित्सिद्धम्, तत्संज्ञा परमात्मेति विज्ञेयम्। एवं हि तदर्थं विज्ञाय तत्स्वरूपावबोधार्थमन्यश्च शब्दोऽहमेतन्नेति चिन्त्यताम्। तदेकत्वातीततत्वबोधनाय चोमित्येतदेवं वेदितव्यं भवति। एवं ज्ञात्वा हि तद्वर्णनं बोद्धव्यम्। योऽयमोङ्कारः प्रणवः स चातीतः, अ. उ. म. इति त्रितयात्मकः, आत्मानात्मनिषेधपरश्च। अत्रैव परिमितव्यवहारः। अपरिमितं चैतत् स्वयम्, अपरिमिते परिमितप्रभावना। यो ह्यपरिमितः, स चैवातीतः। तत्रैव हि नियता स्थितिः। यथा चैकस्मिन्देशे ग्रामगृहनियमः। एवमेकजातौ व्यक्तिपरत्वेन नामाभिधानम्। तत्र नाम्नोऽयं तत्वं भवति। व्यक्त्यनंतत्वमपि तत्र केवलं स्वात्मनः सद्भावेन बोधनाय परिमितं कृतम्। अनन्तानामेकशब्देन ह्येकव्यक्त्या च योगः। अतो योग एव परिमित इति व्याख्यातम्। तस्मादोङ्कारे चापरिमिते, यश्च परिमितः स चाहमेतन्नेति भवति। ओङ्कारश्च पूर्णं ब्रह्मातीतं भवति, अहमेतन्नेति तु तदनुभवः।



तत्र चात्मानात्मनिषिद्धं समुपस्थितं भवति। तत्र परिमितत्वं चात्मानात्मनिषेधसंप्रदर्शकम्। यच्च किंचिदस्माकं तदहमेतन्नेति भवति। इदमपि स्वकार्येणानुमानेन बोध्यम्। सर्वस्मिंश्चाणावेवं हि दृश्यते—अहं त्वम्, अहमेवेत्थम्, अहं कर्ता, अहं भोक्ता, इति। एवं यः करोति, येन कृतम्, यः करिष्यति स चाहमेव भवति। यच्चाहमोऽवधारणम्, तत्सर्वमेव। अहमोभिन्नमन्यदिति दृष्टया सर्वस्यैतत्वमुक्तं भवति। यद्यपि चैतदोऽपि ह्यात्मानुरोधेनाहं त्वं बुध्यते, तथापि व्यष्टिभावेनाहमो भिन्नं यद्वितीयमहं तच्चैतत्। पुनरेवं यच्च किं चित्, अहमो भिन्नावधारणं वाऽहं स्वयं भवति, तन्न किंचित्। अवधारणावधात्रोर्द्वयोरेकत्वप्रवचनतया तदन्याभतया चैकत्वम्। दृश्यताम्—अहमिदं करिष्यामि, करोमि वा, इति प्रवचनेन कृतस्य चेदमो विनाशः, पुनरन्यत्करोति तस्याप्येवं गतिरिति। एवमनन्तानन्तत्वमनवस्थितम्। तस्मादहमेतन्नेति तृतयत्वस्य, नाम त्रितयसमूहस्य पूर्णत्वमुच्यते, ओङ्कारे चापरिमितत्वात्। सचैव परमात्मेत्युच्यते। तत्र च यद्विधानम्, तदहमेतदोर्योगरूपम्, एतन्नयोर्योगरूपम्, नाहमोर्योगरूपं च भवति। तदेव सूत्रात्मा भवति। तस्मात्सूत्रात्मना सृष्टिः, तेनैव परिवर्तविवर्तनव्यवहारश्च भवति। परमात्मा तु सर्वथा पूर्णोऽहमेतन्नेति स्वरूपश्च भवतीति विज्ञेयम्। आत्मानात्मनिषेधस्थानां तत्वातीतत्वादेतस्यापि तद्भावेन हि ग्रह-

णम् । तस्मादेवं प्रकारेण परमात्मा सूत्रात्मा च नियतः । यो हि परमात्मा स चाहमेतन्नेत्यतीतः शाश्वतः । शाश्वतो नाम स्वयं सिद्धो भवति सर्वावश्यकश्च शास् भुवि, इत्यस्माद्धातोः शासभवनमभिधीयते यस्मिन्निति शाश्वतः । तदेवं भवनं त्रिविधम्, अहमेतन्न परम् । तस्मात्तादृशः परमात्मा वेदितव्यो भवति । तौ च परमात्मसूत्रात्मानौ तदोङ्कारपरौ प्रसिद्धौ भवतः । तत्राकारपरः परमात्मा, उकारपरश्च सूत्रात्मा, मकारपरश्च तज्जातः । यद्यपि सर्वत्र स्थितत्वेन सूत्रात्मनः संबन्धरूपत्वं मकारपरत्वमिच्छात्मकत्वं च वक्तुमुचितम्, तथापि सूत्रात्मनो नियमप्रवचनतया नियतमेव संसरणमिति व्यवहारादुकारपरत्वेन सूत्रात्मनः प्रवचनं भवति । तज्जातत्वं तु नाम परमात्मसूत्रात्मजातत्वम् । यत्किंचित्तत्तु विनश्यमानम् । तस्मात्तस्य निषेधपरत्वेन प्रवचनम् । तदेवं भावेन परमात्माविर्भूतः सूत्रात्माविर्भूतश्च संसार इति वेदवचनैश्च स्पष्टमुक्तं भवति । तस्मादिदमुच्यते—

"अहमेतन्नेति वाक्यैः पूर्णं ब्रह्म सनातनम् ।
परमात्मा ह्यकारस्थो ज्ञाननिष्ठो ह्यगोचरः ॥
परिवर्तनं यत्तत्र त्रयं योगाभिदर्शनम् ।
सूत्रात्मा स च विज्ञेयो ह्युकारस्थो ह्यनात्मकः ॥
ताभ्यां जातं च यत्किञ्चिदनित्यमखिलं जगत् ।
मकारस्थं च तद्वेद्यं नेति संबन्धरूपकम् ॥"



इत्यादि प्रवचनम् । तस्मात्सर्वमेतत्त्रितयसंभूतं सर्वसंभूतमेतत्त्रितयं चेति बोध्यम् । तदेवं भावेनैव परमात्मा जीवात्मेति व्यवहारप्रवचनम् । अत एव "सूत्रात्मा तु जीवात्मा, परमात्मा तु सर्वसिद्धः" इत्युच्यते । एतद्भावेनैव प्रत्यगात्मा मूलप्रकृतिः देवी प्रकृतिश्च संभवति । तस्मादेव संसरणक्रिया वेदितव्या भवति । वस्तुतस्तु—

"नायमात्मा स्वयं सिद्धः परः सिद्धो न केन चित् ।
परमात्मा न सूत्रात्मा नामरूपविवर्जितः ॥
नात्मार्थं दृश्यते शब्दो वाक्यं नैव हि किंचन ।
नोपदेशश्च तत्साध्यो नात्मा भावप्रवाचकः ॥
नैव जातो मृतश्चैव जायते श्रयते न च ।
सर्वखण्डस्वरूपोऽयमोमित्येकाक्षरात्मकः ॥"

इत्यादि प्रवचनम् । तस्मादित्थं भावेनैव सूत्रात्मा परमात्मा च विज्ञेयो भवति । ताभ्यामेव सर्वसंसारसंभवः इति सिद्धान्तः ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे परमात्मसूत्रात्मादिस्वरूपनिरूपणं नाम**
**॥ सप्तदशस्तरङ्गः ॥**

ॐ

# अथ
# अष्टादशस्तरङ्गः ॥

अथ तदेवंभूते सूत्रात्मनि परमात्मनि च जगद्विभावना भवति । तत्र सर्वसंसारोत्पत्तिकरणं तत्संबन्धमूलभूतश्च सूत्रात्मा भवति । सर्वप्रतीतिकारणं भवति परमात्मा चाहमेतन्नेति शब्दानुगतः । ततश्चैवमत्र प्रत्यगात्मा देवी प्रकृतिर्मूलप्रकृतिश्चेति विज्ञेयं भवति । तत्र प्रत्यगात्मा त्वकारनिष्ठः । देवी प्रकृतिश्च तावच्छक्तिरूपा भवत्यावश्यकविधानात् । मूलप्रकृतिस्तूकारनिष्ठा । एवं मकारनिष्ठश्च तद्भेदप्रकाशः । प्रत्यगात्मदेवप्रकृतिमूलप्रकृतीनां विनाशश्च नाम स्वच्छन्दो निरामयो निष्क्रियः सर्वरहितश्चेति विज्ञेयम् । एवं प्रकारेण चैतत्सर्वमकारोकारमकारस्थं वेद्यं भवति । तत्राहंमात्रं तत्सर्वम् , यच्च किंचित् । प्रकृतिभावो नाम केवलमहमित्येतज्ज्ञानम् । तच्च नेत्थं न तथा न यथा नान्यथा चेत्यादिस्वरूपम् , तच्च प्रत्यगात्मपरं भवति । ततः प्रत्यगात्मा त्वहमेव केवलमिति विज्ञेयम् । सर्वं प्रति अञ्चति गच्छति इति प्रत्यक् , तद्गमनरूपायाः नाम प्राप्ताप्राप्तभूतायाश्च क्रियायाः, यो ह्यात्मा क्रियान्तर्गतः क्रियाप्रतिष्ठापकश्च, स प्रत्यगात्मेति तदर्थात् , केवलमहमो विज्ञानं प्रत्यगात्म-



ज्ञानमिति ब्रह्मसूत्राच्च, अहमस्वरूपमनन्तरमव्यवहितं शाश्वतमिति सांख्योक्तेः, नाभावस्वरूपो न चापवर्गसिद्धः प्रत्यगात्मेति न्यायप्रवचनाच्च, अहमित्येतज्ज्ञानमात्रं प्रत्यगात्मस्वरूपं भवति । यद्यप्येतद्विना हि नाहं तिष्ठति, तथापि चैतदन्तर्गतत्वेन तन्निष्ठत्वेन च यच्च किंचिदहम् , तद्व्यवहारश्च तदेतदो भिन्न इत्यवश्यं भवति । पदार्थद्वयस्य हि वाक्यभेदेन तद्भिन्नत्वम् । यद्यप्यहम्येतत् , एतदि चाहमित्यपि व्याख्यातम् , तथापि तत्त्वं परस्परं वेदितव्यं भवति, एतद्दृष्ट्या त्वहमित्येतत् , अहंदृष्ट्या चैतदिति । वस्तुतस्त्वभेद एव परस्परफलमिति सूचितं भवति । अहमो व्यष्टिभावश्च नाम ह्येतत् , अन्यथा न किंचिदिति तद्भावो विज्ञेयः । एतदो व्यष्टिभावश्चाहमिति वा, समष्टिभावे त्वहमेतन्नानां चैकैव हि वृत्तिः । यो ह्यहं स नैतत् , यो ह्येतत् स नाहम् , यो हि न स नाहमेतदिति च व्याख्यानात्तत्कार्यं चात्र पृथग्विज्ञेयं भवति । तत्संभवादिव्यापारस्तु सम एवेति निश्चयः । तस्मादहमेव यावल्लोकं संप्रकाशते, तच्चैकत्वविशिष्टं सूत्रवत्प्रत्यगात्मस्वरूपम् । अत एव—

"एतन्नकारयोर्भिन्नश्चाहमेव हि केवलः ।
प्रत्यगात्मा स विज्ञेयः सर्वलोकप्रबन्धकः ॥
यानि कानि च कार्याणि संसारे प्रभवन्ति च ।
तेषां कर्ताऽहमेवास्ति प्रत्यगात्मा परावरः ॥

सर्वक्रियान्तर्भूतोऽयं क्रियामात्रप्रभावकः ।
अहमेतत्स्वरूपात्मा प्रत्यगात्मेति कथ्यते ॥"

इत्यादि प्रवचनम् । तदेवं प्रकारेण प्रत्यगात्मा सर्वसंस्थः सर्वोपेतः सर्वसंपन्नः क्रियान्तर्गतः सर्वस्माच्च शुद्धः प्रवेद्यो भवति । अत एव—

" नाहं वर्णी वर्णधर्मो न कश्चित्
नाहं ज्ञानं ज्ञानयोगो न कश्चित् ।
सर्वं सत्वं सत्परं भावनीयं
जीवो नाहं प्रत्यगात्मा परोऽहम् ॥

नाहं मूलं मूलभूतं न किंचित्
नाहं योगी युज्यते नैव योगैः ।
सत्यं निष्ठं कालजं सत्यनित्यं
जीवो नाहं प्रत्यगात्मा परोऽहम् ॥

नाहं भावोऽभावजश्चानुभावो
नाहं रूपं रूपवान्वा न चाहम् ।
सर्वाधारः सर्वनिष्ठः प्रधानो
जीवो नाहं प्रत्यगात्मा परोऽहम् ॥

नैतद्भावो नान्तरो वेदितव्यो
विद्यारूपो नात्मनो माननीयः ।



सत्यं तत्वं विद्यते भिन्नमेकं
नित्यः साक्षी प्रत्यगात्मा परोऽहम् ॥

नाहं भूमिस्तैजसो नैव चापो
नाहं वायुः सत्यमाकाशभूतम् ।
शास्ता शक्तः कारणं सर्वशुद्धो
जीवो नाहं प्रत्यगात्मा परोऽहम् ॥

अहं चैतत्स्वरूपस्थः सर्वभिन्नः स्वयं प्रभुः ।
प्रत्यगात्मा ह्यहं नित्यः सर्वशक्तः सनातनः ॥"

इत्यादि प्रवचनम् । तस्माच्च प्रत्यगात्मा ह्यहंस्वरूपः केवलः शुद्धश्चेति वेदितव्यो भवति । नैवाहं केवलश्च तिष्ठति, स्थानं चास्यैतदिति च व्याख्यानैः स्पष्टमुक्तं भवति ।

अथ मूलप्रकृतिश्च भवत्येतदेवाऽनात्मा । अत्र च केवलस्यैतदो ग्रहणं भवति । यस्याश्च केवलमेत्, अहमोऽभावः, अनहमिति भावश्च श्लिष्टः, सा च मूलप्रकृतिः । मूलप्रकृतिस्तु परा चैतत्स्वरूपा सर्वाविर्भवनकारणं च भवति । अत्रैव ह्यनेकेषां चाणूनां संभवः, एतदित्यस्य चानेकव्यवहारविषयत्वात् । यद्यपि चैतदोऽप्येकत्वं सूचितम्, नेह नानात्वमिति व्याख्यानात्; तथाप्यहमेतदोर्योगेन भावद्वयम् । द्वित्वमेव ह्यनेकत्वमेकस्माद्विरोधसंभवात् । तस्मान्मूलप्रकृतिरणुरूपा ह्येतन्निष्ठा च भवति । केवलं चैतत्स्वरूपं तु मूलप्रकृतिस्थं नाम स्वयं वेदितव्यम् । मूलस्य

प्रकर्षेण करणम्, यो हि प्रकर्षेण मूलं करोति, अहमित्थं भूतं प्रत्यगात्मस्वरूपं च यन्मूलं तत्प्रदर्शयतीति वा, तद्भावः। अनात्मा तु केवलं मूलप्रकृतिरिति प्रवचनात्, विरुद्धस्वरूपिण्यनहमात्मिका च मूलप्रकृतिरिति ब्रह्मसूत्रात्, अनात्मा विरोधप्रदर्शक-इति न्यायव्याख्यानादपि चैतदित्यस्य मूलप्रकृतित्वं सिद्धं भवति। यो ह्ययं प्रत्यगात्मा, स मूलप्रकृतावुपस्थितो भवति। तद्योगेनैव सर्वेषां प्रकाशः। अत एव तमोभावेन प्रकाशेन च भासमानोऽयं संसार इत्याद्युक्तिः। तत्र च तमःप्रभाववती च मूलप्रकृतिः, प्रकाशात्मकः प्रत्यगात्मेति च व्याख्यानम्। यदा च मूलप्रकृतिस्थितोऽयमात्मा स्यात्तदैव हि संसरणं भवति, आत्मानात्मभावेन हि सर्वप्रदर्शनमिति ब्रह्मसूत्रात्। एवमेव नाहमा जगद्विभावना नैतदा च केवलेनेत्याद्युक्तिः। किं त्वहमेतदोर्भावेन संसारभावो विज्ञेय-इति तद्व्याख्यानफलम्। तस्मादेतदेव यच्छुद्धं तन्मूलप्रकृतिरिति निश्चितं भवति। यद्यपि तयोरविरोधः सत्ताप्राधान्यात्, तथापि संसरणव्यवहारे तयोः सापेक्षत्वेन सर्वं कार्यं दृश्यते। तेन तद्विरोधोऽपि विज्ञेयः। नैतस्य विरोधश्चोच्यते, किं त्वावश्यकत्वेनास्य प्रवचनम्। निर्धारणमप्यस्यावश्यकपरं भवति, तच्च कारणमात्रसापेक्षत्वमेव। यदि चेद्वयोर्विरोधोऽपि मन्येत, तर्हि सापेक्षत्वमनुपयुक्तं भवति। यो हि स्वकार्यं स्वातन्त्र्येण नानुसाधयति, न स ततो विरुद्धः। विरुद्धत्वे तु स्वातन्त्र्यापेक्षा। यद्यप्यहमः



स्वातन्त्र्यमुक्तम्, तथापि कर्तृत्वविशेषणतया तत्कार्ये विनियोगः। कार्यं चास्य भवनमात्रं स्वभावपरम्। तस्मात्स्वातन्त्र्याभावस्तस्यापि विज्ञेयो भवति। स्वातन्त्र्यविवक्षा तु केवलमहंभावे चैतन्नकारभिन्ने सत्येवेति स्पष्टमुक्तं भवति। अत्रैतद्भावे नकारभावे चाहमपि परतन्त्रः। एवमेतत्तु सर्वथा परतन्त्रमेव, परं त्वहमो भेदे सति चैतदो ह्यहंस्वरूपत्वेन स्वातन्त्र्यमप्युच्यते। तस्मात्स्वातन्त्र्याभावेन तदेकत्वं तद्योगेऽपि बोध्यं भवति। ततश्चेत्थं यो ह्येकत्वविरुद्धप्रकाशः, स चानात्मा, सैव मूलप्रकृतिः सर्वमूलप्रकर्षकारिणी च। यद्यपि सा ह्यसद्भाववती सद्भाववती चेत्युच्यते, तथापि तथा कथनं तत्कार्यपरं बोध्यम्। या च मूलप्रकृतिः, सा ह्यसद्भाववती। एतदित्यस्याहमो विरुद्धत्वात्, केवलमुपक्रमनिष्ठया हि साक्षाच्च कालेऽसद्भावः। असच्चाहमो विरुद्धम्। तदेतावानेव चैतद्भावः। या चानहमिति बुद्धिः, सा चासद्भाववती। अहमन्तरा च नैतदः स्थितिः। अहमो विरुद्धत्वेऽपि तत्संभावना नाम ह्यहमश्चाश्रयभूता, इति पक्षे सद्भावावलंबिनी च भवति। सच्चाहमेव, यदहं तच्च देशकालवस्त्वपरिच्छिन्नं भवति। यद्देशकालवस्तु, तच्चाहमाश्रितं भवति। तदित्थं देशकालवस्तु चासत्। तस्मात्सदसद्विशिष्टा मूलप्रकृतिः स्वयमसत्स्वरूपिणी च भवति। अहं तु स्वयं सत्स्वरूपम्। तयोर्योगे सति तस्याः सदसद्भावेन प्रतीतिः। यद्यप्यहमो विरुद्धं चैत-

दिति पृथग्भासते, तथाप्यहमेतदोश्च सूत्ररूपत्वमवश्यमभ्युपगन्तव्यं भवति। संज्ञामात्रस्य तु द्वित्वमेव कारणमिति व्याकरणैः स्पष्टमुक्तं भवति । या ह्यहंसंज्ञा, या चैतत्संज्ञा, तत्कारणं द्वयोरस्तित्वमेव । एकत्वे तु तयोरवाच्यत्वमेव । तस्मात्सद्भावासद्भावा च मूलप्रकृतिरिति विज्ञेयम् । तदेवं क्रमेण हि केवलस्यैतदित्यस्य मूलप्रकृतित्वेन प्रवचनम् । मूलस्य या प्रकृतिः नामप्रदर्शिनी प्रकारभूता संस्थापिका स्थाणुरूपा सा चेति हि तदर्थः । अत्रेदं सूचितं भवति—अहं तु नित्यमेवैतदन्तर्गतं च, एतच्चाहमः प्रकाशकमिति। तस्मादेतदित्यस्य मूलप्रकाशकत्वं सिद्धं भवति। प्रकाशस्तु तमसा संभवति, विना च तमः प्रकाश इति न प्रवचनम् । संज्ञामात्रस्य तु द्वित्वात् , संसारस्य परस्परसापेक्षत्वप्रदर्शनात् , द्वित्वस्यावश्यकत्वाच्च तदेवं ज्ञातुमुचितं भवति । अत एव तदहमेतदोरैक्याभावादेतादिति मूलप्रकृतिः, सा चानन्तरूपिणी सर्वसंबद्धा सर्वप्रभाववती चेति प्रवचनम् । अत्रैव हि सर्वाश्च क्रिया भवंति । तस्मादेतत्परं शिल्पशास्त्रमित्याद्युच्यते । एतद्येव हि सर्वनामकरणं सर्वभवनं चेति सर्वाश्च श्रुतयो वदन्ति । तस्मादेतच्च केवलं मूलप्रकृतिवाचकं भवति, तथा नाम हि स्वयं मूलप्रकृतिरिति च विज्ञेयम् । तत्रैव हि भवत्यात्मनः कार्यम् । अत एव "मूलप्रकृतिः सर्वकारणपरा" इत्याद्युक्तिः । आत्मविलासोऽप्यस्यां हि प्रोच्यते । तदेवं विधानेन चोकारपरा मूलप्र-



कृतिरेतद्रूपा सर्वभवनपरा चेति विज्ञेयम् । अस्याश्चैषा परिभाषा भवति, यस्यां च मूलमहमः कार्यं भवति, सा मूलप्रकृतिरिति । यत्र ह्यहमेतदोरनयोरैक्यं पृथक्त्वप्रकाशश्च, तत्र चैतदिति ज्ञानमात्रं मूलप्रकृतिर्भवति, तद्विरुद्धं तन्निष्ठं चाहमिति ज्ञानमात्रं प्रत्यगात्मेति च श्रुतिः । तत्र मूलप्रकृतौ चाहमिति तदैक्यविरुद्धतया कार्यं भवति, तत्कार्यमेव हि नानात्वम् , तदेव हि संसारः । तस्माद्बहुत्वप्रकाशश्च सर्वोऽप्येकनिष्ठो बोध्यः । यद्यप्यहमेतदोरैक्ये सति भेदस्यासंभव एव, यदेकं तदभिन्नमिति बीजात् ; तथाप्यैक्ये चानेकस्य सत्वाद्विरोधप्रकाशस्तादृशावश्यकपरो भवतीति विज्ञेयम् । ततो नानात्वं तद्विरोधेन हि भासते, न स्वयमिह किंचन इति सर्व व्याख्यानफलं भवति । अत एव योऽयमात्मा चाहमिति, तत्रानहंभावः, भावमात्रस्याभावापेक्षितत्वात् । दृश्यताम्—यदिदं भावरूपं ततो भिन्नमप्यस्ति किंचन, तद्यत्ततो भिन्नं तदैवैतदिति । यद्यपि भावरूपत्वमेतद्यप्यस्ति एतदस्तीति बीजात् , तथापि तदहमो विरुद्धमिति विज्ञेयम् । तस्मादहमेतदोरभेदो भेदश्च विज्ञेयः । यद्यपि द्वयोरस्तित्वं नैककालिकम् , तथापि तद्भवति, एकस्यास्तित्वे यद्द्वितीयस्याऽनस्तित्वज्ञानं तदेव संभवतीति बीजात् । अहमस्तीति बुध्या ह्यहमो भिन्नं नान्यदिति भिन्नबोधश्चाहमः संभवति, तद्भिन्नबोध एव ह्येतद्विरुद्धः, तद्विरुद्धप्रयुक्तकार्यमेव हि नानात्वं भवतीति च सिद्धम् ।

"सा चावस्था भवति, यस्यां चैतद्विभ्रबोधो भवति। सैव हि मूलप्रकृतिः" इति स्पष्टं प्रवचनम्। इत्थं चात्रेदमुदाहरणम्—राजायमेवास्ति सर्वस्य भूमण्डलस्य, अयं चक्रवर्तीति ज्ञानेनापि व्यवहारो भवति, नातो भिन्नः कश्चिदन्य इति, एवमेव स राजा परिभावयति, मत्तो भिन्नः कश्चिदस्ति नास्ति वेति। यश्च संशयपरो विचारः, स एव ह्येकत्वविरोधी भवति। दृश्यताम्—यदि संभवो नास्ति, तर्हि सर्वेषामेवं वादो भवति, तद्विचारश्च निरर्थः, निरर्थानि च कार्याणि न संभवन्ति संसारे, अहमित्यस्य सत्यानुरोधित्वात्, अहंकार्यमात्रकारकत्वाच्च। यद्वा सर्वावश्यकव्याख्यानतया, आवश्यकमात्रस्य सार्थतया, सार्थस्य च सर्वगत्वेन, निरर्थं च न किंचन इति सुस्पष्टतया च, तद्विचारस्य सर्ववादस्य, चैकत्वविरोधित्वेन भिन्नत्वेन च प्रवचनमवश्यं भवतीति। एवं विचारे हि भवति—अयं च मत्सदृशोऽस्ति, नास्त्ययं हि मत्सदृशः, स चास्तीति। एवं वादोऽपि भवति। अत्र च पुनरेवं विचारः—अयं चेत्स मत्तोऽल्पः, नात्र चैषा शक्तिः नायं गुणी, नेत्थं कर्मेति बीजान्नातिसदृशः, न मत्सदृशः इति। अयमेव विचारः, एवं वादोऽपीति च। अत्रेदं द्रष्टव्यम्—यश्चैको हि राजा, स चक्रवर्ती साक्षादहमेव, तत्र राजकीयविषयश्चैतत् इति। तदर्थ एव विचारः। स च विचारो द्विविधः, संशयपरत्वादस्ति वा नास्ति वेति स्वरूपत्वाच्च। दृश्यताम्—एतदो



भावे च राजकीयविषये, विरुद्धत्वभिन्नत्वप्रवचनाद्भावद्वयं भवति। स्वतो भिन्नस्य त्वस्तित्वमनस्तित्वं च परिभाव्यते। एवं तत्रेत्याद्यारोपः। नानात्वं च—इत्थमहमस्मि, न स चेत्थम्, नातो मत्सदृश इति। तन्निर्धारणपरं च सर्वं नानात्ववाचकं भवति। वस्तुतस्तु राजकीयविषये राज्ञि च न भेदः, यो ह्यस्य विषयो भवति स तदन्तर्गत इति व्याख्यानात्, विषयविषयिणोरभेदाच्च। एवं भावे हि नाहमेतदो रैक्यविरोधः। यो ह्यहम्, स च सर्वानुगतः सर्वस्थः स्वात्मानं मन्येत, तत्रैवैतद्विचारः। तद्विचारस्य त्वनेकव्यक्तिः। तस्मादेतद्यनेकत्वं विज्ञेयम्। अनेकत्वमेव हि नानात्वमिति पक्षे च, संसारः नानात्वसहितश्च मिथ्याप्रपंचरूपः। अहमेतदोरैक्ये त्वविरोध एव। अनभिन्नतायाश्च भिन्नाभिन्नत्वविरहादेकत्वं च विज्ञेयम्। अत एव" "द्वित्वैकत्वविशिष्टमिदं जगत्" इति प्रवचनम्। अत एव च सर्वमिदं जगन्मिथ्येति सर्वोक्तिः। मिथ्यात्वं चास्य नानात्वभावेनैव प्रसिद्धम्। यदत्र च नाना स्वरूपं तदेव मिथ्यास्वरूपं भवति। सदसद्भावविशिष्टं च नानात्वं भवति। सदसद्भाव एव मिथ्यारूपः। अहं च सत्, एतच्चासत् अहमेतदोर्योगः संसार इति प्रदर्शनेनास्य मिथ्यात्वं समुपन्यस्तं भवति। वस्तुतस्तु—तदेवमस्य मिथ्यात्वं समुपयुक्तम्, नायं सन्न चायमसत्, इति प्रदर्शनेन बोध्यम्। यस्य चास्तित्वं मन्यते, तदभावोऽप्यावश्यको भवति। अभावस्य भावावश्यकत्व-

मिति बीजात्, द्वयोरत्र प्रदर्शनाच्च सदसद्विशिष्टोऽयमित्युच्यते। सदसच्चैव मिथ्या भवति। योगादेव संज्ञा चान्या भवतीति व्याख्यानात्सदसद्युक्ता च मिथ्या भवतीत्युक्तम्। अत एव भावश्च सत्, अभावश्चासत्, सदसच्च विथ्या, तत्रैव हि प्रपंचः, इति ब्रह्मसूत्रम्। तस्मात्संसारेऽस्मिंश्च नानात्वप्रदर्शनं त्वहमेतदोरैक्यभेदकं भवतीति विज्ञेयम्। वस्तुतस्त्वहमेतदोरैक्यं चावश्यकं भवति। यदहं तदेतदिति बुध्या तु नेह नानात्वम्, किन्तु सर्वस्य चाहमेतदन्तर्गतत्वं तथाहमेतदोरैक्यं च सिद्धं भवति। तस्मात्सर्वस्यैक्यमिति व्याख्यानतो विशेषप्रतिपत्तिः। एवं विचार एव हि योगः। एवं विचारे च कृतेन विचारेण यथावदहमेतदोरैक्यं भेदश्च भवति। तथा हि—अहमेतदोरैक्यरहितमेतन्मात्रं चानात्मा भवति, तत्र चानेकत्वम्, एतदहमोरैक्यविरोधादहंमात्रमात्मा भवति, स चैकस्थः, तादृशैतद्येकत्वविरुद्धे प्रकाशमानत्वेन चात्मनोऽप्यनेकत्वम्, तेनैव तस्य जीवात्मसंज्ञेत्यादि स्पष्टमुक्तं भवति। एवं भावेनैव ह्येतच्च मूलप्रकृतिः, अहं च प्रत्यगात्मा, तयोर्यत्संसरणं तदेव सर्वसंसारः। तदित्थमकारोकारमकारपरं प्रत्यगात्ममूलप्रकृतिस्वरूपं चानुष्ठितं भवति।

तयोः संबन्धरूपो मकारपरश्च नकारो भवति। नकारश्चायं तयोरैक्यविरोधसूचको भवति। ततश्च यदहमेतदोरैक्यानभिन्नत्वं यदहमेतदोरैक्याभिन्नत्वमविरोधश्च, तत्सर्वं प्रशस्तम्।



एवमेतदहमोरैक्यानभिन्नत्वं तद्भिन्नत्वमविरोधश्च सर्वं नकारबोध्यं भवति। तच्च सर्वं नकारपरं विज्ञेयम्। तयोरैक्याविरोधि ज्ञानमेव प्रळयः। तस्मादेकत्वविज्ञाने न भवति वाच्यो वाचकः शब्दो देशः कालः क्रियाक्रिये। अतः सर्वतो भिन्नं हि तत्स्वरूपम्। यदि नाम सर्वमिदं सार्वत्रिकं देशकालादिकं च, तत्सर्वं विरुद्धपरं भवति। तदविरुद्धं चैकत्वमेव, न तत्र भेदः, भेदाभावाच्छब्दोऽपि नैवेति वेदैश्च सर्वैः स्पष्टमुक्तं भवति। तस्मात्संबन्धार्थको नकारः इति प्रवचनम्। सर्वं च देशकालादिकं ह्यहमेतदोरैक्यविरोधपरम्, एतदहमोरैक्यतद्विरोधपरौ देशकालाविति च प्रवचनम्। यदिदं तन्नेति, प्राणापानव्यानोदानसमानाश्च ब्रह्म नेति, पृथिव्यप्तेजोवाय्वाकाशाश्च ब्रह्म नेति, अन्नं वृक्षश्च ब्रह्म नेति, सह्यमसह्यं युक्तमयुक्तं संयुक्तं वियुक्तं च ब्रह्म नेति, ज्ञानं ब्रह्म कर्म च ब्रह्म त्वं ब्रह्माहं ब्रह्माऽन्यद्ब्रह्म हीदं ब्रह्म नेति च, सार्वत्रिकोक्तिः। अत्रेदं सूचितं भवति—यदिदमिदं तत्सर्वमहमेतदोरैक्यविरोधि, एतदहमोरहमश्चैक्यविरोधि च भवति, अतस्तद्विरुद्धस्य ब्रह्मरूपत्वं न वक्तव्यमेकदेशीयत्वात्, ब्रह्म चाहमेतदोरेकत्वरूपम्, एतदहमोश्चाऽप्येकत्वम्, एकत्वे न हि भेदः, भेदाभावान्न तद्वाच्यवाचकौ वाच्यं च भवतीति। तस्मान्नेत्यनेन सर्वमुच्यते। अत एव, अहमेतन्नेति, ब्रह्मस्वरूपमुच्यते। यच्च नामाहमेतदोरैक्यमेतदहमोरैक्यं च, तत्सर्वं ब्रह्मेति सूचितम्।

अत एव "नेति नेति प्रशस्तं ब्रह्म इति वैदिकोक्तिः । एवं भावस्तु प्रणवेन वेदितव्यो भवति । अत एव—अकारोकारयोरैक्यमुकाराकारयोरैक्यं च मेति, तदोमित्येतत्स्वरूपं ब्रह्म नाकारो ब्रह्म, न चोकारो ब्रह्म, न मकारो ब्रह्मेति च, तद्व्याख्यानैः स्पष्टमुक्तं भवति । एवं भावेनैव संसारमात्रस्य चैकत्वं युक्तम् । अकारोकारयोरैक्याविरोधात्, उकाराकारयोरैक्याविरोधाद्वा तादृशं च नानात्वम् । अकारोकारयोरैक्यविरोधात् यश्चोकारप्रकाशः, स एवाऽनात्मा मूलप्रकृतिश्च भवति । उकाराकारयोरैक्यविरोधाद्योऽयमकारप्रकाशः, स एवात्माऽहंस्वरूपः । तयोरेकत्वप्रकाशश्च मकार इत्यभेदः सूचितो भवति । तस्मादात्मानात्मभ्यां नकारेण च सर्वमिदं संदृश्यते, इत्यादि प्रवचनम् । तस्मादेवं भावेनात्मानमनात्मानमहमेतच्च, प्रत्यगात्मसंज्ञकं मूलप्रकृतिसंज्ञकं च विद्धि, इत्युपदेशः । अत एव—मूलप्रकृतौ तमसि प्रत्यगात्मकार्यं भवति, तेनैव हि संसारश्च । तत्र च कार्यद्वयावश्यकत्वेन भावाभावौ चावश्यकौ भवतः । अन्यथा तु सर्वस्यैक्यं तद्विरोधश्च विज्ञेयं भवति । यद्यप्यत्र विरोधस्याधिक्यं भासते, तथापि बाहुल्यदर्शनेन नैतादृशं प्रभासितुं योग्यं भवति । यद्यप्यहमेतदोरैक्यविरोधात्, एतदहमोरैक्यं विरोधश्च, तथापि विरुद्धमात्रे बाहुल्यमिति बीजादत्राधिक्यमल्पत्वं च द्वयं संदृश्यते । यदा हि यश्चाल्पविरोधाकृतः, स तदाधिकविरोधाकृतश्च दृश्यते । दृश्यताम्—



सति चैकत्वविरोधे बहुत्वमेव, समुदायविरोध एव चैकदेशः इतिन्यायव्याख्यानतया, चैकदेशस्याविरुद्ध एव समुदाय इति व्याख्यानाच्च बहुत्वप्रकाश इति । तत्र चाधिक्यमल्पत्वं चावश्यकं भवति । यथा यथा च विरोधाभिवृद्धिर्भवति तथा तथा व्यवहितत्वं च विज्ञेयम् । एवं तेन च यथा यथा ह्याधिक्यं तदविरोधश्च, तथा तथाऽव्यवहितत्वमपि । एवं तेनाल्पत्वमिति सार्वत्रिकेण लोकोदाहरणेन बोध्यम् । विरोधेऽप्यत्यन्तादिविशेषणम् । अत्यन्तविरोधे त्वधिकविरोधः । विरोधमात्रं च सामान्यम् । अविरोधपक्षारोपे चाल्पत्वम्, द्वयोरपि भावरूपत्वात्, तत्संभाव्यत्वाच्च । तदेवं भावेन चैकत्वं बहुत्वमल्पत्वमभिज्ञत्वं च विज्ञेयम् । अत एव "एकोऽहं बहुस्याम्, इत्याद्युक्तिः । योऽहमेकः स चैवं परिभावयति—अहमेवास्मि केवलो वान्योऽपि कश्चिदिति । तेन बहूनामपि संभवो भवति । अहमेवास्मीति बुद्धिः कारणम् । तेनान्यस्यास्तित्वं भवति । अन्यस्य संभवासंभवाववधार्य ह्यहमस्मीति प्रवचनम् । तस्मात्तदहमो ह्यसतश्चैक्यविरोधादन्यसंभवाववधारणाच्च बहुत्वम् । तस्मादेव बहुस्यामिति प्रवचनम् । इदं च केवलं त्वैक्यविरोधपरिभावनमात्रम्, तदेव हि बहुत्वमिति तदर्थः। तस्मात्सर्वत्राहमेतदोरैक्यविरोधित्वम्, एतदहमोरैक्यविरोधित्वम्, तदेकत्वं च वेदितव्यम् । स एव हि सदसद्भावविशिष्टश्च संसारः मूलप्रकृतिजः प्रत्यगात्मसंजातश्चेति विज्ञेयम् । अत एव मूलप्र-

कृतिं प्राप्ते सति सर्वसंभवः" इति प्रवचनम्। इदमेव हि भवति पृथक्त्वैकत्वबीजम्। अयमेव मूलप्रकृतिप्रत्यगात्मविचारः। वस्तुतस्त्वयमात्मा सर्वस्य कारणं सर्वं चात्मकारणं भवति। सर्वतो निष्पन्नं सर्वोपहितं सर्वरहितं च ब्रह्म सनातनमविरुद्धमखण्डमनन्वितं शाश्वतमिति ज्ञातुं शक्यते। यथा हि—

"न मूलप्रकृत्या युतश्चायमात्मा
न च प्रत्यगात्मा परो वेदितव्यः।
न वै तद्विरुद्धो न भिन्नस्वरूप-
स्तदेकोऽहमेकोऽहमेकोऽहमात्मा॥

अनित्यं सदा नित्यजं विद्धि तत्वं
परं ज्ञानगम्यं सदातीतरूपम्।
तदोङ्कारभिन्नस्वरूपं प्रसिद्धं
तदेकोऽहमेकोऽहमेकोऽहमात्मा॥

अशुद्धो विशुद्धः परेशः पवित्रं
परानन्तभावः स चाद्यन्तभिन्नः।
समस्तप्रकाशैर्विशुद्धस्वरूप-
स्तदेकोऽहमेकोऽहमेकोऽहमात्मा॥

सदा सर्वदा सत्यमोङ्कारस्वरूपं
सदैवाहमेतत्सदैवाहमेवम्।



स्वतः सर्वरूपान्तरं सर्वमेकं
तदेकोऽहमेकोऽहमेकोऽहमात्मा॥

अनेकस्तथैको बहुत्वैकरूपः
सदा सद्वृतो मिथ्यया भासमानः।
समः सर्वरूपान्तरः स्वानुरूप-
स्तदेकोऽहमेकोऽहमेकोऽहमात्मा॥

न मूलप्रसिद्धः परब्रह्मवेद्यो
न वा प्रत्यगात्मप्रसिद्धः परोऽयम्।
सदा सर्वगः सत्यमावश्यकः स्या-
त्तदेकोऽहमेकोऽहमेकोऽहमात्मा॥"

इत्यादि प्रवचनम्। एवमेव—

"एक एव जगद्रूपश्चैतद्रूपः सनातनः।
अहं ज्ञात्वा लभेन्मुक्तिं ब्रह्मभावश्च लभ्यते॥

अहमेतद्विरुद्धा च सर्वसंसारभावना।
पृथक्पृथक्समारोपः सर्वस्वो ब्रह्मसंज्ञकः॥

अहमेतद्विरुद्धं च ह्यैक्यमात्मगतं भवेत्।
तज्ज्ञात्वा सर्वमेकस्थं वेदितव्यः सनातनः॥

अभेदस्य प्रकाशो यो ह्यहमेतद्विनिर्मितः।
अयं मोक्षः समानन्दो ह्योङ्कारः प्रणवात्मकः॥"

इत्यादि प्रवचनम् । तस्मादित्थं भावात्मकः प्रत्यगात्मा तद्भावानुगता मूलप्रकृतिश्च विज्ञेया भवति । अन्यथा सर्वसंसारस्यैकत्वं व्याख्यातम् । तदेवमकारोकारमकारान्तर्गतमहमेतन्नप्रयुक्तं च सर्वं बोध्यं भवति ।

एवमेवाहमेतदो रैक्यविरोधावश्यकत्वेन भवति देवी प्रकृतिः। सा चेकारवाच्याऽकारोकारयोर्मध्यवर्तिनी शक्तिः । दृश्यताम्—वस्तुद्वयस्यैकनिष्ठस्य च विरोधो ह्यावश्यकपरो भवत्यनावश्यकस्य चाभावात्, तस्य चाभावरूपत्वात्सर्वमावश्यकमिति व्याख्यानाच्च, अतो विरोधभवनम्, यच्च भवनं तदेवावश्यकमिति सूचितत्वेन तद्विरुद्धरूपा च शक्तिर्देवी प्रकृतिर्भवतीति । तस्यामेव प्रत्यगात्मनो मूलप्रकृतेश्च प्रकाशः । अत एव—देवप्रकृत्यन्तर्गता मूलप्रकृतिः, तदन्तर्गतश्च प्रत्यगात्मा, सा च द्वयोरावश्यकी शक्तिरूपा सर्वप्रकाशिका भवतीत्याद्युक्तिः । दीव्यते शक्तिरनया इति हि देवी भवति । प्रकृतिस्तु स्वभावः । यया च भवनं प्रकर्षेण स्वयत्नेन, सा प्रकृतिः । प्रकरणं स्वकरणं प्रकृतिरिति च । कृञश्च क्तिन्प्रत्ययः । सर्वस्य करणं स्वकरणमेव । सर्वस्यैक्यात्स्वयं सर्वमिति व्याख्यानात्सर्वावश्यकत्वाच्च देवी प्रकृतिरिति तत्संज्ञा भवति । अत एव—द्विविधा भवति च प्रकृतिः, तत्रैका देवी प्रकृतिः, द्वितीया तु मूलप्रकृतिः, मूलप्रकृतेः स्वरूपं तु चैतद्विषयकमित्याद्युक्तम् । देवप्रकृतेश्च स्वरूपद्वयमावश्यकपरं वेदितव्यम् । प्रत्यगात्ममूलप्रकृत्योर्हि किल भवति योगः । अयमेव चैक्यविरोधफलं भवति । ऐक्ये तु न योगादिप्रकाशः, विषयविषयिणोस्तमःप्रकाशवदवभासमानत्वेन योग इति योगसूत्रात् । तद्योगावश्यकत्वेन हि भवति योगमाया । तद्विरुद्धप्रकाशावश्यकतया हि माया भवति । सैव देवी प्रकृतिः, या च प्रत्यगात्मानं मूलप्रकृतिं चाभिद्योतयति । द्वयोरन्तर्वर्तिनी देवी प्रकृतिश्चेकाररूपा बोध्या । यया च प्रत्यगात्मनो मूलप्रकृतेश्च प्रकाशः, अनेकानुभवश्च, सा च देवीसंज्ञिका भवतीति विज्ञेयम् । यैषा देवी प्रकृतिः, सा च माया । तत्रैवं भेदः—अतीतप्रवचने च सार्वत्रिके माया, संसारप्रवचने चाहमेतदो रैक्यविरोधावश्यकतया चैतदहमो रैक्यविरोधावश्यकतया च देवी प्रकृतिरिति । अत एव—



“ सांसारिकी च या माया तद्विरोधानुगामिनी ।
देवीसंज्ञा समाख्याता यया संधार्यते जगत् ॥
अहमेतद्विरोधेन भासते चाखिलं जगत् ।
तदवश्या परा देवी सर्वमूलानुगामिनी ॥
अकारोकारयोर्मध्ये चेकारेण प्रवर्तिता ।
तदन्तर्वर्तिनी साक्षाद्देवी प्रकृतिरुत्तमा ॥ ”

इत्यादि प्रवचनम् । तस्मादित्थं भावेन प्रत्यगात्मदेवप्रकृतिमूलप्रकृतीनां योगेन नकारप्रयोगेण च चतुष्टयत्वसिद्धौ तत्संसारभवनमिति विज्ञेयम् । ततो दैवमूलयोर्द्वयोश्च प्रकृतित्वेन प्रवचनम् ।

तत्कारणमियं देवी प्रकृतिश्चैतत्सन्निधानपरा । एवमपि व्याख्यातम्—एतदावश्यकतया देवी प्रकृतिः, अहमावश्यकतया चान्या प्रकृतिः नास्यावश्यकतया भवत्यन्या प्रकृतिश्चेति बीजात्, एतत्सन्निधानतयैव देव्याश्च प्रकृतित्वेन प्रवचनम्, प्रकृतिरेवावश्यकपरा चेति व्याख्यानफलं भवति, आवश्यकतया स्वतः कारणं सर्वस्येति नाम सर्वावश्यकतया स्वयं भवतीति । तस्मादेव देवी प्रकृतिर्मूलप्रकृतिश्चेत्युच्यते । आत्मनः दैवं मूलं चेति प्रकृतिद्वयम् । आत्मा तु स्वयं स्वच्छन्दः । तद्भिन्नं तदनस्तित्वमेव । तच्चावश्यकपरं भवति । अतश्चैतदावश्यकतया ह्येतत्संज्ञा देवी प्रकृतिरिति । तयैव हि भवत्येतदहमोर्योगः । स च योग एव संसारः । स एव सदसद्भावविशिष्टो भवति नानात्वयुक्तः । तत्रैकत्वनिष्ठो नकारः । तदेवं क्रमेण सर्वप्रकाश इति विज्ञेयम् । ततश्चेत्थं भावेन प्रत्यगात्मा देवी प्रकृतिर्मूलप्रकृतिश्च भवति । तदेकत्वाविरोधान्नकारोऽपीति तद्भावो विज्ञेयः । वस्तुतस्त्वयमात्मा न देवप्रकृतिको न च मूलप्रकृतिको नाऽनात्मसंज्ञश्च भवति । तं च सर्वनिष्ठमहमित्येकरूपं विद्धि, इत्युपदेशः । यथा वा—

“ न चैवायमात्मा भवेत्प्रत्यगात्मा
न दैवो न मूलं समस्तस्वरूपः ।
न चैवात्मसंज्ञो न चानात्मसंज्ञः
सदा बुद्धशुद्धः समानस्वरूपः ॥ ”



इत्यादि प्रवचनम् । तस्मादित्थं भेदचतुष्टयं तदेकत्वं चोक्तं भवति । तदेतेषां च देवमूलप्रत्यगात्मनां संज्ञास्त्वनेका ह्यवस्थानुसारिण्योऽनवस्थापराश्च बोध्या भवन्ति । अस्याश्च मूलप्रकृतेः सार्वत्रिकत्वे चातीतत्वे सति चानात्मसंज्ञा । परिमिते संसारे च मूलप्रकृतिसंज्ञा । एवं ब्रह्माण्डे चापरा प्रकृतिरप्युच्यते । यथा यथाऽनभिदृष्ट्वा महत्वं लघुत्वं च, तथा तथा संज्ञायाश्चापि भेदः । एवमेवातीते सार्वत्रिके च माया संसारे देवी प्रकृतिः । ब्रह्माण्डे परा प्रकृतिरप्युच्यते । एवं परमात्मा चात्मा सूत्रात्मा प्रत्यगात्मा जीवात्मापीति विज्ञेयम् । अत एव सर्वातीतत्वे चात्मा, परिमितत्वे परमात्मा, नियमांशे सूत्रात्मा, कार्ये प्रत्यगात्मा, तदनुभवे जीवात्मा चेति व्यवहारः । एवमणूनां च प्रत्येकमनन्तानन्तसंज्ञा बोध्या । सर्वं चैतदावश्यकं प्रणवपरमनन्तं वेद्यम् । अत एव—

“ अनन्तः परमातीतो ह्योङ्कारः प्रणवाभिधः ।
तत्रास्ति च यथाभावं त्रितयं सर्वथा सदा ॥
आन्तर्येण हि भावेन परिवर्तनतस्तथा ।
भवत्यनेका संज्ञा च सर्वसंसारहेतुकी ॥
आत्मा च परमात्मा च प्रत्यगात्मा तथाऽपरः ।
जीवात्मा च क्रमेणैवं वेदितव्यं चतुष्टयम् ॥
अनात्मा प्रकृतिश्चैव मूलप्रकृतिरेव च ।
अपरा प्रकृतिश्चैवं विद्यते च चतुष्टयम् ॥

ततो ह्यावश्यकी माया देवी प्रकृतिरेव च ।
परा प्रकृतिसंपन्ना भेदश्चैवं चतुर्विधः ॥

एवं हि त्रितयानन्तं त्रयं ब्रह्म सनातनम् ।
प्रत्यण्वपि च विज्ञेया संज्ञा चैषा पृथक्पृथक् ॥"

इत्यादि प्रवचनम् । वस्तुतस्तु—

"परा नापरा नैव देवो न मूलं
न माया न चावश्यकं ब्रह्म सिद्धम् ।
न वै योगमाया न शक्तिर्न चेच्छा
सदा सद्विभिन्नं च भिन्नस्वरूपम् ॥

न च प्रत्यगात्मा न सिद्धस्तदात्मा
न चैवं ह्यनात्मा न तत्सिद्धरूपः ।
परात्मप्रसिद्धं न चानात्मसिद्धं
न जीवात्मसिद्धं स्वरूपं समोऽहम् ॥

न संसारसिद्धं न चातीतसिद्धं
न चाण्डप्रसिद्धं जगत्सिद्धमेवम् ।
न विश्वप्रसिद्धं महाविश्वसिद्धं
न लोकप्रसिद्धं महालोकयुक्तम् ॥

सदैवाहमेतन्नकारस्थरूपं
सदैवाहमेतन्नकारस्थरूपम् ।



नकारोऽनकारो ह्यहं चैतदेवं
नकारोऽनकारः समानोऽसमानः ॥
समं नैव किंचिद्विभिन्नं न किंचित्
न भिन्नं न किंचिन्न भिन्नस्वरूपम् ।
न वै तत्सदंशं न वैतच्चिदंशं
न चानन्दरूपं ह्यनन्यस्वरूपम् ॥
न कालो न देशो न वस्तुप्रसिद्धं
न भिन्नं न भिन्नं न भिन्नस्वरूपम् ।
सदैवाहमेकोऽहमेकोऽहमात्मा
स चोङ्काररूपस्वरूपोऽहमात्मा ॥
अनानन्दरूपो न चानन्दरूपो
न भिन्नोऽनभिन्नो न भिन्नस्वरूपः ।
कृतं कालिकं कारणं कालसिद्धो
न तत्सत्स्वरूपः समानः प्रसिद्धः ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वादि परमोङ्कारनिष्ठं सर्वैक्यविरोधस्थं ब्रह्म विद्धीत्युपदेशः । एतद्विरोधभावनया प्रपंचरूपात्मकं सृष्टिमात्रं तथा प्रत्यगात्मानं देवीं प्रकृतिं मूलप्रकृतिं परमात्मानमात्मानं च सर्वमेकत्वपरं भेदनिष्ठं वेद्यमिति सिद्धान्त इत्यलम् ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे प्रत्यगात्मादिप्रकृतिस्वरूपनिरूपणं नाम**
**॥ अष्टादशस्तरङ्गः ॥**

ॐ

अथ

# एकोनविंशस्तरङ्गः ॥

तदित्थमेव भवति जीवात्मा देवमूलप्रकृतिप्रतिष्ठापकश्चात्मस्वरूपः। तदेवं भावेन सर्वोपन्यस्तश्चायं जीवात्मा सर्वान्तर्गतो भवति। यश्चायं जीवात्मा, स चाहमेतदोरैक्यविरोधेन चैकत्वनिष्ठेन संभवति। अहमंशो ह्येतदंशश्च मिळित्वा जीवात्मा भवति, एतच्चाहं च जीवात्मेति प्रवचनात्, जीवति क्रीडत्यात्माऽस्मिन्निति तदर्थाच्च। अहमश्चैतदभियोगात्तदुपपन्नव्याख्यानाच्च जीवात्मसंज्ञा भवतीति फलितं भवति। योऽयं हि जीवात्मा, स चेश्वरप्रतिबिंबभूतः। ईश्वरस्तु सूत्रात्मा, तत्प्रतिबिंबोऽयं जीवात्मेति फलितं भवति। यद्यपि जीवात्मनो ब्रह्मरूपत्वेन प्रवचनम्, तथापि तज्ज्ञानव्यवहारपरं बोध्यम्। यदा हि जीवात्मा स्वात्मानमित्थं जानाति—जगच्चेत्थमहमित्थमेतदित्थं भवनमित्थं भाव्यं चेदमित्यादि, तदैवैतस्य ब्रह्मस्वरूपत्वं विज्ञेयम्। एतद्दृष्ट्या तु जीवब्रह्मणोरभेद एव सूचितो भवति। वस्तुतस्तु न जीवात्मा न प्रत्यगात्मा न सूत्रात्मा न परमात्मा नाणुर्न च परमाणुरिति सर्वत्र स्पष्टमुक्तं भवति। तस्मादेतदंशेऽहमंशे च प्रयुक्ते सत्यात्मनो



जीवात्मसंज्ञा। नकारांशोऽपि तत्र वर्तते। तेन भावाभावौ प्रदर्शितौ भवतः, अहमेतदोरंशश्च नकाराभियुक्तो जीव इति ब्रह्मसूत्रात्, भावाभावौ चाहमेतन्नाधिगताविति प्रवचनाद्वा। तस्मादहमेतन्नानामंशोऽयं जीवात्मा भवति। यद्यप्येतस्याणुत्वमखण्डत्वं चोक्तम्, तस्याणुत्वे खण्डरूपत्वप्रदर्शनमणुत्वप्रदर्शनं च प्रत्यक्षसिद्धम्, अखण्डस्वरूपत्वं च न संभवितुं शक्यम्, तथापि ब्रह्मदृष्ट्या त्रित्वैकत्वप्रवचनतया च तदखण्डत्वमणुत्वं च मान्यं भवति। योऽयमखण्डो ह्यात्मा, सोप्यावश्यकतानुरोधेन चैतदन्तर्गतो भूत्वा हि निरुद्धो भवति। एवमेव जीवस्याणुत्वमखण्डत्वं भावाभावयुक्तत्वं च वेदितव्यम्। दृश्यताम्—योऽयमात्मा जीवः, स च प्रत्यगात्मसंबन्धेनाहमो व्यष्टिसमष्टिपक्षे त्वेक एव भवति, अहमश्चैक्यविरोधरूपमेव ह्येतत्वं तद्विरोधावश्यकपरमिति। तत्र च स्वभावजश्चाहमो व्यष्टिभावः, एकोऽहमहं द्वितीयोऽहं त्वं तृतीयोऽहमयमिति। एवं प्रकारेणाहमो व्यष्टिभावश्चानन्तो वेदितव्यो भवति। तत्र चाहमश्च केवलैक्याभियोगदृष्ट्या खण्डत्वम्, तथाह्यहमश्च सर्वस्याप्येकसूत्रान्तर्गतत्वम्, एवमेव चैतदैक्यविरोधादणुत्वं परिमितत्वं च भवति। खण्डत्वसूचितश्चाहमेतदोर्योग एव, स च विरोधपरः। तत्राहमेतदिति विरुद्धरूपमणुत्वम्। तस्मादहमेतदोश्चांशः, अहमेतदोर्व्यष्टिश्च मिळित्वा जीवात्मवाचको भवति। अत एवोच्यते—अहं जीवात्मा, त्वं च पुनरात्मा, पर-

मात्मा चैकस्थः सनातनः परं ब्रह्मेति । अहमेतन्नेत्यैक्यविरोधश्च पूर्णः । अहमेतदोर्नस्य च यो व्यष्टिभावः, स जीवात्मा भवति। विरुद्धः स्वयं विरोधरूपश्च परमात्मा, अंशानां प्रत्येकमप्युच्यते । अंशकारणमहमेतन्नानामैक्यविरोधश्चायमात्मा भवति, ततश्चांशः । यद्यपि यो ह्यविरुद्धः पूर्णः शाश्वतः, तस्य विरोधवचनमयुक्तम्, तथापि पूर्णे शाश्वते चाविरुद्धे विरोधोद्भवनमवश्यं भवति, द्वित्वपरत्वात्, द्वित्वस्यावश्यकत्वाद्वा । अत एव—

" द्वित्वमस्तीह सर्वस्य द्वित्वं संसारकारणम् ।
द्वित्वे द्वित्वमिदं व्याप्तं द्वित्वं द्वित्वेन बुध्यते ॥
इदं तत्र फलं बोध्यं ततो विश्वविभावना ।
ऐक्यं च समनुष्ठानं द्वित्वं प्रत्यणु दृश्यते ॥
ऐक्यं च तद्विरोधश्च द्वयोरेकत्र संग्रहः ।"

इत्यादि प्रवचनम् । तस्मादहमंशो ह्येतदंशश्च जीवात्मेति सिद्धम्। अत एवास्य खण्डरूपत्वमखण्डरूपत्वं च भवति । अहमेतदोरैक्यविरोधेन तथा चैतदहमोरैक्यविरोधेन चाखण्डत्वम् । प्रत्यंशं विरोधे पृथक्त्वे च त्रैरूप्यम् । तदेवं त्रितयात्मकमिदं जगदिति प्रवचनम् । तस्मादेव जीवस्याणुत्वं तदेतदैक्यं च संसूचितं भवति ।

यद्यपि जीवात्मनः सुखदुःखाद्यनुभवः, अयं च जायते म्रियते जीवति चेति व्यवहारः, तथा शोको हर्षश्च भवति, तथापि



तथा ज्ञानं भ्रमपरं विज्ञेयम् । जायमानरूपा क्रिया तत्सामर्थ्यम्, मरणरूपा क्रिया तत्सामर्थ्यम्, जीवनरूपा क्रिया तत्सामर्थ्यं च परमात्मन्यपि दृश्यते । तत्रैवं हि भेदः—स च परमात्मा स्वात्मानमखण्डं निरामयं सार्वत्रिकं सर्वातीतं चाभिमन्यते, न तस्य कश्चिद्वाच्यो वाचकश्च, किं तु स्वात्मानं स्वयमेव वदत्यहमेतन्नेति । यस्य स्वभावः, तस्य अहंभावेन जातत्वं अमृतत्वमविरुद्धत्वमेकत्वं च मन्यते । एवमेतद्भावेन चैतत्कर्तृत्वमेतत्वं बहुत्वं चारोप्यते । एवं नकारभावेन चाहमेतदोरैक्यं बुध्यते । तस्मात्तस्मिन्नेव परमात्मनि सर्वस्वभावः कर्तुमकर्तुमन्यथाकर्तुं शक्तिश्च वर्तत इति परमात्मनः सामर्थ्यम् । नाम तत्सामर्थ्यमेव समूहत्वेन परमात्मेति विज्ञायते । तस्मात्तदविरोध एव सूचितो भवति । जीवात्मन्यपि तादृशमहमेतन्नानुरोधि च कार्यं भवति । परं त्वल्पज्ञानतया चैवं मन्यते—अहं सुखी, ह्यहं दुःखी, अहं साधुर्धर्मात्मा न किंचनेति । इदमेवाज्ञानम् । तदज्ञानवारणाय नामैतज्ज्ञानोत्पादनाय चेदं सर्वं च प्राकृतं भवनं भाव्यं च भवत्येव । नाहं किंचन, न त्वं किंचन, न ममायम्, न तवायम्, न चान्यस्येति न मम तवान्यस्येति च भेदः, किं तु ममता वान्यस्य चाहं भावेनैकत्वमेव । एवमेतद्भावेऽपि संभावनयाहमेतदोरेकत्वं तदविरोधश्च वेदितव्यं भवति । अन्यथा तु जीवात्मपरमात्मनोरभेदश्च सर्वथा मान्य एव । एवं दृष्ट्या हि जीवात्मा

परमात्मा च प्रतीयते । प्रत्यगात्मपरमात्मनोरप्येवं भेदः—प्रत्यगात्मा तु केवलमहम्, केवलमेतच्च मूलप्रकृतिः, तयोरेकत्वं योगप्रभावनम्, व्यष्टिगतश्च जीवात्मेति । यद्यहमेतदोर्योगावश्यकत्वं सर्वकाले सर्वदेशे च ह्येतेषामनुयोजनं च दृश्यते, तर्हि तदनुयोगस्य भावद्वयं व्यष्टिः समष्टिश्च भवति । समष्टिपक्षे त्वविरुद्धः पूर्णः, तदैक्यविरोधाच्च हि व्यष्ट्युपन्यासः । तत्र प्रत्यगात्ममूलप्रकृत्यंशोऽयं जीवात्मा भवति । नाम चाहमेतदोर्योगावस्थायामेव । अत एव जीवात्मनोऽल्पज्ञत्वं परमात्मनश्च सर्वज्ञत्वं चाप्युच्यते । योऽयं परमात्मा स चाहमेतन्नाविरुद्धः, इदमेव सर्वम्, तत्समूह एव परमात्मा भवति । तस्मिन्सर्वस्य च विद्यमानत्वात्स सर्वज्ञः, अहमेतदिति केवलस्य विरोधस्य प्रदर्शितत्वात् । सर्वाहमः सर्वैतदश्चाविद्यमानत्वादल्पज्ञत्वमुच्यते । यादृशश्चाहम्, यादृशं चैतत्, तादृशं तज्ज्ञानमपीति बोध्यम्, अहमेतदोर्योग एव ज्ञानमिति सिद्धान्तात् । अत एव सार्वत्रिकं ज्ञानं सति च परिमितत्वे जीवात्मनि स्मृतिरित्युच्यते । इदं च कालपरं भवति । तस्मात्सर्वज्ञत्वमल्पज्ञत्वं चेत्थं बोध्यं भवति । यो ह्ययमात्मा जीवभावविशिष्टः स चाल्पज्ञः, यश्च परमात्मा सचाविरोधदृष्ट्या सर्वज्ञ इति व्याख्यानैश्च स्पष्टमुच्यते । सर्वत्र त्रित्वस्यैव विद्यमानत्वात्, विरोधाविरोधभावनायाः, द्वित्वावश्यकत्वाच्च अण्वन्तर्गतं जगत् जगदन्तर्गतश्चाणुरिति व्याख्यानमपि । इदं चानवस्थाया बीजं



भवति । दृश्यताम्—प्रत्यण्वपि चैवं भावना चाहमेतन्नेति । अणूनां च प्रत्येकमेवं भावः—एवं जानात्येवं करोत्यहमेतत्ततो न इति । तस्मात्कार्यत्रयं सर्वत्रोपन्यस्तं भवति । अणूनां च प्रत्येकमपि यत्परिभावनमहमेतन्नेति, तदेव तदनवस्थाया मूलं भवति । अहमेतदित्युक्त्या तु तदैक्यविरोधभावनम् । तत्पक्षे तु स्वयमखण्डः सार्वत्रिकः । तत्र, अहमेतदैक्यविरोधः, एतदहमैक्यविरोधः, प्रवचनतया तादृशकल्पना च भवति । अणूनां प्रत्येकमपि—एतदहमस्मि, इत्थमहमस्मि, एतदिदम्, तद्योगश्चायम्, तत्फलमिदम्, कारणमहमित्यादिबहुत्वविचारः, सति विरोधे बाहुल्यम्, तदविरोधप्रकाशेऽबाहुल्यमिति सर्वैश्च स्पष्टमुक्तं भवति । तस्मादेव तद्भावेन ज्ञानान्तरे ज्ञानम्, स्मृत्यंतरे स्मृतिः, शब्दान्तरे शब्दः, अर्थान्तरे चार्थ इति सर्वमनवस्थापरं बोध्यं भवति । विरोधाविरोधस्य च सार्वत्रिकत्वात्, सर्वस्य चातीतत्वात्, अतीतस्याप्यनन्तत्वात्, तदनादित्वाच्च जगदिदं तादृशं च न स्थितम् । जगतां च प्रत्येकमप्यहमेतन्नतद्विरोधाऽविरोधौ, तथा प्रत्येकमणूनामहमेतन्नतद्विरोधाऽविरोधौ च भवतः । तस्मादेवमनवस्था सार्वत्रिकी बोध्या भवति । अत एवानन्तत्वमतीतत्वं तत्परत्वं चोच्यते । यद्यपि संसारांशे कालादिकं महामन्वन्तरादिकं च नियतम्, तथापि यदिदं नियतकारणम्, तदहमेतदोरैक्यविरोधपरमेतदहमोरैक्यविरोधपरं चेति विज्ञेयम् । अन्यथा, कालेन तु क्रमः, न तत्र

नियता संख्या, तत्र च केवलमहमेतन्नेति भावजमनन्तं च तादृशमनादिपरं वस्तु वेदितव्यं भवति । इत्थंभावेन हि जीवात्मा सर्वसंसारगतः संभवति । अहमंशस्य चैतदंशस्य च योगादस्याल्पज्ञत्वमसाम्यं च बोध्यम् । अन्यथा तु ज्ञात्वा ज्ञात्वा स्वयं स्वगतिमनुगच्छति, इति तद्भावः । वस्तुतस्तु—

"न चैवाहमंशो न चैवैतदंशो
नकारांशमेतन्न चैतन्न चाहम् ।
सदा शुद्धसंक्षिप्तरूपोऽयमात्मा
विभिन्नः स चैकोऽविभिन्नस्वरूपः ॥

न जीवो न जीवात्मतत्वोऽयमात्मा
परब्रह्मसंभावनीयोऽयमात्मा ।
सदानन्दगोऽतीतरूपोऽयमात्मा
विशिष्टानुभूतः प्रसिद्धोऽयमात्मा ॥

विरुद्धोऽविरुद्धः समस्तोऽयमात्मा
सदा मङ्गळं मङ्गळस्थोऽयमात्मा ।
सदा सर्वथा भिन्न एकस्वरूपो
विभिन्नोऽविभिन्नः समश्चायमात्मा ॥

न चैक्यं न चैको ह्यनन्तैकरूपो
महोङ्कारसिद्धस्तदोङ्कारसिद्धः ।



समानन्दगः साधितः साधनीयो
विभिन्नोऽविभिन्नः समस्थोऽयमात्मा ॥
न चैवाहमेतन्नकारस्वरूपं
न नेतीति नेतीति नेतीति सिद्धम् ।
न चैवाणुरूपं न सार्वत्रिकं त-
द्विभिन्नं ह्यभिन्नं समस्थं परं तत् ॥

न वै खण्डसिद्धो न वाखण्डरूपो
जगद्व्यापको भेदनिष्ठः समोऽयम् ।
तथैवाव्ययश्चाऽविनाशिस्वरूपो
विभिन्नोऽविभिन्नः समस्थोऽयमात्मा ॥

न सत्यस्वरूपो न वाऽसत्यरूपो
सदा कालभूतो गुणावश्यकोऽयम् ।
न चायं स्थितः सत्प्रतिष्ठः पुराणो
विभिन्नोऽविभिन्नः समस्तैकरूपः ॥"

इत्यादि प्रवचनम् । तस्मादित्थंभूतश्च सनातनः परमात्मा जीवात्मा च वेदितव्यो भवति, परमात्मनः प्रतिबिंबभूतोऽयमात्मा सर्वगतः सर्वसिद्धश्चाहमेतदोरंशभूतोऽनंशभूतोऽखण्डोऽणुत्वाविशिष्ट इति तत्प्रवचनात् । एवमहमेतन्नाश्च मूलानुरोधेन जीवात्मनामणूनां च प्रत्येकमपि वेदितव्या भवन्ति । एवं विधानेन हि जीवात्मनो निर्धारणम् । एवं च तादृशमोङ्कारनिष्ठं पूर्णं शाश्वतं

सनातनं सर्वाभिगतं सर्वविद्यापरं सर्वस्वं सर्वाविर्भवनकारणं च हि ब्रह्म बोध्यम् । अत एव—

“ जीवात्मानं तथा मूलप्रकृतिं च विभाव्य हि ।
विज्ञाय देवीं प्रकृतिं प्रत्यगात्मानमेव हि ॥
सर्वं चैवामृतं मत्वा मृतं मत्वा नकारजम् ।
अहमेतत्स्वरूपस्थं परमात्मानमाश्रयेत् ॥
परमात्मा परात्मा च सूत्रात्मा वा निरामयः ।
जीवात्मा प्रत्यगात्मा वा दैवमूलसमन्वितः ॥
सर्वे चावश्यका नित्याश्चैकरूपाः सनातनाः ।
परं ब्रह्म परं ब्रह्म परं ब्रह्मेति मन्यताम् ॥
सर्वं द्विकं त्रिकं चैव क्रमजं क्रमवर्जितम् ।
शाश्वतं परमातीतमनन्तं प्रणवेक्षितम् ॥
अनादिनिधनस्थं च तत्समष्टिपरावृतम् ।
परं ब्रह्म परं ब्रह्म परं ब्रह्मेति मन्यताम् ॥
वस्तुतो नैव जीवात्मा परमात्मा कदाचन ।
परं ब्रह्म न चैवास्ति न च ब्रह्म सनातनम् ॥
न चैवाहं न चैवैतन्नायं भावो नसंभवः ।
नकारोऽयं नकारोऽयं नकारस्थो नकारजः ॥
सर्वमूलान्तरे सर्वं मूलं सर्वान्तरे तथा ।
ज्ञानान्तरे यथा ज्ञानं वाक्यं वाक्यान्तरे तथा ॥



शब्दः शब्दान्तरे चैवं विश्वे विश्वान्तरं स्वयम् ।
अणोरन्तर्गतं विश्वं विश्वस्यान्तर्गतो ह्यणुः ॥

अवस्था परमा चैषातीता प्रणवगोचरा ।
अविज्ञेया समानस्था स्वतन्त्रा सर्ववर्तिनी ॥ ”

इत्यादि प्रवचनम् । तस्मादित्थंभावेन च सर्वमनवस्थामात्रं वेदितव्यम् । तथा सर्वं चैकपरं सनातनं पूर्णं शाश्वतं जगदन्तर्भूतं च ब्रह्म वेदितव्यम् । एतत्सर्वमोमित्येकाक्षरान्तस्थं प्रणवपरं पुराणं ब्रह्मसंज्ञकं सनातनमिति च सिद्धान्तः । तदित्थं दैवमूलाद्यभियोगेन सर्वाश्च सांसारिक्यः क्रिया भवन्ति । संसारमात्रस्य च ब्रह्मपरत्वाद्ब्रह्मणः संसारपरत्वाच्च, प्रत्यणु दैवमूलाद्यभियोगश्च द्रष्टव्यः । अत एव—

“ अहमेतदोंरंशश्च प्रत्यण्वपि हि दृश्यते ।
सर्वस्मिंश्चैव संसारे विधिरेष सनातनः ॥

दैवमूलाभियोगेन परब्रह्मस्वभावतः ।
भासते कर्म सर्वं हि सर्वं नित्यं परावरम् ॥

ओमित्यन्तर्गतं सर्वमभाव्यं भाव्यमेव च ।
ओमित्येतत्परं निष्ठं ज्ञानगम्यमगोचरम् ॥

योऽयमात्मा ह्यहंरूपः सर्वस्माद्भिन्नसंभवः ।
अनात्मा चानहंरूपश्चैतत्सर्वत्र संस्थितः ॥

अनैतदिति वै भावो मकारो नानुसंवृतः ।
एतत्त्रितययोगश्च वियोगश्च यथायथम् ॥
प्रत्यण्वपि च संवेद्यः सर्वहेतुः सनातनः ।
आत्मानात्मनिषेधस्थः सर्वसंसारसंज्ञकः ॥
स्वयं ब्रह्म स्वयं ब्रह्म स्वयं ब्रह्म च सर्वथा ।
सर्वं ब्रह्म समं ब्रह्म ब्रह्मणोऽन्यन्न किंचन ॥"

इत्यादि प्रवचनम् । एवमेव—

"यत्र यत्र प्रकाशश्च वर्तते सर्वलक्षणः ।
तत्र तत्र च वेद्योऽयं सर्वात्मा हि सनातनः ॥"

इत्यादि प्रवचनम् । तथा चैवमेव—

"यावच्च विद्यते ज्ञानं यावद्बुद्धिप्रवेशनम् ।
मनःसंधारणं यावत्प्रवृत्तिर्यावती भवेत् ॥
यावत्तावद्द्वयोर्योगे शब्दमात्रपरावरे ।
त्रयं ब्रह्म त्रयं ब्रह्म त्रयं ब्रह्म तदेकथा ॥"

इत्यादि प्रवचनम् । वस्तुतस्तु—

"न शब्दो न कालो न देशो न चात्मा
गुरुर्नैव शिष्यो न तद्भावनीयः ।
सदा सर्वदा नित्यमेकं स्वरूपं
स्वयं ब्रह्मरूपं सदा वेदनीयम् ॥



न यत्रेति तत्रेति संवाच्यमेत-
न्न वै तत्क्रिया कर्म कालप्रशस्तम् ।
सदा नित्यमेकं विकल्पं निरस्तं
स्वयं ब्रह्मसंज्ञेति संवेदनीयम् ॥"

इत्यादि प्रवचनम् । तस्मात्प्रतिस्थलं प्रत्यणु चात्मवद्भानं नामात्मनो भानं भवति । सर्वश्चायमात्मवानिति तादृशं तृत्वैकत्वविशिष्टं ब्रह्मेति च विज्ञेयं भवति । युष्मदस्मदित्येतच्च भानं पृथग्रूपं नानुबोध्यम्, यच्चास्माकं तदेव युष्माकमिति बीजात् । येन येन च शब्देन भेदसूचनं भवति, तत्सर्वं शब्दमात्रमहमैक्यविरोधपरं भवति । तस्मात्तच्छब्दार्थबलेनैव तदभेद एव विज्ञेयः । अस्मदित्यात्मा, यश्चो-ष्मदिति तज्जातः, यश्च तदैक्यविरोधपरः, स चानात्मा ह्येतन्निष्ठः । इकारश्च तत्रावश्यकः, तयोर्मध्यवर्ती चैतन्निष्ठः । अतो इ-उष्मदित्यत्र सन्धिः, युष्मदिति भवति । यद्यप्योमित्येकाक्षरेऽपि तत्प्रयोगावश्यकत्वम्, तथापि सन्ध्यक्षरव्यवहारेण तयोरसन्निधिश्च सूचितः । असन्निधिपक्षेऽपि तदावश्यकविज्ञानं च सर्वनिष्ठम्, सर्वत्र स्थानेनैकेनाप्यनुसन्धेयत्वं च भवति । अस्मादेव बीजादकारोका-राभ्यां भिन्नश्चेकारोऽपि भवतीति प्रातिशाख्ये प्रसिद्धम् । एवमेव चाहमैक्यविरोधावावश्यकौ भवतः । यश्च विरोधः, स एवोकारः, यस्य चावश्यकता, तत्रैव स तिष्ठति । अत्र च विरोधावश्यक-त्वादुकारे तिष्ठतीति बीजादेव च प्रणवेऽपि, इकाराख्यानम् ।

अ. इ. सन्ध्यनुयोगेन, ए. भवति । एकारे सति उकारपरत्वेन वर्धनक्रियायां सन्धिव्यवहारेण अयादेशः । सत्ययादेशेऽपि प्रवचनाद्यकारलोपः । पुनश्चाकारोकारयोः सन्धौ, ओमित्येकस्वरूपमुपजायते । तत्रापि, इकारस्य चारितार्थ्यमिति प्रातिशाख्ये स्पष्टमुक्तं भवति । यद्यपि लोपे सति पुनः सन्धिर्न भवतीति प्रवचनम्, तथापि छन्दोमात्रे उदात्तानुदात्तस्वरितेभ्यो ह्रस्वदीर्घप्लुतेभ्यश्च भिन्ने, सामान्यं तद्भवनौचित्यम् । बीजेनानेन चैवमप्युक्तम्—

" अकारस्तु स्वयं विष्णुरिकारः शङ्करः स्मृतः ।
उकारस्तु स्वयं ब्रह्मा लोककर्ता पितामहः ॥
भिन्नो मकारस्ताभ्यां तु नेति नेतीति कीर्तितः ।
एवं प्रणवयोगार्थः प्रोक्तश्चायं सनातनः ॥ "

इत्यादि प्रवचनम् । इकारस्यात्र शिवार्थकत्वेनैव हि प्रवचनम्, शिवस्येच्छापरत्वात्, इच्छारूपायाश्च शक्तेः प्राधान्याद्वा । अत एव—

" अकारस्तु भवेदात्मा ज्ञानरूपः परावरः ।
इकारः शक्तिसंबन्धश्चोकारः स्यात्क्रियापरः ॥
तथा ब्रह्मा क्रियानिष्ठो मकारार्थश्च शङ्करः ।
ओमित्येकाक्षरं विद्धि तादृशं सर्वसंज्ञकम् ॥
अभेदं पश्य सर्वत्र चाविरुद्धं सनातनम् ।
एवं हि सर्वथा वेद्यः प्रणवार्थो मुमुक्षुभिः ॥ "



इत्यादि प्रवचनम् । तस्मादिकारश्चोकारान्तर्गत इति विज्ञेयम् । यद्यपि पूर्वं नाख्यातमिदम्, तथापि सर्वं पृथक्पृथक्प्रज्ञापरं बोध्यम् । तत एव यानि यानि च वस्तूनि जानन्ति मानवाः, तेषां तेषां च वस्तूनां तादृशेनैव भावेन तदा तदा विज्ञानं भवतीति विज्ञेयम् । प्रथमं तु त्रितयं ब्रह्म तृत्वैकत्वनिष्ठं ज्ञातव्यं भवति । तच्च ज्ञात्वा तदावश्यकप्रबोधात्तद्बोधौचित्यम् । तस्मात्तदभिधानेनैवमोङ्कारपरमिकारपरमपि च वेदितव्यम् । एवं सर्वेषां वर्णानामोङ्कारेण सन्ध्युपन्यासः, ओङ्काराद्भिन्नाश्च न वर्णा न शब्दा इति च व्याकरणसिद्धान्तात् । कलापव्याकरणेन तु सर्वशब्दानां सर्वार्थानां च सर्ववर्णानामोङ्कारेण व्याख्यानं भवति । एवमेव शिल्पादिभिःशास्त्रैः सर्वकर्मादीनां सर्वपदार्थानां यथायथमुपन्यस्तानां चोङ्कारेणैव बोधः, ओमित्यस्य परावरत्वात् सर्वं सर्वपरावरमिति व्याख्यानाच्च । सर्वं चेदं संसारमात्रम्, एतदपरं च संसारः, तदपरं चातीतं भवति । अत्रेदं बोध्यम्—एतन्महत्त्ववर्णने तु न केषां चापि तत्सामर्थ्यमुपन्यस्तम्, ये हि यथायथमोङ्कारतत्वं ज्ञापयन्तीति । इदं च केवलं प्राधान्यबोधायोक्तम् । अन्यथा तु सर्वाश्रयमनन्तमप्याख्येयं बोध्यम् । तदेवं क्रमेण सर्वथा भेदो मान्यो भवति ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे जीवात्मधर्मनिरूपणं नाम एकोनविंशस्तरङ्गः ।**

ॐ

अथ

# विंशस्तरङ्गः ॥

अथात्र चात्यन्तभेदसूचकं शब्दद्वयमस्मद्युष्मदिति रूपं भवति, अस्मच्छब्दश्चायमात्मा ह्यसन्धिस्थो निरामयः, न सन्धिर्न प्रकृतिर्नानुसन्धेय इति व्याख्यानात् । एवं युष्मच्छब्दे इकारादिभिः सन्धिप्रयोगः, इ· उ. इति भवति । योगाद्धि युष्मदिति रूपं प्रसिद्धम्, अस्मदैक्यविरोधात् । युष्मदित्येतत्संभावनया हि नानात्वम्, तद्विरोधस्य चावश्यकपरत्वात् । यत्र चावश्यकता भवति, तत्रैव स तिष्ठतीति व्याख्यानादुष्मच्छब्देन, इकारस्य सन्धिर्भवति । एवं भेदश्चैक्यपरः सर्वथा वेद्यो भवति । दृश्यताम्—अस्मच्छब्दे यद्धि स्मत् इति, तस्य चोकारनिष्ठत्वे सति उष्मदितिप्रतीतिः, अत्र च केवलैक्यविरोधः सूचितः, अकारस्य स्मदित्यस्य च ऐक्यविरोधात्तत्प्रकाशः इति । नानात्वमपि चैवं बोद्धव्यम्—यो ह्यैक्यविरोधः, स च वास्तवपक्षे त्वैक्यमेव भवति, यस्य यो विरोधः, सोऽपि तदवयवत्वेन तत्स्वभावत्वेन च तदन्तर्गत इति बीजात्, यथा—क्रुद्धः पुरुष इति । स्वभावात्स्वावस्थाया विरुद्धभावमालोक्य क्रोधावस्थां प्राप्नोति । न च स



क्रोधस्तत्पुरुषाद्भिन्नो भवितुमर्हतीति व्याख्यानेनास्मद्भिन्नं च युष्मन्नानुसंधेयम्, किं तु चैकव्यवहारपरं च तन्मान्यं भवति । अत एव "युष्मदित्यस्मदपेक्षकम्, अस्मदिति युष्मदपेक्षकम्, ते च तृतीयापेक्षके" इत्यादिवाक्यवाच्यवाचकभावे च शब्दव्याख्याने स्पष्टमुक्तं भवति । तस्मात्तयोरभेदः, तथा चान्येषामपीति बोध्यम् । इदं चात्र प्रयोजनं भवति—केवलं भेदवाचकानां शब्दानां सर्वथैक्यविरोधपरत्वं विज्ञेयम्, तेषामेकत्वमेव सर्वथा मान्यमिति । तस्मादिदमेवात्रोपदिश्यते—देवमूलाद्यभियोगानां तद्वियोगानां च तदैक्यमेव मान्यमिति । यद्यपि पृथक्पृथग्व्याख्यानादभेदः सूचितः, तथापि स च तस्य सत्ताप्राधान्यानुरोधेन परस्परसापेक्षत्वेन च बहुत्वादेकत्वं भवति, एकनिष्ठं बहुत्वमिति सर्वोपन्यासात्, अनेनैकस्य सापेक्षत्वेनैक्यमिति बीजाच्च ।

अत एव हि सर्वत्र रागद्वेषौ प्रवर्तेते । आत्मनश्च सर्वत्र विद्यमानत्वात्, सर्वेण सर्वस्य सर्वत्र रागः । यो ह्यात्मा, स तु स्वैक्यं सर्वत्र जानाति । आत्मनः सूत्रत्वव्यवहारात्, तदैक्यविरोधात्, नानात्वप्रवचनाच्च द्वेषोऽपीति विज्ञेयम् । इदमप्यावश्यकपरं भवति । दृश्यताम्—यस्य च येन सहावश्यकत्वं नास्ति, न तेन तस्य कदापि द्वेषो भवतीति । यद्यपि रागसंभवोऽपि नास्ति, द्वयोरेकत्रोपस्थितत्वात् परस्परसंबन्धित्वाच्च, तथाप्यात्ममात्रावधारणतया तु सर्वत्र रागस्य विद्यमानत्वम् । यद्यप्यावश्यकत्वमपि नास्तीति दृश्यते,

तथापि तद्दर्शनेऽपीच्छा संभवत्येव । अत एव हि दर्शनाभिधानम् । तत एव सर्ववस्तूनां जिज्ञासा भवत्येव । इदमेव रागफलं भवति । दृश्यताम्—पथि च गच्छतामपि, पदार्थानां दर्शने च भवतीच्छा, तथा तद्दर्शनं च, एवं श्रवणादिकमपि तत्प्रकारेण बोध्यमिति । जिज्ञासामात्रस्यैव कारणं राग इति सर्वत्रोपन्यस्तम् । आत्मा तु सर्वत्र विद्यते, अहं चात्मा भवति । एवं भावेन सर्वपदार्थेषु प्रीतिर्भवति । तत्प्रीतिरेव रागस्वरूपा भवति । एवं प्राप्ते सत्यावश्यके, तदावश्यकानुरोधेनापि रागद्वेषसंभावना भवति । येन चावश्यकमूर्तिर्भवति, तद्धि मित्रम्, येन तद्विनाशः, स एव शत्रुः, येन साम्यं स च समः, इत्यादि लोकव्यवहारो भवति । सर्वं चैतदात्मैक्यविरोधपरं भवति । एवमनावश्यकदोषोऽपि संभवति—अहमित्थमयं चेत्थं नास्ति, अहं च महान्, अयं च लघुः, नानेन सह कार्यमिदमहं करिष्यामि वा, किमर्थमयमेवमुवाचेत्याद्यनावश्यको दोषोऽपि सूचितो भवतीति । सोऽपि वास्तवपक्षे चावश्यकपर एवेति बोध्यम् । अत एव "रागद्वेषौ द्विधा मतौ" इत्युक्तम् । तत्र चैकं कारणरूपं रागद्वेषम्, द्वितीयं तु कार्यरूपम्, तच्च प्रसिद्धाप्रसिद्धपरं भवति । कार्यरूपं रागद्वेषं लोकप्रसिद्धावश्यकपरं भवति । कारणरूपं च रागद्वेषं त्वप्रसिद्धावश्यकपरं भवति । परं त्वावश्यके च सर्वस्मिन्नभेद इति व्याख्यानेन बोध्यम् । इदं चात्र सूचितं भवति—केवल-



महमैक्यविरोधाच्च द्वेषः, अहमैक्यानुरोधेन हि रागः, द्वयं चैतदावश्यकपरम्, अवयवावयविभावेन त्वेकान्तर्गतोऽभेदश्चैकस्थो बोध्य इति । सर्वत्र सर्वांशे सर्वविषये च प्रवचनमात्रे ह्यभेद एव द्रष्टव्य इति व्याख्यानफलम् । अथवा तु सर्वं चाख्यानं निरर्थमवाच्यत्वादविज्ञेयत्वादप्रतर्क्यत्वाच्च । यद्यप्यहमंशो ह्येतदंशश्च जीवात्मा भवतीति प्रवचनम्, तथापि तत्प्रवचनेनाणुत्वमखण्डत्वम्, व्याख्यानेन विरोधश्च नोपयुक्तो भवति । तत्र च सर्वातीतत्वव्याख्यानात्, सर्वातीतत्वानुरोधेन परस्परसापेक्षाभिप्रायात्, सर्वं सर्वानुरोधीति बीजाच्च तदेकत्वमेवोक्तं भवति । यद्यप्यात्मैक्यविरोधादेतदिति प्रसिद्धत्वेनाणुत्वमखण्डत्वं चोक्तम्, तर्हि विरोधभावनायां भेदप्रकाशो ह्यावश्यको भवति ; तथाप्यवयवावयविभावसंबन्धेन तदेकत्वं समाधातुं शक्यं भवति । एकत्वप्रतिपत्तये तु सर्वापेक्षत्वं यथायथं परिभाव्यं भवति ।

तदेवं प्रकारेण देवप्रकृतिमूलप्रकृतिजीवात्मपरमात्मसूत्रात्मनामेवं प्रत्यगात्मादीनामनेकेषामेकत्वेन, परमात्मा परं ब्रह्मेत्याद्युक्तिः । सर्वमेतन्नाम परमात्मानं मत्वा स्वात्मानमपि तादृशमवधार्य, अहमेवास्मि, सर्वं परमात्मा चाहमस्ति, ब्रह्म चाहमस्ति ये केचन शब्दाश्च संसारे संभाव्यमानाः, ते सर्वेऽपि स्वस्मिन्नारोपणीया भवन्ति । अत्रेदं सूचितं भवति—न भवति केवलं शब्दमात्रम्, किंतु मुख्यतात्पर्येण, तत्साहितेन सत्तानिष्ठेनाभिप्रायेण च

तत्कार्यानुरोधी च परो हि स्वात्मा वेदितव्य इति । इदमित्थमेवास्तीति ज्ञात्वा, तत्करणौचित्यमित्याद्युपदेशफलम्, यथा ज्ञानं तथा कर्म इतिव्याख्यानात् । यद्यपि ज्ञानाद्विरुद्धकर्मसंभावनापि लोके दृश्यते, तथापि तच्च ज्ञानं कर्मपरमेवेति विज्ञेयम् । यच्च केवलं प्रवचनपरमेव ज्ञानम्, तस्याभास एवायातीति बोध्यम् । दृश्यताम्——संसारेऽस्मिंश्च सह क्रमेण कार्यं भवति, कालस्यक्रमव्याख्यानपरत्वात्संसारस्य कालपरत्वाच्चेति । तदेवं बीजेन ज्ञानौचित्यमाख्यातम् । अत एव सर्वं चैवं यथायथं ज्ञात्वा, प्राधान्यं च बुध्वा, संकल्पितं च कार्यं क्रियतामित्युपदेशः । एतत्करणरूपा च या क्रिया, तस्याश्चानन्तानन्तसंसारे व्यवहारो भवति । क्रिया च न कदापि निवर्तत इति सर्वाभिमतं भवति । शास्त्रैश्च सर्वैरेवं सूचितं भवति——यो ह्ययमात्मा सत्वकालिकः कालदेशादिविभिन्नश्च, तत्स्वभावपरं चैतत्कालदेशादिकं भवति, यादृशश्च भवनमात्रप्रबन्धः स्वयम्, तादृशं तत्कार्यमिति व्याख्यानादेतस्यापि तादृशमनन्तत्वमकालिकत्वं कालातीतत्वं च प्रोच्यत इति । बीजादस्मादेव सृष्टेर्देशकालातीतत्वमुच्यते । तत एव सृष्टेः देशकालपरत्वात्तादृशं वेदितव्यम् । तस्मादनन्तानन्तरूपाः क्रिया भवन्ति ।

यो ह्ययं संसारः, तस्य महाविष्णुरधिष्ठाता सर्वसंसारनिर्वर्तकश्च भवति । अस्मिन्ननेकानि ब्रह्माण्डानि भवन्ति । प्रतिब्रह्माण्डमेतत्कार्यं भवति । दृश्यताम्——यद्यणूनां च प्रत्येकमेतत्त्रितयत्वमुक्तं



भवति, तर्हि प्रतिब्रह्माण्डं त्वणोरनन्तत्वव्याख्यानेन त्रितयानन्तत्वं मान्यमेव भवतीति । तथा च तादृशमेकत्वमपि बोध्यम् । यथा चात्र लघुत्वमहत्वव्यापारः क्रमानुरोधेन भासते, तथैव सर्वब्रह्माण्डे जगदंशे विश्वाद्यंशेऽपि च भवति । एवं संसारांशेऽपि विज्ञेयम् । यद्यप्यान्तर्यदृष्ट्या लघुत्वं महत्वं च न किंचिदिति स्पष्टमुक्तम्, तथापि क्रमाभिधानेन महत्वलघुत्वयोः सर्वत्रोपन्यासः । ब्रह्माण्डेऽपि चैवं विधिः—अस्मिन्ब्रह्माण्डे सन्नयं जीवः, इमानीमानि वस्तूनि जानाति, ज्ञात्वा चेतःपरं च ब्रह्माण्डं गच्छति, एवं जगदपि विश्वमपीति । एवं प्रगमनव्यवहारेण संसारान्तरमपि गच्छतीति गमनस्यानन्तानन्तत्वव्यवहारः । दृश्यताम्——प्रत्यण्वपि चैवमभिधानं भवति, अस्मादणोर्निर्गत्य चामुमणुं प्राप्नोति, अस्य चाणोरेषावस्था, तस्यत्विदानीं पुनरेषावस्था इति । एवं व्यवहारश्च प्रतिक्षणं प्रतिमुहूर्तं च भवत्येव । महामन्वन्तरादारभ्य त्रुटिपर्यन्तमेवं विधिः——यो हीदानीमेवं विधः, स च कालान्तरे नैतादृश इति । एवं क्रमेण हि वृद्धिसंक्षयव्यवहारः । बीजेनानेनैवाधिक्याल्पत्वमहत्वलघुत्वज्ञानाऽज्ञानादिकं सर्वमभिवर्तते । एवमपि च नियमः——एतदणुं परित्यज्यास्मिन्नणावभिनिवेशः, ततश्चास्मिन्, ततः परस्मिन्निति । एवं करणेन चाणूनां प्रत्येकमपि महाविष्णुत्वं सिद्धं भवति । एवं ब्रह्मत्वं शिवत्वमपरमहाविष्णुत्वं च भवति । एवं प्रतिब्रह्माण्डं संस्थितानां जीवानामणूनां चानन्तव्यवहारश्च भवति । यद्यप्येव-

मपि वक्तुं शक्यम्, जीवश्चात्मा, तदात्मसन्निधानादेवानन्तव्यवहारेण च सर्वत्रोपगच्छति, कथं तस्याणुत्वमिति; तथापि तदेकत्वप्रवचनेनात्मैक्यविरुद्धाणुत्वव्याख्यानेन चाणूनां प्रत्येकमपि तादृशव्यवहारश्च बोध्यो भवति । आत्मैक्यविरोधेन ह्येतदिति सुस्पष्टतया चैतदेवाणुरिति व्याख्यानाच्च, एकैकस्याप्यहमो ह्येतदश्च परस्परं संबन्धः । अयमेव हि व्यष्टिभावः । तादृशं च सर्वमपरिमितं भवति । स च साणुर्जीवः, प्रगमनरूपक्रियया ह्यूर्ध्वं च, तदूर्ध्वं च गच्छति, क्रमाभिधानेनैवाणुजीवयोरभिवर्धनम् । यथा ––अस्माच्चाणोरयं जीवस्तत्र गच्छति, ततस्तस्मिन्नणौ गच्छति, एवं तदणावपि तत्पूर्वाणुस्थजीवप्रवेशः, पुनस्तस्याप्यन्यावस्था च संभवति, सर्वस्य सर्वथा सर्वदा भवनव्यापारश्च दृश्यते, जायते बालकः, तदुत्पत्तिकाले तद्व्यक्तिस्तु सर्वतो लघुर्भवति, परं त्ववस्थान्तरं प्राप्ते सति वर्धते, तस्य यथावयः ज्ञानादिकं कार्यं सर्वं विवर्धत इति ।एवं व्यवहारश्चापि सर्वत्र बोध्यः। यद्यप्यणूनां विनाशोऽपि संभवति, तथापि सर्वस्यानाश्यत्वव्याख्यानतया च नश्यमानं न किंचिदिति बीजात्तस्याप्यविनाश्यत्वेन प्रवचनम्, शक्तिसंपादनार्थाय तु मन्दता कृष्टता च क्रमेणारंभावसानरूपा,सैव विनाशोत्पत्तिरिति च वेदैः स्पष्टमुक्तं भवति । यद्यप्यणवो मूलप्रकृतिका भवन्ति, न तत्र प्रवर्धनव्यवहारसंभवः; तथापि सर्वस्याश्चानन्तातीततया व्याख्यानमसंगतं स्यात्, अहमः सर्वत्रोपस्थितत्वात्, सार्वत्रिकत्वात्सर्वातीतत्वाच्च । तदैक्यविरोधयोश्च तादृशत्वं मान्यम्, तदैक्य-



विरोधवदेव चैतत्, तदेतदेव मूलप्रकृतिश्च भवति । तस्मादहमिव चैतदो व्यवहारः । यत्र यत्र चाहम्, तत्र तत्र विरोधः, तत्रैव चैतदित्यन्योन्याश्रयः । एवं बीजेन भवनमात्रस्य सान्तत्वम्, अस्तित्वे भवनमवश्यमिति च व्याख्यातम् । तस्मात्प्रत्यहमणुः, प्रत्यण्वहमिति च भावेन सर्वे चाणवः सार्वत्रिकाश्चैकस्थाः सर्वसमानाधिकरणाः समानाश्च भवन्ति, अहमित्येकानुरोधाद्व्यष्टिसमष्टिसंभावनीयत्वाद्वा । अत्रेदं सूचितं भवति––यच्च किंचिच्च दृश्यते, तत्सर्वमनन्तमतीतं च विद्धीति । पुनरेवमेकत्वं ब्रह्माभिधानपरं वेदितव्यमिति व्याख्यानफलम् । अत एव सर्वे चाणवः समानजाः समानाः साम्यवर्तिनः सौम्याश्चैकप्रवाचकाः इत्यादि प्रवचनम् । एवं वेदवचनैश्च सर्वेषामणूनां तत्रस्थजीवानां च तादृशत्वेन व्यवहारः । एवं भावेनैवाहमंशो ह्येतदंशश्च मिळित्वा जीवात्मसंज्ञां लभते, अहमैक्यविरोधावश्यकत्वात्, विरोधस्यैव चाणोः प्रकाशकत्वात्, अहमः सार्वत्रिकत्वाच्च । इदं च व्याख्यानमतीतसृष्टिपरं व्यवस्थितम् । अहमंशो ह्येतदंशश्चाहमैक्यविरोधावृतो भवति । सृष्टिमात्रं हि किल वेदितव्यम् । प्रत्यण्वप्येवं भावः––अन्तरा चाहमंशमेतदंशो न तिष्ठति, तयोरैक्यानुरोधेन परस्परसापेक्षत्वं नाशो मरणमपि च भवति, यदा चाहमंशो हि क्रियानुरोधेनान्यमेतदंशं गच्छति, तदा तु तदेतदंशस्य विनाशः, तथा नानाभावश्च भवति, स च भावनिष्ठः, स च स्वस्वत्वानुरोधेनाकाशादौ स्वीयकार्यपरिपाकं कृत्वा शक्तिमुत्पाद्य

च, पुनश्चाहमंशेन कार्यं प्रसारयति, एवमेव जीवोऽपि स्वकार्य-परिपाकार्थं तादृशाणुं च संप्राप्य, स्थित्वा च कामलोके, पुनः कार्यं प्रसारयतीति । एवमहमेतदंशयोः संबन्धः । यत्र च यावदहमंशो न विद्यते, तावत्तस्य तत्र न किंचिदपि प्रवचनम्, नाणुत्वं न परमाणुत्वं न यत्तदिति । एवमेतदंशं विना नाहमंशोऽवतिष्ठति । शब्दकालादिव्यवहारश्चाहमेतदंशपरः । अहमेतदंशस्य सार्वत्रिकत्वेन तयोरतीतत्वेन च, शब्दकालादीनामप्यतीतत्वं सार्वत्रिकत्वं चोक्तं भवति । तस्मात्सर्वाणूनां तथा सर्वजीवानां तादृशमनन्तत्वं क्रियापरं बोध्यम् ।

जीवात्मसंज्ञा त्वहमेतत्संयोगेन हि भवति । एतदंशश्च जीवो ह्यणुर्भवति, अहमंशस्तावदात्मा, तयोः संयोग एव व्यष्ट्युपाधिः । यद्यपि वियोगेऽपि तस्य तस्य जीवत्वेन प्रवचनम्, तथापि चैतस्याणुत्वेन प्रवचनमपि, तच्चापि तादृशं व्यवहारपरं मान्यम् । यश्चैतदंशो ह्यणुः, तस्मिन्नपि सूत्रात्मदृष्ट्या तत्सूत्रसंबन्धेन च सौत्रश्चाहमंशोऽस्ति । एवमहमंशोऽपि सूत्रात्मनियमानुसारेण सौत्रैतदंशश्च तिष्ठति । तदेवं भावेन संयोगे वियोगेऽपि च प्रवचनम् । दृश्यताम्——संयोगवियोगौ च तादृशौ मान्यौ, सूत्रसंबन्धेन तु सर्वमिदं सौत्रम्, तच्च सर्वथा संयुक्तमिति समष्टिपक्षः, कार्यप्राधान्येन सूत्रैक्यविरोधेन च संयोगवियोगानुभावना च भवतीति । एवं त्रुटीनामणूनां च प्रत्येकमैक्यविरोध-



भावनया संयोगवियोगौ च भवतः । यथा——ब्राह्मणजातिरियमिति जातिपक्षे ब्राह्मणत्वस्य सूत्ररूपत्वेन सर्वेषामेकत्वं सर्वथा संयुक्तत्वम्, एवं ब्राह्मणजातावपि क्रियाकार्यकालानुरोधेन तदैक्यविरोध इति, जातिस्था व्यक्तिर्भवति । पुनरेवं सर्वत्राप्यहं त्वमिति बीजेन व्यक्त्युपन्यासः । पुनरेवं त्वम्यहम्यपि पुत्राद्युपन्यासेन तदैक्यविरोधः । एवमेव च सर्वस्मिन्नंशेऽपि द्रष्टव्यः । एकस्मिन्नपि शरीरे ह्येकस्य वर्तमानतया चैक्यविरोधस्य प्रदर्शनम् । यदा च निद्रायां स्थूलदेहाल्लिङ्गदेहेऽस्य चात्मनः कार्यम्, तदा स्थूलैक्यविरोध इति वियोगो भवति । एवं लिङ्गैक्यविरोधाच्च सूक्ष्मदेहाभिनिवेशः । एवं सूक्ष्मैक्यविरोधात्कारणदेहाभिनिवेशोऽपि । एवं कारणैक्यविरोधात्तदूर्ध्वमभिगच्छति । परं त्वात्मशरीरसंबन्धस्य सूत्ररूपत्वेन न वियोगः । कारणं सूक्ष्मं च प्राप्यापि जागरणकाले स्थूलसंनिधानेन तं च प्राप्य स्थूलकार्यं करोत्येव । एवं दर्शनेन सर्वथा सर्वदा सर्वत्र चैक्यं विरोधश्च भवति । एवं नियमेन हि संयोगवियोगौ तदैक्यविरोधपरौ भवतः । आवश्यकौ च तदैक्यविरोधौ । एवं नियमेन ह्येवमुक्तम्——सर्वे चाणवः सर्वत्र गच्छन्तीति क्रमाभिधानेन सर्वाणि ब्रह्माण्डानि सर्वे च संसाराः परस्परसंबद्धा भवन्ति । तत्र क्रमाधिष्ठानेन लघुत्वं महत्वं च भवति । इदमेव हि सामानाधिकरण्यवैयधिकरण्य बीजं भवति । यच्च हि येन नाव्यवहितम्, तच्च तत्समानाधिकरणम् । तेन तेन सह नाम साम्यम्, यच्च हि येन येन व्यवहितं तच्च तद्व्यधिकरणमिति

च विज्ञेयम् । सति सामानाधिकरण्ये वैयधिकरण्यमन्यायम्, व्यवहिताव्यवहितं नाम तत्क्रमस्वरूपम्, अव्यवहितत्वेन हि सर्वाश्च क्रिया भवन्तीति विज्ञेयम् । तस्मात्सामानाधिकरण्यदृष्ट्या वैयधिकरण्यमयुक्तम्, तथा नाम क्रमश्च नोल्लङ्घनीयो भवति । अत्रेदं सूचितं भवति—क्रमेणैव हि सर्वं भवति, विना च क्रमं न किमपि कदापि चेष्टते, इति । ततश्च सर्वेषां चाणूनां संसाराणां जीवानामनन्तसूत्रतया चैकसत्ताप्राधान्येनान्तर्यं भवति । आन्तर्यदृष्ट्या तु सर्वेषां सामानाधिकरण्यं वैयधिकरण्यं न किंचिदिति च विज्ञेयम् । तत्सूत्रैक्यविरोधाच्च हि क्रमो भासते । तस्मिंश्च क्रमे क्रमैक्यविरोधादनन्तः क्रमः, तत्र च व्यवहितत्वमव्यवहितत्वं चोपन्यस्तम् । ऐक्यं विरोधश्चैतत्कारणं भवति । तदेवं भावेनैव सामानाधिकरण्यं वैयधिकरण्यं प्रशस्तम् । एवं भावेन व्यवहिताव्यवहितनियमेन च सर्वसंसारानुवर्तनं सर्वत्राणुत्वमहत्वं च प्रदर्शितं भवति । संसारेऽस्मिन्ननन्तेऽतीते त्रितयात्मके चेदमवश्यं बोध्यं भवति—अस्मादनन्तरमिदम्, अनेनास्य सामानाधिकरण्यम्, इदं च वैयधिकरण्यम्, अन्यथा त्वान्तर्यदृष्ट्या सूत्रैक्यबलेन च सर्वेषां सामानाधिकरण्यमेवेति । तत एव सर्वत्र साम्यं नाम संभवतीति च व्याख्यानफलम् । एवं बीजेनैवाणोरन्तर्गतं जगत्, जगदन्तर्गतश्चाणुरिति स्पष्टमुक्तं भवति । अणोरैक्यविरोधादणोरप्यणुस्तदैक्यविरोधात्तत्राप्यनन्तत्वफलम्, तदेव जगत्, जगदैक्यविरोधादणुरिति सुस्पष्टं बोध्यं



भवति । तत्रापि प्रथमो द्वितीयस्तृतीय इति क्रमः । तत्रापि तादृशं च व्यवहितत्वमव्यवहितत्वम् । तदेवं भावेन हि सर्वसामानाधिकरण्यम् । यद्यपि तत्र व्यतिक्रमसंभवोऽपि भवति, तथापि व्यतिक्रम एव वैयधिकरण्यमिति बीजात्तस्यापि न्यायत्वमुक्तं भवति । तदेवं विधानेन संसारस्वरूपमेकान्तर्गतमेकानुभवमोमित्येकस्वरूपं समानं चेति बोध्यम् । बीजेनानेनैव सर्वेषां सर्वावश्यकता, सर्वत्र सर्वं प्रयोजनं च सिद्धं भवति । यथा—परस्परसापेक्षत्वनिरपेक्षत्वं याचना प्रार्थना संभावना विरोधो मैत्रमेकस्थत्वमेकस्य चैकत्रेच्छा मनोरथो दया दानं धर्मो जयाऽजयौ यज्ञश्च प्रशस्तं भवतीति । अन्यथा त्वयमात्मा स्वच्छन्नः सर्वभिन्नः सर्वशुद्धश्च समीयतामिति विज्ञेयम् । तद्यथा—

“न रागो न च द्वेषभावः समस्थो
न चानन्द आनन्दरूपं स्वरूपम् ।
न नित्यं न चानित्यशुद्धं च बुद्धं
विभिन्नं विभिन्नं विभिन्नस्वरूपम् ॥

न चैवानभिन्नं न भिन्नप्रभिन्नं
न चाभिन्नमेकं न वा लिङ्गरूपम् ।
न चैवं समानं न वै तद्विरामो
विभिन्नं विभिन्नं विभिन्नस्वरूपम् ॥

न चारंभमध्यं न वै चावसानं
न चाद्यन्तमेतत्समस्तं प्रधानम् ।
जगत्तुच्छमेतज्जगत्तुच्छमेत-
द्विभिन्नं विभिन्नं विभिन्नस्वरूपम् ॥
न रागी न च द्वेषभागोऽयमात्मा
न वा तत्क्रिया कर्मयोगोऽयमात्मा ।
न चैवैतदंशो न चैवाहमंशो
विभिन्नोऽविभिन्नो विभिन्नस्वरूपः ॥ ''

इत्यादि प्रवचनम् । एवमेव—

'' न भवति सुखदुःखं लक्षणं लक्ष्ययुक्तं
वचनमिह हि रागद्वेषभिन्नं विभिन्नम् ।
परमममलरूपं नित्यमोङ्कारसिद्धं
न हि गुणगणभोग्यं योग्यमोङ्कारगीतम् ॥
तपसि परमतत्वं सर्वनिष्ठं समं त-
द्भवनमिह न सत्यं सत्यसत्यं समस्थम् ।
प्रगममिह न योग्यं कर्म सिद्धान्तमूलं
यजनमिह न याज्यं नेति नेतीति सिद्धम् ॥ ''

इत्यादि च प्रवचनम् । तस्मात्तदित्थंभूतमेकनिष्ठमैक्यविरोधावृतं संसारमात्मनन्तमतीतं चेति विज्ञेयम् । तदेवं ज्ञात्वा सर्वस्याश्चापि क्रियायाः प्रणवात्मकत्वेन कर्तव्यतेत्युपदेशः ।



एवं भावेन हि ब्रह्मज्ञानमात्मज्ञानं तत्वज्ञानं च संभवति । अयमेव मोक्षः, मोक्षस्वरूपमिदम्, तदेवं ज्ञात्वा हि तदुचिताचारः, इति तत्वज्ञानफलं भवति । अत एव '' तत्वज्ञानान्मुक्तिः '' इत्युच्यते । तथा '' तत्वज्ञानप्राप्तौ सत्यां सुखदुःखौ शोकहर्षौ च न किंचन '' इति च । सर्वथैवाभेदप्रकाशं सर्वानन्दमयं सच्चिदानन्दं च स्वस्वरूपं विज्ञाय कार्यं भवतीति तद्व्याख्यान-फलम् । तद्भावना चोमित्येतज्ज्ञानपरैवेति निश्चयः । अतश्चोङ्कारं ज्ञात्वा प्रसाधनमेतत्कर्तव्यमित्युपदेशः । एतत्सर्वं च षट्प्रकारान्तर्गतं तादृशं ज्ञानेच्छाक्रियानुवर्तनभूतं वेदितव्यम् । अत एव '' षड्भि-रङ्गैर्ब्रह्म विद्धीत्युपदेशः । अत्रैव हि कर्तृकरणकार्यप्रयोजन-व्यवहारः । एतेषां चाभेदसूचकत्वेन सर्वमिदं व्याख्यातं भवति । यानि यानि च शास्त्राणि संभवन्ति, तानि सर्वाण्यपि चैकत्व-सूचकानीति विज्ञेयम् । तस्माच्च तज्ज्ञात्वा कार्यं कर्म कर्तुं समुचितं भवति, येन भेदप्रकाशो न भवतीति फलितार्थः । अत एव क्रियारंभात्पूर्वं क्रियाव्यवहारमात्रस्य चैकत्वपृथक्त्वनिर्देशेन हि, महाविष्णोरवधारणं वेदादिकमुपन्यस्तं भवति । तच्च प्रथमं यथायथमवधार्य हि संसारारंभो भवतीति व्याख्यानैश्च सर्वैः स्पष्टमुक्तं भवति । अत एव सर्वस्यापि विषयस्य, सर्व-कर्मानुरोधेन सर्वदेशकालपरिभावनया च, सर्वभाषायां प्रथमं चावधारणमभिवर्तते । अत एव विचार्य कार्यं कर्तव्यमित्युप-

देशः । तस्माज्ज्ञानस्य प्राथम्यनिर्देशादात्मपरत्वादात्मनः सार्वत्रिकत्वात्सर्वस्य पूर्वत्वाच्च, सर्वविषयककर्मारंभात्पूर्वं तच्च शास्त्रमध्येयं भवति । तथा तद्विषयकं च शास्त्रं ज्ञात्वा तेन यथायथं तत्र निश्चयं कृत्वा तदारंभौचित्यमिति विज्ञेयम् । ज्ञानमेतच्चापि संसारव्यवहारेण संसारविषयानुरोधिना च क्रमेण ह्यनन्तं व्यवहिताव्यवहितं परं च समानाधिकरणं व्यधिकरणम्, तद्भिन्नं च, सर्वमोङ्कारसंस्थितं भवति ; सर्वत्र त्वनवस्थाया एव विद्यमानत्वात् । एवं ज्ञानसृष्टिरपि भवति । अत एव—

" यथा ज्ञानसृष्टिस्तथा कर्मसृष्टि-
स्तथैवेह चेच्छा सुनिष्ठा प्रशस्ता ।
सदा सर्वथा चैकभावः स चैवं
निरस्तं समस्तं प्रशस्तप्रभावम् ॥ "

इत्यादि प्रवचनम् । तदित्थंभावेन ह्येतज्ज्ञानव्यवहारमात्रमोङ्कारान्तर्गतमिति विज्ञेयम् । इदं च ज्ञानसंसरणम्—अन्तरेण हि ज्ञानं कर्मानुपपत्तिरिति बीजाद्वेदादिक्रमपीत्यकर्मकरणौचित्यम्, एवं भावेनैव ह्योङ्काराख्याख्यायामपि क्रियारंभे, सर्वविषयकं ज्ञानं परावरं च समुपन्यस्तम्, एवं बीजेनानेनैव हि सर्वेष्वपि च प्रबन्धेषु, प्रथमं ज्ञानम्, ततस्तद्विषयोपपत्तिः, साधनव्यवहारादिवर्णनं च भवति, सर्वैश्च सर्वेषां सामानाधिकरण्यं वैयधिकरण्यम्, तयोर्विहितत्वमविहितत्वं च ज्ञापयित्वा विषयो बोद्धव्यो भवतीत्या-



चार्यसिद्धान्तः । तदेवं प्रकारेण सर्वं ज्ञानं सर्वं च कर्म सर्वा चेच्छा सर्वमिदमोङ्काराक्षरान्वितमकारोकारमकारस्थमिकाराभिनियतं चेति बोध्यम् । ततः सर्वान्तरे सर्वमोङ्कारान्तरे सर्वमतीतान्तरे चातीतमनन्तान्तरे ह्यनन्तमनाद्यन्तरे चानाद्यन्तमाद्यन्तरे चाद्यन्तमिति च सर्वं क्रमपरं सर्वसमानाधिकरणं सार्वत्रिकं सर्वातीतानुभवजं सर्वप्रतिष्ठं स्वभावाविर्भूतमोमित्येकाक्षरान्तर्गतं च सर्वं प्रबोध्यमिति सिद्धान्तः । अत एव—

" त्रितयान्तर्गतं सर्वमोमित्येकाक्षरावृतम् ।
अहमेतन्नानुरोधि परं ब्रह्म सनातनम् ॥
परं ब्रह्म परं ब्रह्म परमात्मा परोदयः ।
ओमित्येकाक्षराध्यस्तं सर्वं सर्वाभिगोचरम् ॥ "

इत्यादि प्रवचनम् । तदेवं भावेनोङ्कारस्यैव महत्वमोङ्कारोच्चारणेन सर्वप्रवचनं च सिद्धं भवति । सर्वमूलं भवत्योङ्कारः, अनेनैव सर्वारंभावसानपरं च संसरणाभिधानमिति विज्ञेयम् । तदेवमवस्थानवस्थासंस्थितश्चोङ्कारः सर्वसिद्धान्तपरः, तेनैव सर्वं वेद्यमिति प्रकारज्ञानव्यवसायप्रकरणं भवति ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे जीवात्मयोगस्वरूपनिरूपणं नाम विंशस्तरङ्गः ।**

ॐ

अथ

# एकविंशस्तरङ्गः ॥

अथैतत्संसरणव्यवहारस्य परमाभितत्वमुकारपरत्वं च प्रसिद्धं भवति । इदं सर्वं पूर्वव्याख्यानेन स्पष्टमुक्तं भवति । इत्थमकारोकारयोश्चायं संबन्धः । तत्संबन्धेनैव संसरणव्यवहारश्च सिद्धो भवति । तत्र चाप्यनेकत्वम्, एकस्यानेकत्वमिति बीजात्, संबन्धित्वेनाकारोकारयोरतीतत्वाच्च । इकारावश्यकत्वेन मकारस्य निषेधपरत्वेन च यथायोग्यमकारोकारपरं च सर्वेषां सृष्टिमात्रं व्यवस्थितं भवति । अत्रैव हि सूत्रात्मा प्रत्यगात्मा देवी प्रकृतिर्मूलप्रकृतिर्जीवात्मा चेत्यादिव्यवहारो भवति । तत्पर एव हि परमात्मा परं ब्रह्म पूर्णमव्ययमनव्ययं शाश्वतं सर्वभूतं सर्वस्थं सर्वानुगतं साम्यं सनातनं कर्मजं कर्मश्लिष्टं कर्मरूपं कर्माविर्भूतमनन्तमाद्यन्तविवर्जितमगोचरं च प्रणवसंज्ञकं वेदितव्यं भवति । अत एव—

"परं च परमात्मानं तथा ब्रह्म निरामयम् ।
शाश्वतं चाव्ययं पूर्णं स्थितं प्रणवगोचरम् ॥
ओमित्येकं त्रिधाध्यस्तं सर्वभिन्नं समानजम् ।
स्वाभिभूतं स्वयं सर्वं सर्वत्रगमनन्वयम् ॥



सर्वाश्रयं सर्वसंस्थं सर्वरूपं सनातनम् ।
सूत्रात्मा प्रत्यगात्मा च देवी प्रकृतिरेव च ॥
तथा च मूलप्रकृतिश्चत्वारि प्रभवन्ति हि ।
ज्ञानमिच्छा क्रिया चैव समाहारः समाश्रयः ॥
आत्मा चैको जगद्भासो जगदात्मा परावरः ।
प्रविष्टं निष्क्रियं चैव सक्रियं प्रणवात्परम् ॥"

इत्यादि प्रवचनम् । तस्मादेवं नियमेनैव सर्वसंसारव्यवहारश्च सूचितो भवति । यत्र यत्र चायमात्मा सूत्रात्मा देवी प्रकृतिः मूलप्रकृतिश्च, येन येन भावेन कार्यं करोति, तत्र तत्र तत्तादृशं प्रदर्शनम् । किंचात्र कार्यमावश्यकपरम्, आवश्यकं च कालपरम्, कालश्चातीतोऽनेकव्यक्तिपरश्च भवति । एवमेव संसारेऽप्यनेकाश्च क्रियाः संप्रदृश्यन्ते । परं त्वेतच्चतुष्टयभिन्नं न कदापि वेद्यं भवति । किञ्च तच्चतुष्टयपरमोङ्कारनिष्ठं सर्वमिति व्याख्यातम् । यद्यप्येतादृशपदार्थानां परमाणूनामपि च प्रदर्शनं भवति, येन यथार्थश्च प्रणवसंबन्धो नोपदृश्यते; तथापि जायमानव्यवहारेण प्रत्यण्वप्येतत्त्रितयं वेद्यं भवति । आकाशस्य सर्वत्र विद्यमानत्वाच्छब्दस्याकाशगुणत्वादेतत्त्रितयप्राथम्यस्य शाब्दिकत्वाच्च, यथायथमिदं वेदितव्यम् । एवं द्रव्यादिव्यवहारेऽपि मूलभूतमिदं वचनम्, येन द्रव्यस्य त्रितयावस्था भवति, एवं गुणादीनामपि संबोधो भवतीति । वस्तुतस्तु योऽयं द्रव्यादिव्यवहारः, स सर्वोऽपि

संसरणपरो भवति। अहं तु न किंचन इति सर्वाख्यानेन स्पष्टमुक्तं भवति। यद्यप्यत्र, अणवः परमाणवः महद्बुद्धिश्च पञ्च महाभूतानि, एवं जगदादयश्च संप्रसिद्धाः; तथापि चात्मसामान्यानुरोधेन, तथाहमेतन्नेत्यैक्याच्च, सर्वं नाहमिति यथायथं बोध्यम्। अत एव—

"न चेत्थं तदित्थं न चैवं तदेवं
गुणद्रव्यकर्मप्रशस्तं न चाणुः।
सदा सर्वशुद्धं विरुद्धस्वरूपं
न सङ्कल्परूपं विकल्पानुषिद्धम्॥
स चैकः परः सद्विकल्पोऽहमात्मा
विभुर्वैभवाच्च प्रसिद्धोऽयमात्मा।
सदा सर्वनिष्ठः समस्थोऽहमात्मा
सदोङ्काररूपप्रसिद्धोऽहमात्मा॥
क्रिया सर्वतत्वस्वरूपोऽयमात्मा
ह्यनन्तः परोऽतीतसिद्धोऽहमात्मा।
सदैवैकरूपो नकारानुरूपः
सकारोऽसकारः सकारः समोऽयम्॥"

इत्यादि प्रवचनम्। तस्मादात्मनश्चैवं भावेन सर्वं च जगत्प्रजायते। सर्वस्मिंश्च जगत्यात्मा तिष्ठति, तस्य स्वच्छन्दप्रभावत्वात्। यद्यप्यात्मनो भिन्नत्वमाख्यातम्——नायमात्मा ज्ञानपरो न च क्रियापरो



न चेच्छापरश्चेति, तथापि सर्वाविर्भवनयोगेन ह्यहमैक्यविरोधानुरोधेन चात्मनः पृथक्त्वम्, तदेकत्वं च सिद्धमेवेति विज्ञेयम्। अहमेतन्नेति त्रितयस्य पूर्णत्वात्त्रितयं ब्रह्मेति प्रवचनाच्च तादृशमात्मानं विद्धीत्युपदेशः। अत एव ज्ञानाविर्भूतं कर्माविर्भूतमिच्छाविर्भूतं मायाविशिष्टं च सर्वं जगदिति प्रोच्यते। एवं भावेन हि सदसत्प्रदर्शनं मिथ्यामिथ्याप्रदर्शनं द्वैताद्वैतं तृत्वैकत्वं च प्रसिद्धम्। अस्य चैकस्य सर्वसंख्यात्वं सांख्यत्वमिति च युक्तम्। अस्य पूर्णत्वे तु सर्वथैवाहमेतन्नेति बीजमात्रमिति सिद्धान्तः। अत एव 'सदैवाहमेतन्नकारपरमप्रमेयं प्रमाणादिविवर्जितं सर्वोपन्यस्तम्, इत्यादिश्रुतिः। अत एव च' 'ईशावास्यमिदं सर्वम्, इत्याद्युक्तम्। अत्र हि व्याख्यानेन ईशस्यैव सर्वान्तरत्वं समुपन्यस्तं भवति। नाम सर्वमेवेति तद्व्याख्यानम्। तस्मादहमेतन्नेति वाक्यपराश्च सर्वाः क्रियाः, तद्वाक्यपरं च ज्ञानम्' तद्वाक्यपरैवेच्छेति सर्वोपदेशफलम्। वाक्येनानेनैव सर्ववाक्याविर्भवनम्, इदं च ब्रह्मवाक्यमोङ्कार एवेति व्यवस्थितम्। एतदहं नेति शब्दत्रयपरमेव हि क्रियेच्छा ज्ञानम्, त्रितयमनुष्ठितं भवति। तत्रैवं विवरणम्——अहमित्यस्य चैतदि प्रत्याभासो ज्ञानम्, एतदित्यस्य चाहमि प्रत्याभासश्च क्रिया, अहमेतदोश्च नकारे प्रत्याभासश्चेच्छेति। अहमेतन्नास्मीत्यस्प्रयोगात्समाहारो व्यवस्थितो भवति। इदं तत्स्वरूपम्, अहमेतदिति ज्ञानस्वरूपम्, एतदहमिति क्रियास्वरूपमिति,

एवमपि विज्ञेयम्—अत्रैवेत्थमेवम्, यावदित्थम्, एवं नास्ति, तावदन्येन सहानुयोगो न भवति, योऽहं स च केनचित्प्रकारेणैवान्यस्मिन्प्रविशामि, प्रकारमन्तरा प्रवेशस्यासंभवात्तत्प्रकार एवेत्थमेवेति। तस्मादहम्येतदाभासः क्रिया भवति। क्रिया तु योगपरैवेति व्याख्यानतया योगः प्रकारेणैव भवतीति स्पष्टतया वेत्थमेव प्रयोगः। तस्मात्क्रियामात्रे, "इदमित्थमेवं विहितं सनातनं कर्मस्वरूपं प्रवदन्ति चोत्तमाः इति। अत एव "अनन्तमभ्यस्तमनादिरूपमाभासमाभासमतःप्रशस्तम्" इत्यादि प्रवचनम्। तस्मादहमश्चैतद्याभासो ज्ञानम्, एतदश्चाहम्याभासः क्रिया, तयोरैक्याभासो नकारे, स एवेच्छा च भवतीति विज्ञेयम्। येन येन साम्यम्, स तं तमिच्छतीति श्रुतिः। सामानाधिकरण्यं प्रकामयेय इति सर्वसिद्धान्तश्च। अत्र च, अहमेतदिति ज्ञानस्वरूपम्, एतदित्थमहमिति क्रियास्वरूपम्, अहमेतन्नास्मीति समाहारस्वरूपमिति च विज्ञेयम्। तदेवं भावेन महावाक्यं चाविर्भूतं भवति, ज्ञानेच्छाक्रियासमाहारपरावरम्। एतेषां च यथाक्रमं यथाकालं यथादेशं यथावस्तु यथाविधि च परिवर्तननिवर्तने च भवतः। इदमेव संसारफलं भवति। अत्र च सन्त्यनेकानि प्रमाणानि परिवर्तननिवर्तनपराणि। कालपरिवर्तनमित्थम्—दिवा रात्रिः, शयनं जागरणम्, जननं मरणम्, उत्पत्तिः प्रळयः युगः कल्पो मन्वन्तरं महामन्वन्तरं चेति। देशपरिवर्तनं चेत्थम्—अत्रेदम्,



नेदमत्र, अत्रेदमित्थम्, अत्र च नेत्थमिदमित्यादि। क्रियापरिवर्तनमित्थम्—अनेनेत्थमिदं प्रजायते, नानेनेत्थमिदं संभवतीत्यादि। एवं क्रमेण हि, द्वित्वव्यवहारः, तत्त्रित्वव्यवहारोऽनन्तसंख्यापरश्च सर्वोऽपि प्रसिद्धो भवति। परं तु वस्तुतः प्राधान्येन सर्वस्यैक्यमेव सूचितं भवति, सर्वापेक्षं च सर्वं भवतीति व्याख्यानात्। तस्मात्सर्वं कालदेशक्रियान्तर्गतम्, तच्च सर्वं प्रणवान्तर्गतम्, अतीतश्च प्रणवः, तत्रैव हि निवर्तनादिव्यवहारः, इति स्पष्टमुक्तं भवति। अत एव—

"अहमश्चैतदाभासो ज्ञानमात्रं तदुच्यते।
एतदश्चाहमाभासो क्रिया चेति व्यवस्थितम्॥
नाभासस्तु तयोरेवमिच्छा प्रोक्ता परायणी।
अहमेतन्नास्मियुक्तं वाक्यमित्थं त्रयात्मकम्॥
ओमित्येकाक्षराध्यस्तः समाहारो व्यवस्थितः।
एतदेव परं सर्वं सर्वान्तरमनन्वयम्॥
सर्वभावमभावं च सर्वन्यासं सनातनम्।
अकारोकारमकारसंस्थितं स्यात्प्रतिष्ठितम्॥"

इत्यादि प्रवचनम्। तस्मादेतत्त्रितयमूलमिदं त्रितयं तादृशं प्रत्यण्वपि च वेद्यं भवति। अत एव "योगाच्च ज्ञानमिच्छा कर्म भवति" इत्याद्युक्तिः। अहमेतदोर्योगेन क्रिया, अहमेतदोर्योगेन ज्ञानम्, तयोरैक्यमिच्छा, इति हि तदर्थः। तदेवं ज्ञानक्रियेच्छासमाहार-

व्यवहारः । वस्तुतस्तु मूलादिवाक्याभिन्नं ब्रह्मेति सर्वैराख्यातम् । अत एव––

"न च ज्ञानसिद्धं न कर्मप्रसिद्धं
न चेच्छापरं ब्रह्मतत्वं प्रसिद्धम् ।
न चाहं न चैतन्नकारो न किंचि-
त्समानं समानं न संवेदनीयम् ॥
अकारो न चाहं ह्युकारः प्रवेद्यो
ह्युकारो न चाहं नकारः प्रवेद्यः ।
नकारो न चाहं विवर्त्तोऽहमात्मा
सदा वर्तितो वर्तनस्थोऽहमात्मा ॥"

इत्यादि प्रवचनम् । एवमेव––

"न च ज्ञानेन संसिद्धो नेच्छया नैव कर्मणा ।
समाहारपरो नैव शाश्वतो ब्रह्मसंज्ञकः ॥
नैव कालः क्रिया देशस्तद्विरुद्धं न किंचन ।
न प्रभावो न चाभावो नाहं नाहं न किंचन ॥"

इत्यादि प्रवचनम् । तस्मात्तदित्थमात्मा च ब्रह्मपरो वेद्यो भवति । ब्रह्मस्वरूपं नाम साक्षाद्विद्धि इत्युपदेशः । तज्ज्ञानायैवेयमुक्तिः––

"ज्ञानं प्राप्य तथा कर्म प्राप्य चेच्छां परावराम् ।
लभ्यतां परमं स्थानं शुद्धं प्रणवगोचरम् ॥



योऽयमात्मा समानन्दो व्यक्तिशक्तिसमन्वितः ।
निष्क्रियः कालनिर्भिन्नो देशाभिन्नः स चोत्तमः ॥
तदात्मानं तदात्मानं तदात्मानं निबोधत ।"

इत्यादि प्रवचनम् । तदेवं भावेन ब्रह्मभावपूर्वकं सकलं चेष्टं ज्ञात्वा सर्वकरणौचित्यमिति व्याख्यानफलम् । तदित्थमेव कर्ता कारयिता प्रयोज्यं प्रयोजक इत्यादि द्वित्वं भवति । यद्यपि भेदपरमिदं सर्वं वचनम्, तथापि क्रियाप्राधान्यात्तदपेक्षया च सर्वेषां सामानाधिकरण्यमव्यवहितं सनातनं सर्वनिष्ठं चास्त्येव । विहितकालादारभ्य त्रुटिपर्यन्तं यद्यपि चेदमाख्यानं भवति, तथापि तदात्मानात्मसंयोगेन सम्यग्विभावना च दृश्यते । न तत्र किंचिदपि व्यवहार्यमस्ति । सर्वेषां च सर्वैः सह साम्यं संसूचितं भवति । अन्यथा तु व्यक्तीनां प्रत्येकमपि विरुद्धव्यवहारश्च भवति, अहमैक्यविरोधनियमात् । अत एव––

"संक्षयो दृश्यते चात्र वर्धनं च व्यवस्थितम ।
तत्र मूलं परोद्भावस्तदात्मानात्मसंज्ञकः ॥
अहमैक्यसमारोधः सर्वत्राणौ प्रजायते ।
तस्मात्संवर्धनं नित्यं क्षयश्चैकः समात्मकः ॥"

इत्यादि प्रवचनम् । तस्मात्संक्षयवर्धनव्यवहारपरोऽयं संसारः । तृतीयं चात्र स्थितिमत्वम्, येन यथावद्ब्रह्मप्रकाशो भवतीति

तद्भावो विज्ञेयः । एतदर्थमेव दृष्टान्तः सिद्धान्तः प्रत्यक्षानुभवश्च निर्णीयताम् । अथवा स्वयमेव सर्वं जानातीति विज्ञेयम् ।

सर्वारंभावसाने चैतत्परे व्यवस्थिते, सर्वातीतत्वात्, कालस्य क्रमिकत्वात्, क्रमस्यानन्तत्वाच्च । नैकस्मिन्काले सर्वेषामारंभः, नैकस्मिंश्च काले सर्वावसानमिति च व्याख्यानैः स्पष्टमुक्तं भवति । कुत्रचिदारंभः, कुत्रचिदवसानमित्याद्यनेकभावेनानुवर्तनं भवति । ब्रह्माण्डादिव्यवहारेण हि तच्चारितार्थ्यम्, यस्य यस्य चारंभो भवति तस्यावसानमप्यवश्यमिति बीजात् । यद्यप्यनन्ते चारंभावसाने ह्यनुपयुक्ते, तथापि सार्वत्रिकव्यवहारात्क्रमानुष्ठानाच्च तदेवं वेदितव्यं भवति । क्रमस्यानन्तत्वोक्त्याप्येतदन्तरे चेदमिति बीजाच्च तद्व्यवसायोपन्यासः । अथवारंभावसानादिरहितत्वं सर्वथाख्यातम् । तद्यथा—

"न चारंभसिद्धो ह्यनारंभसिद्धो
न चैवावसेयो न चैवावसानम् ।
न वा तद्विरामस्तदन्तः प्रधानं
सदैवाहमात्मा सदैवाहमेतत् ॥"

इत्यादि प्रवचनम् । एवमेव—

"एतन्नाहं नान्तरो योगरूपो
भावः सिद्धः सर्वशुद्धः समस्थः ।



ज्ञानं निष्ठं सा क्रिया तत्परस्था
भावो नाहं नित्यमेतत्स्वरूपम् ॥

विद्याऽविद्या वर्तते नैव किंचित्
सत्यासत्यं निर्मितं नैव किंचित् ।
सर्वारंभो नावसानं प्रशस्तं
जीवो नाहं नित्यमेतत्स्वरूपम् ॥

तत्वज्ञानं निर्विकारं च शुद्धं
वृत्युद्भूतं प्रावृतं सर्वसिद्धम् ।
नित्यानित्यं नित्यमेयं समेयं
जीवो नाहं नित्यमेतत्स्वरूपम् ॥"

इत्यादि प्रवचनम् । तस्मादित्थं क्रियायाश्चारंभावसाने, तथा चोत्पत्तिस्थितिविनाशा वेदितव्या भवन्ति । एवं क्रमेण सर्वपदार्थानां यथार्थश्च निर्णयो भवति । तन्निर्णय एव तज्ज्ञानम् । ज्ञानं ब्रह्मेति प्रवचनाद्ब्रह्मज्ञानस्यावश्यकत्वबीजाच्च सर्वं निर्णेयं भवति । अत एव "आत्मानात्मानं विद्धि" इत्युपदेशः । एवमेव "आत्मनात्मानं प्रजानाति" इति सर्वसिद्धान्तः । एवं बीजेनैव प्रत्यणुज्ञानौचित्यमुक्तं भवति । अन्यथा तु—

"यथाहं तथाणुस्तथैवेह सर्वं
तथा निर्णयो ज्ञानमूलस्समस्तः ।

समोऽहं समोऽयं समं सर्वभूतं
समानं समं सर्वसंज्ञं परं स्यात् ॥
न हेतुर्न चाभासरूपोऽयमात्मा
समः सर्वभावाभिभूतो निरस्तः ।
नकारो नकारो नकारस्वरूपः
सदैवाहमात्मा सदैवाहमात्मा ॥
यथैवात्र संभासते ब्रह्मतत्वं
तथा तत्र सर्वत्र चाभाति नित्यम् ।
समोऽयं समोऽयं समोऽयं समोऽयं
निरस्तं सदा सर्वतो भिन्नसंज्ञम् ॥
न कालो न चाकालरूपोऽद्वितीयो
न चैकः प्रतिष्ठो न वै तद्द्वितीयः ।
जगत्तुच्छमेतत्स्वयं ब्रह्मरूपं
सदा सर्वदा सद्विभिन्नं विभिन्नम् ॥
सदा जायते नाश्यते सर्वमेत-
न्न वै जायते नाश्यते चाहमात्मा ।
न चाणुर्विनाश्यो न चैतत्प्रणाशः
सदा सर्वथा नित्यबुद्धं स्वरूपम् ॥"

इत्यादि प्रवचनम् । तस्मादिदं सर्वस्वं क्रियामात्रं सच्चिदोङ्कार-निष्ठमानन्दमयमजातममृतं चेति विज्ञेयं भवति । एवं विज्ञाय हि



क्रियातत्वनिर्धारणम् । अन्यथा तु सार्वत्रिक्याश्च क्रियायाः ज्ञानमात्रस्य संभवः । इच्छायास्तु सर्वनिष्ठत्वान्नकारात्मकत्वाच्च तज्ज्ञानौचित्यमेव संसूचितं भवति । तथा चेच्छायाः परस्पराभिधायकत्वात्सापेक्षादिज्ञापकत्वात्सर्वादिमूलकत्वाच्च ज्ञानस्याविषयत्वमुक्तं भवति । यद्यपि ज्ञानेनेच्छा भवतीति व्याख्यातम्, तथापि कार्यपरमिदं भवतीति विज्ञेयम् । कारणपरत्वेन तु जिज्ञासामन्तरा ज्ञानस्यानभिधानमेवेत्याकरे स्पष्टमुक्तं भवति । तस्मादिच्छाया ज्ञानाविषयकत्वं तथा स्वस्याविषयकत्वं च प्रशस्तम् । सर्वथात्मानं विज्ञाय तत्वमुपलभताम्, उपलभ्य ब्रह्म भूत्वा च कार्यसाधनौचित्यम् । यद्यपि ज्ञानमन्तरेणाहं ब्रह्मास्मीति सार्वत्रिकज्ञानस्याभिन्नत्वेऽपि कार्यं न निवर्तते, इत्याद्युक्तिः, तथापि सार्वत्रिकस्य च कार्यस्य प्रत्यारोध एवेति बोध्यम् ।

एकदेशीयत्वेन समुदायस्थत्वेन च कार्यस्य प्रकारद्वयम् । यद्यप्येकदेशेन समुदायस्य प्रवचनम्, तथापि तच्च ज्ञाननिर्देशपरं बोध्यम् । एकदेशीयकार्ये कृते, तेन समुदायाभासो भवति । समुदायप्रकाशे सति कार्यं सार्वत्रिकं भवति । इदमेव हि ब्रह्मज्ञानफलं भवति । यच्च हि कार्यमेकदेशि, तच्च सर्वातीतं समुदायपरमेवेति बोध्यमित्युपदेशफलम् । सर्वमन्योन्याश्रयं चेति ज्ञात्वा, ज्ञात्वा च क्रमो ह्यन्योन्याश्रय इति, क्रमस्य च कालाधीनत्वं मत्वा, अतीतत्वं च कालस्य बुध्वा, कालपरत्वात्पर-

स्वपरापेक्षत्वाच्च सर्वस्य चैकत्वं विज्ञाय च, सर्वं च संसारमात्रं विज्ञेयमिति ब्रह्मतत्वमवधेयम् । सर्वमिदं भवत्योङ्कारपरम् । तस्मादकारोकारविज्ञानेन, तन्मूलकमकारविज्ञानेन, अहमेतन्नेत्यनुसंधानेन सर्वबोधो भवतीति व्याख्यानेन च, ज्ञानस्यौचित्यं प्रशस्तम् । एवमवधार्य हि ब्रह्मस्वरूपबोधाय, सर्वज्ञानकामनया ब्रह्मतत्वपरिभावनया चेदं मूलभूतं महावाक्यं वेदितव्यं भवति । अत्र तदिदं ज्ञानतत्वम्, येन हि केवलमहंमात्रस्य प्रकाशः, ईदृशाहमित्येतन्मात्रभानं क्रियातत्वम्, अस्म्यहमितीच्छातत्वम्, अहमीदृशश्चैतन्नास्मीति समाहारतत्वं च भवति । ततो ब्रह्म सार्वत्रिकमिति भावना । एवं विभाव्य हि संसारे स्थीयतामित्युपदेशः । तस्माच्च ज्ञानेच्छाक्रियासमाहारपरिवर्तनं बुध्यते । एतत्प्रबोधायैव ह्योङ्कारोऽनुष्ठितो भवति । तत्र च ज्ञानेच्छामात्रज्ञापनं यथायथं प्रदर्शितं भवति । तस्मात्क्रियातत्वमहम्येतदश्चाभासरूपम्, नकारसंबद्धमुत्पत्तिस्थितिविनाशरूपमुकारपरं सर्वाभ्युपयुक्तमेतन्निष्ठं च संसरणमात्रं बोध्यमिति सिद्धान्त इत्यलम् ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे प्रत्यगात्मादिप्रकृतिस्वरूपनिरूपणं नाम**
**॥ एकविंशस्तरङ्गः ॥**

ॐ

## अथ
# द्वाविंशस्तरङ्गः ॥

अथ तदित्थं भावेन ज्ञानानन्तरं च क्रियाव्यवहारः । तत्र क्रियायां चत्वारो मुख्याः, कर्ता करणं कार्यं प्रयोजनं चेति व्यवस्थिताः । विना चैतच्चत्वारि क्रियायाश्चासंभव एव बोध्यो भवति । क्रिया तु सर्वव्यवहाराधिकारपरा सार्वत्रिकी सार्वकालिकी चेति विज्ञेयम् । एवं संसरणमात्रं क्रियाव्यवहारपरं भवति । क्रियामन्तरा हि यथायथं शब्दप्रयोगो न भवतीति वैयाकरणाभिमतं भवति । यद्यपि केवलेनापि सुबन्तेनार्थावगतिः, तथापि सुबन्तस्य तिङन्तापेक्षकत्वं सर्वत्रोक्तं भवति । यद्यपि सुबन्ततिङन्तयोरप्येकत्वव्यवहारः, तत्कृदन्तप्रयोगेण सुबन्तेन सह यथावदभिप्रायविज्ञानं भवति ; तथापि कृदन्तानां क्रियात्वेन प्रवचनात्, सादृश्यात्क्रियामात्रव्यवहाररूपं नाम तिङन्तत्वं तत्रापि बोध्यं भवति । यद्यपि—इदमत्राप्रयुक्तम्, प्रयुक्तं चेदमत्र, इदं च मया कृतम्, न कृतं त्वया, इत्यादिवाक्यानां तु सर्वथा सुबन्तत्वमेव, तथापि कृतमित्यादीनां तिङन्तत्वेन संबन्धः । अत एव कृदन्ता नाम सर्वेऽपि क्रियानिष्ठाः क्रियासंज्ञाश्च भवन्ति । एवमेव

सर्वेषां सुबन्तानां क्रियापरत्वं विवक्षितं भवति । ये च शब्दाः संभवन्ति सुबन्तास्ते सर्वेऽपि तिङन्तजाश्चेति विज्ञेयम् ।

धातुमात्रस्यैव प्रत्ययत्वप्रत्ययान्तत्वाभिधानेन, सुबन्तत्वमिति व्युत्पत्तिपक्षो भवति । अव्युत्पत्तिपक्षे तु सर्वेषां शब्दानामनादित्वमसाधनत्वं च सर्वत्रोक्तं भवति । अव्युत्पन्नाश्च सर्वे शब्दा ब्रह्मवद्भान्ति, न तत्र देशकालौ, न सन्धिर्न प्रकृतिर्न भवनं च भवतीति, तदर्थं निर्धारणमपि नास्तीति च विज्ञेयम् । यस्मिन्यस्मिश्चार्थे तत्प्रयोगकरणौचित्यं स्यावश्यकतानुरोधेन बुध्यते, तस्मिन्तस्मिंश्चार्थे स च प्रयोगः कर्तव्यः । भाषान्तरगतानां च शब्दानामर्थान्तरं भवति । बीजेनानेनैव सर्वशब्दानां यथायथं प्रयोगश्च व्यवस्थितो भवति । यद्यपि सर्वे व्युत्पन्नाः सर्वेऽप्यव्युत्पन्नाः, तथापि तदात्म्यैक्यविरोधानुकूलप्रतिकूलप्रकारेण तत्तत्वं च वेद्यम् । ये च शब्दाः ह्यहमैक्यविरोधपरास्ते सर्वे व्युत्पन्नाः । तेषां च नाम क्रियाया व्युत्पत्तिर्भवति व्यष्टिभावश्च । ये च शब्दाश्चाहमैक्यपरास्ते सर्वेप्यव्युत्पन्ना भवन्ति । अहमैक्यविरोधस्तदैक्यं च सार्वत्रिकं बोध्यं भवति । अतः सर्वे च शब्दास्तादृशा भवन्ति । एतदावश्यकानुरोधेन ते व्युत्पन्ना ह्यव्युत्पन्नाश्च भवन्ति । अत एव—

"आत्मनिष्ठाः सुबन्ताः स्युस्तिङन्ताश्च क्रियापराः ।
सर्वे शब्दाः समायुक्ताः क्रियानिष्ठाः परावराः ॥



वाक्यभेदे च सर्वस्मिन्द्वौ भावौ सुव्यवस्थितौ ।
सुप्तिङौ तौ समाख्यातौ क्रियाशब्दपरावरौ ॥"

इत्यादि प्रवचनम् । एवमेव—

"द्विधा शब्दः समाख्यातश्चात्मयोगादिकारणम् ।
स व्युत्पन्नोऽव्युत्पन्नश्च संसारस्यानुरोधतः ॥
व्युत्पन्नस्तु क्रियानिष्ठश्चाव्युत्पन्नः सनातनः ।
आत्मानात्मनिषेधस्थः शब्दश्चेति विधिर्भवेत् ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वेषां च शब्दानां क्रियापरत्वं मान्यं भवति । अतश्चैवं क्रियायां सर्वं द्रष्टव्यम् । क्रियाज्ञानेनैवात्मज्ञानसंभव इति व्याख्यानैः स्पष्टमुक्तं भवति, यश्च यत्र पूर्वस्तेनैवारंभ इति बीजात् । संसारेऽस्मिंश्च क्रियैव पूर्वा भवति । ततः क्रियाव्यवहारेणैव ब्रह्मभावोऽवगन्तव्य इति सिद्धान्तः । ब्रह्मप्राप्तिफलमपि क्रियानिर्धारणमेव । तत एव क्रियाज्ञानमावश्यकं भवति । अत्रेदमवधेयम्—सर्वस्मिन्नुपदेशे सर्वसमाश्रयणे च करणौचित्यमेवोक्तम्, तेन क्रियैव सर्वत्र द्रष्टव्या भवति, क्रियायाः स्थानं च देश एव, देशमन्तरा क्रियायाश्च स्थितेरसंभवाद्देशे क्रिया भवतीत्युक्तिः, तत्र च देशः कालः क्रियेति च वितथव्यवहारः, यत्र चाहमैक्यविरोधः एतदिति भवति स च देश एवेति । तथा च नामाहमेतदोरैक्यविरोधावस्था च देश इति बोध्यम् । यद्यप्यवस्थाप्रवचनेन हि क्रियैव बुध्यते, तथापि क्रियायाः

स्थितिर्निर्देशपरत्वेन ह्यवस्थाया देशत्वेन च प्रवचनम्। अवेत्यात्मा। योऽयमवः सर्वतो रक्षणीयः सर्वरक्षकः स्वयं रक्ष्यः, स यत्र तिष्ठति, नाम तत्स्थितिमात्रमेव ह्यवस्था भवति । अवस्थानमवस्थितिरवस्थेति च सिद्धान्ततया ह्यवस्थायाः संभव एव देश इत्युच्यते । आत्मैक्यविरोधावस्था च नाना भवति, तन्नानाभावैक्यविरोधो देश इति ब्रह्मसूत्रात्। नानात्वे यश्च क्रमः, स काल इति, तत्प्रमाणावश्यकपरा च शक्तिरित्यपि चेति सूत्रत्रयेण देशकालवस्तुपरिभावना भवति । तत्रैवं व्याख्यानं भवति— योऽयमात्मा स च सर्वभिन्नः, सर्वाश्रितः, सर्वपरः, सर्वाविर्भूतश्चेत्यादितद्विशेषणमिति । तस्मिंश्च यो ह्यैक्यविरोधः, यच्च नामैक्याद्विरोधमात्रभवनं स्वभावपरम्, तदेव नानात्वं भवति । तस्य चानन्तत्वातीतत्वप्रवचनात्सदवयवानुगतनानात्वस्यापि तादृशत्वं विज्ञेयम्।

तत्राहमैक्यविरोधनिष्ठानां नानाविधानां च यद्भवनमावश्यकम्, तस्यैव देश इति व्यवहारः। दृश्यताम्—यच्च किञ्चिद्भवति, तस्यावस्थापि चावश्यं भवति, एवमेव कुत्रचिदपि तच्चानुमेयम्, यो भवति तस्य भवनमात्रसत्तायामेवैवं विचारो भवति, कुत्र स च भवतीति। एवमवधार्य हि क्रियाकार्यावधारणमित्थं भवति—को भवति, को ह्यस्य भावयिता, कोऽयमत्र व्यापार इति। तस्माच्च किंचिद्भवत्यहमैक्यविरोधरूपं नानात्वम्, तद्भवनरूपक्रियाया यश्च संभवः, स एव देश इति प्रवचनमिति। देशपरिभाषा चैषा भवति, दिश्यते सृज्यते स्थीयतेऽस्मिन्निति। संभवनव्यवहारविषयो देश इति च प्रवचनम्। एवमेवाहमेतदोर्योगेन प्रकाशो देश इति च तद्भावो विज्ञेयः। यच्चाहम्, तस्य चैतदि प्रत्याभासः। अहमैक्यविरोधो नाम—अहमस्मीत्थमेतदत्रेति। तत्र चात्रेति देशस्वरूपमुच्यते। क्रियासहितो देश इति सर्वथा निर्वचनं भवति। विना हि क्रियां देशपरिभाषाया नोपस्थितिः। यद्यपि देशकालयोरपि संबन्धस्तादृशो भवति, तथापि व्यवहिताव्यवहितत्वं विधानेन बोध्यम्। देशकालयोरव्यवहितत्वरूपसंबन्धो नास्ति, किं तु व्यवहितत्वरूपश्च संबन्धो भवति। यद्यपि क्रियायां तु द्वयोरव्यवहितत्वरूपः संबन्धः, तथापि स्थानस्थानिभावसंबन्धो विधीयते। कालस्थानं तु क्रिया, क्रियायाः स्थानं देश इति व्याख्यानात्, क्रियाकालयोश्च स्थानं देश इति सूचितं भवति। यद्यप्यन्तरेण कालक्रिये देशप्रवचनं न भवति, तथापि देशमात्रस्यात्मत्वेन प्रवचनात्तस्य सार्वत्रिकत्वं तादृशमवाच्यत्वं च युक्तमेव। क्रियाकालयोश्च वाच्यत्वेन सर्वथा व्यवहार एवेति बोध्यम्। तस्माद्देशमात्रे क्रियाकालयोः संस्थितिरिति व्याख्यानफलम्। देशे च तस्मिन्नामात्मावस्थायां यच्च सर्वक्रियाविभावनम्, तदेव नानात्वम्। वस्तुतस्तु नानात्वं नेह किञ्चन इति स्पष्टं वाक्यम्। आत्मनः सर्वाविर्भूतत्वान्नाम सर्वेणात्मा भवति, सर्वं चानात्मकम्,

तेनात्मप्रभासनम्, आत्मना च सर्वं भवतीति च सर्वप्रभासन-मित्याविर्भावफलम्। तस्मात्तत्सर्वतो भिन्नमुपन्यस्तम्। तद्यथा—

"न देशः प्रदेशः परः सिद्धरूप-
स्तथानिष्क्रियो नैव नानाविधिस्थः।
सदोङ्कारगीतश्चिदानन्दरूप-
स्तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥
न चैक्यं प्रशस्तं न वा तद्विरोधो
न चारोधभावो न चैतत्प्रचारः।
न संसारसारो न तत्सारभूत-
स्तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥
न चैवैतदेतन्न चैवाहमेत-
न्न नेति प्रसिद्धं च नेतीति सिद्धम्।
न चाहं न चैतन्न वै तत्स्वरूपं
तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥
अनन्तं न चानन्तमभ्यस्तमेवं
ह्यतीतं न चातीतमेकं स्वरूपम्।
सदा सद्वृतं सच्चिदानन्दरूपं
तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥
न देशस्तथा ज्ञानदेशो विदेशो
न चावस्थितश्चानवस्थाप्रासिद्धः।



न वानेकभावो न चैवैकभावः
समानन्दभावः समानः समोऽहम् ॥
न वेदो हि जानाति भिन्नं स्वरूपं
स वेदो न जानाति भावस्वरूपम्।
न चैवात्मनाऽनात्मना ज्ञानमेत-
त्तदेकोऽहमेकोऽहमेकोऽहमात्मा ॥
न देशेन बोध्यो महानन्तरस्थो
न कालेन बोध्यः सदैवोपयोग्यः।
क्रमो नैव भावो न चैतत्क्रिया वा
सदा सर्वथा चाहमेकोऽहमात्मा ॥"

इत्यादि प्रवचनम्। तस्मादित्थं भावेनात्मापि ज्ञेयो भवति। एवं भावे च सति देशादीनां तादृशव्यवहारश्च सूचितो भवति। अत एव 'देशश्चात्मनोऽवस्था, पराश्च क्रियाः सर्वा भवन्ति' इति सर्वत्रोपन्यस्तं भवति। अत एव—

"महावाक्यपरे भावे मूलभूते सनातने।
एतदित्थं क्रियारूपं चाविर्भावस्य कारणम् ॥
भवत्येवं भवत्येवं भवेदित्थमतः परम्।"

इत्यादि प्रवचनम्। तदित्थमत्र क्रियायां चत्वारि मुख्यानि, कर्तृकारणकार्यप्रयोजनानीति। सर्वाण्येतानि च परस्परसंबद्धानि कार्यकारकाण्यन्योन्याश्रितानीति विज्ञेयानि भवन्ति। अत एव—

"एतद्भूतं जगत्सर्वं क्रियामात्रमगोचरम् ।
आत्मवद्व्यवहारस्थं रूपं चैकं परावरम् ॥
अत्राणुः परमाणुर्वा भावमात्रं हि यद्भवेत् ।
तत्सर्वं त्रितयं वेद्यं परब्रह्मेति भावना ॥
तत्र चत्वारि मुख्यानि प्रभवन्ति पराणि च ।
कर्ता च कारणं चैव कार्यं तच्च प्रयोजनम् ॥
आत्मानात्मनिषेधस्थं समाहारः परोदयः ।"

इत्यादि प्रवचनम् । तस्मात्क्रियायां चत्वारि मुख्यानि, कर्तृकारण-कार्यप्रयोजनानीति विज्ञेयम् । एतन्मुख्यचतुष्टयेनान्योन्यमप्येतत्प-रिवर्तनादिभूतानि संभवन्ति । अत एव कर्तृमयं जगत्कारणमयं कार्यमयं सप्रयोजनम्, इत्याद्युक्तिः । निष्प्रयोजनस्याभावादभावो न किंचिदिति व्याख्यानाच्च निष्प्रयोजनममान्यम् । अत एव—

"सत्प्रयोजनसंयुक्तं जगदित्थमगोचरम् ।
कर्तृकार्यस्वरूपं च कारणेनाभिवेष्टितम् ॥
एतत्परिवर्तनेन भासते सकलं जगत् ।
प्रत्यण्वप्यस्ति चैतच्च क्रिया चापि चतुर्विधा ॥
तत्तदैक्यविरोधस्थं भासते निखिलं जगत् ।
अणोरन्तर्गतं विश्वं विश्वस्यान्तर्गतो ह्यणुः ॥



तद्विभागैकयोगस्था क्रिया संसरणाश्रया ।
ज्ञानमिच्छाक्रिया चैव समाहारः परावरः ॥
एतदेवाभियोगेन सर्वं चोङ्कारसंस्थितम् ।"

इत्यादि प्रवचनम् । तस्मात्कर्तृकार्यकारणप्रयोजनानां चतुर्णां परस्प-रसंबन्धः । चत्वारीमानि च तादृशाकारोकारमकारपराणि भवन्ति । ज्ञानेच्छाक्रियासमाहारावृता च क्रिया व्यवसायात्मिकेति बोध्यम् । एवं चतुष्टयसमूह एव क्रिया इति विज्ञेयम् । अत्र हि क्रियाया निर्धारणमप्येतच्चतुष्टयेनैवेति च विज्ञेयम् । क्रियायाः संज्ञा त्वेवम्, करणं क्रिया इति । भावे घञ् प्रत्यये याते तत्साधनम् । यद्वा क्रियतेऽनेनेति, अनया वा करणे घञ् । तस्य च कारणव्यवसायेन संबन्धः । एवमेव करोतीति क्रियेति निश्चयेऽपि कर्तृत्वसंबन्धः, एवं प्रयोजनपरत्वं चापीति तदर्थात् । करणं क्रियेति कार्यव्यव-हारः । क्रियतेऽनया इति कारणव्यवहारः । करोतीति क्रिया वा इति कर्तृव्यवहारश्च त्रयाणां सिद्धान्तः क्रियाप्रदर्शनम्, तच्च परं प्रयोजनमिति क्रियानुसन्धानात् । यद्यपि क्रियतेऽनयेति करणे घञो दुर्लभत्वम्, तथापि क्रियायां चतुष्टयाभिधानात्, तन्निर्वचन-मवश्यं भवति । कर्तुं योग्यं कार्यमित्यर्थात्कर्तुं तदेव योग्यम्, यच्च भाव्यम् । भाव्यं च भवनव्यापारः । भवनमात्रं चावश्यकं भवति । तदावश्यककरणमेवेति सिद्धान्ततया क्रियायां च कार्यं भवति । अस्याः कर्मत्वेनापि प्रवचनम् । कर्तुर्यदिष्टतमम्, तदेव

कर्मेति व्याख्यानपक्षे च कर्मत्वमुक्तं भवति । योग्यमेवात्यन्तमिष्टम्, योग्यमयोग्यं च विचार्य स्वबुध्यभिनियमेन कार्ये प्रवर्तत इति कर्तृव्यवहारात् । कार्यस्य कर्मत्वं च मान्यम्, अतिशयेनेप्सितं कर्मेति ब्रह्मसूत्रात् । एवमेव—

"कर्तुरिष्टतमं कार्यं कार्यं वै कर्मसंज्ञकम् ।
आवश्यकपरं सर्वं संसारः कर्मलक्षणः ॥"

इत्यादि प्रवचनम् । तस्मात्तस्य कर्मत्वेन विवक्षा भवति । एवमेव कारणमपि । यच्च तत्कार्यस्याव्यवहितत्वेन साधनम्, तत्कारणं भवति । यद्यपि यस्य यदिष्टतमम्, तेनैव तत्साधनमिति कर्तृत्वेनैव गतार्थत्वम्, तथापि व्यवहिताव्यवहितनियमेन सर्वं भवनमिति बीजात्, कर्तृकरणयोर्भेदः । यदिदं कारणम्, तच्चाव्यवहितपरम् । कर्ता च व्यवहितपर इति प्रसिद्धं भवति । एवं बीजेन ह्यव्यवहितसाधकं प्रकृष्टोपकारकं च करणमिति व्याकरणैश्च स्पष्टमुक्तं भवति । नैयायिकाभिमतमप्यत्र प्रशस्तम्, यो हि येनाव्यवहितः स तत्कारणमिति । अव्यवहितं च मुख्यं कारणमिति मीमांसकाभिमतं भवति । साधकतममव्यवहितं तन्निष्ठं च कारणमिति वेदान्तिनः । त्रयाणामव्यवहितं कारणमिति सांख्यनिर्देशः । पदार्थानामव्यवहितत्वेनोत्पादकं कारणमिति वैशेषिकसिद्धम् । यच्चाव्यवहितत्वेन सर्वमभियोजयति, तत्कारणमिति योगसिद्धान्तः। अव्यवहितत्वं व्यवहितत्वं च कर्तृकारणयोर्भेदकमिति सर्वसंमतम् ।



अतश्च कर्तरि करणे च विभक्त्येका तृतीया भवति । यद्यप्यनुक्ते सत्येव सा भाति, तथापि तस्या मुख्यत्वं बोध्यम् । उक्ते तु तदभाव एव । केवलानुदात्तपरस्थत्वमेवेति व्याकरणैः स्पष्टमुक्तं भवति । तस्मात्कारणं चाव्यवहितं साधकतमं चेति बोध्यम् ।

यश्चैवं स्वातन्त्र्येण क्रियायां भासते, स कर्ता भवति । करोतीति क्रिया इति तत्र व्युत्पत्तिः । यश्च करोति, स तदन्तर्गतो भवतीति बीजेन कर्तुः क्रियानिष्ठत्वं चोक्तम् । किं च विना च कर्तारमनुत्पन्ना क्रिया भवतीति व्याख्यानात्क्रियायां स्वातन्त्र्यं कर्तुरुक्तं भवति । तन्त्रस्तावदधिकारः, स्वाधिकारो हि स्वतन्त्रः । यद्यपि सकृद्भवं सर्वार्थकं च तन्त्रमिति ब्रह्मसूत्रम्, तथापि संसारानुकूलपरं तदपि बोध्यम् । कृता सहितः, सकृदित्यव्ययीभावसमासेन व्यवहारः । कृत्साहित्यं नाम, सत्यां च कालक्रियायाः प्राप्तौ, क्रियाविशिष्टं क्रियानुकूलं च सर्वं प्रधारणं समुचितमिति तदर्थः । तस्मात्स्वतन्त्र्यं निरपेक्षं क्रियायाः कारकश्चेति तत्संज्ञा भवति । यद्यपि सर्वं परस्परसापेक्षम्, तथापि स्वशब्दस्यात्मपरत्वेन प्रवचनात्स्वतन्त्रत्वमेव चेद्दोक्तं भवति । यश्च जगतः कर्ता त्वात्मा, तस्य सर्वथैव स्वातन्त्र्यमेव व्यवस्थितं भवति । तस्मात्तद्भावानुरोधेन लघुत्वे महत्वे च सर्वथा सर्वदा सर्वत्र स्वातन्त्र्यं व्याकरणव्यवहारेणैव बोध्यं भवति । एवं प्रयोजनमपि, योजयति युज्यतेऽनेन वा इति तदर्थात्प्रयोजनमपि क्रियापरं कर्तृकारणकार्य-

सिद्धान्तसमाहारपरं चेति विज्ञेयम्, परस्परापेक्षत्वात्। अहमैक्य-विरोधभावनया नानात्वबीजेन च सर्वं सर्वेण युज्यते। तदित्थं सर्वं प्रयोजनं भवति। अहमो भावेन, अहमेतदोरेकसूत्रत्वेन च सर्वः सर्वस्य कर्ता भवति। आत्मव्यवहारेणानात्मसंसर्गेण च सर्वं सर्वेणा-व्यवहितं भवति। तेन सर्वं सर्वस्य कारणम्, यच्च कारणं तदेव कार्यम्, यत्कार्यं तदेव कारणम्, एवं कर्ता च प्रयोजनम्, तदित्थं बीजेन सर्वं सर्वस्य कार्यं वेदितव्यमिति चैक्यभावः, पृथक्त्वेन तु सर्वप्रदर्शनं व्यष्टिभावः, यच्च हि सर्वत्र सूत्रं तदनुरोधेन ह्यैक्यमिति च सिद्धान्तः। अत एवैकनिष्ठं पृथक्प्रयुक्तं च जगदिति प्रवचनम्। अत एव व्याह्रियन्ते सर्वे च पदार्थाः परिनिष्ठिताः परिभूताश्चेति, क्रियाव्यवहारप्रवचनार्थः। व्याहरणं नाम सर्वेषां पदार्थानामेकीकरणम्, भूतभविष्यद्वर्तमानानामेकत्व-भानमेव तन्निर्माणं च क्रियेति तद्व्याख्यानम्। तस्मादेवं बीजेन क्रियामात्रे चैतच्चतुष्टयसंपादनं च व्यवस्थितं भवति। अत एव—

"करोति क्रियते वापि करणं तन्नियोजनम्।
एतच्चतुष्टयोपेता क्रिया सर्वपरायणी॥
ओङ्कारानुगता बोध्या हेतुरूपा जगन्मयी।
आवश्यकपरा नित्या क्रिया संसारसंस्थिता॥
सर्वैश्चानुगता शुद्धा सर्वगा सर्वदेशगा।"



इत्यादि प्रवचनम्। एवमेव—

"तदेकीकरणं चास्य पदार्थस्य परस्य च।
भूतजातस्य निष्ठस्य वर्तमानावृतस्य च॥
भविष्यस्यापरस्यैवं यथायोगं विवर्तनम्।
तत्परस्परसंभाव्यं विहिताविहितं परम्॥
कर्ता प्रयोजनं कार्यं तथा कारणमेव च।
स्वातन्त्र्येण करोत्येवं कर्ता सर्वसमुद्भवः॥
कर्तारमन्तरा लोके क्रिया नास्ति कदाचन।
कर्तुर्यदीप्सितं नित्यं तत्कर्मेति निगद्यते॥
कर्म संसाधकं यच्च तत्कारणमितीरितम्।
त्रयाणां यो ह्यभिप्रायः सिद्धान्तः स्यादवस्थितः॥
सम्यक्प्रयोजनं विद्यादेवमेतच्चतुष्टयम्।
अकारोकारमकारसंस्थितं वाक्यसंयुतम्॥"

इत्यादि प्रवचनम्। तस्मादेतत्त्रितयमकारोकारमकारस्थं बोध्यम्। अत्र च कर्ता त्वात्मा ह्यकारनिष्ठः। स चाहंभावः, अहमः स्वातन्त्र्यात्। कार्यं त्वनात्मा चोकारनिष्ठः। स चैतत्स्वरूपः, कर्तुरिष्टतमत्वात्। अहमेतदोर्योगात्कारणं चेच्छानिष्ठं मकारपरं नेति स्वरूपं च भवति। तयोः संबन्धमूलं सर्वकारणमिच्छेति सिद्धान्तानुरोधात्त्रयाणां च योगः समाहारः प्रयोजनमावश्यकम्।

ओङ्कार इति हि सन्धिस्वरूपम्, अहमेतन्नानुभावकम्, ततस्तत्प्रयोजनं ब्रह्मेति सर्वोपन्यासः । यद्यपि कारणं ब्रह्म कार्यं ब्रह्म कर्ता ब्रह्म सनातनमित्याद्युक्तिः, तथापि सूत्रपरमेतद्वचनम् । एकानुरोधित्वादेकभावेनैव मुक्तिः । अत एवोच्यते—

"कर्ता प्रयोजनं कार्यं कारणं च चतुष्टयम् ।
ओमित्येकाक्षराभ्यस्तं परं ब्रह्म परावरम् ॥
तच्च वै शाश्वतं ब्रह्म ह्योङ्कारज्ञानगोचरम् ।
क्रियानिष्ठं ज्ञाननिष्ठमिच्छानिष्ठमनन्वयम् ॥
समरूपं सर्वनिष्ठं परमात्मसमावृतम् ।
अहमेतन्नेति युक्तं देशातीतं निरामयम् ॥
कालातीतं कालरूपं सर्वक्रमविवर्जितम् ।
एतच्चतुष्टयायुक्तं सर्वमूलं समास्थितम् ॥"

इत्यादि प्रवचनम् । तस्मात्कर्तृकार्यकारणप्रयोजननिष्ठमेकपरिवर्तनावृतं च ब्रह्मेति प्रवचनम् । एकत्वविशिष्टं पृथक्त्व भासमानमिदं क्रियामात्रं ब्रह्मेति च बुध्यते । अन्यथा तु ज्ञानेच्छाक्रियावृतं ब्रह्मेति सर्वत्रोपन्यस्तम् । इदमपि चैतज्जगत्परं संसाराभियुक्तं सार्वत्रिकं च भवति । वस्तुतस्तु विशेषणानुपलक्षितं ब्रह्म विद्धि इत्युपदेशः । तद्यथा—

"न कर्ता न वै कारणं कार्यमेत-
न्न वै कारकं कर्म योगानुयुक्तम् ।



सदा सर्वथा सत्समाहाररूपं
विभिन्नं विभिन्नं विभिन्नस्वरूपम् ॥
न चैषा क्रिया तत्परा रूपिणी स्या-
न्न तद्भावनाभावितश्चायमात्मा ।
सदा नित्यमेतत्स्वरूपं प्रविष्टं
परं ब्रह्म संसिद्धमोङ्कारगीतम् ॥
न चैवेष्टमेतन्न चानिष्टमेत-
न्न चाभीष्टसिद्धं न वै ब्रह्मसिद्धम् ।
सदा सच्चिदानन्दमोङ्काररूपं
विशुद्धं विशुद्धं विशुद्धस्वभावम् ॥
न कर्ता क्रिया कारणं कार्यरूपं
स्वतन्त्रं तथा पारतन्त्र्यप्रमेयम् ।
अनातन्त्रमातन्त्रवैतन्त्रसिद्धं
न चैवं परं ब्रह्म चैकोऽहमात्मा ॥
कथं त्वं कथं चाहमेतत्प्रशस्तं
न चेत्थं तथा वा यथा चान्यथा वा ।
तदैवैतदेवं निरस्तं समस्तं
न चैवं परं ब्रह्म चैकोऽहमात्मा ॥
अहं तुच्छमेतज्जगत्तुच्छमेत-
त्क्रिया तुच्छमेषा परं तुच्छमेतत् ।

नकारः प्रकारो महासारसारो
न चैवं न चैवं निषिद्धोऽहमात्मा ॥
अहं वै निरर्थस्तदेतन्निरर्थं
नकारो निरर्थस्त्रयं वा निरस्तम् ।
सदा शून्यमद्वैतमेकस्वरूपं
समानो न चैवोपमानं न चाहम् ॥
सदा ज्ञानसारो मकारो नकार-
स्तदोङ्कारहारो जगत्सारसारः ।
प्रफुल्लं परं ज्ञानगम्यं निरीहं
सदा सर्वदा शुद्धमेकं स्वरूपम् ॥
अयुक्तं न युक्तं वियुक्तं प्रयुक्तं
न संयुक्तयुक्तं समायुक्तयुक्तम् ।
सदैवाहमेतन्नकारस्वरूपं
नकारो नकारस्ततो वा विभिन्नः ॥
सदा सर्वदा चैकरूपं विशुद्धं
समं वाऽसमं वाक्यशब्दस्वरूपम् ।
विकल्पं प्रकल्पं न सङ्कल्पसिद्धं
नमोऽहं नमोऽहं नमोऽहं नमोऽहम् ॥"

इत्यादि प्रवचनम् । तस्मात्सर्वस्याश्च क्रियायाः व्याकरणकार्य-कर्तृप्रयोजनपरत्वम्, तद्विभिन्नश्चायमात्मेति च वेदितव्यम् ।



इदमेव हि क्रियायां ब्रह्मतत्वविभावनम् । एवं ज्ञात्वा क्रियातत्व-मनुष्ठीयतामित्युपदेशफलम् । यस्याश्चानुष्ठाने सति भ्रमो न भवति, किंतु साक्षात्तस्याः स्वतन्त्रकर्तृभावेन संपादनमिति क्रियाव्यवहार-फलम् । यदेतत्संसरणमात्रम्, तस्य च सर्वत्र बोधो भवति । तद्बोधानुसारेण न कदापि सुखदुःखादिकं प्राप्नोति, सदा सर्वथा स्वस्य क्रियावृतत्वं विज्ञाय, तथा क्रियायाश्च स्वावृतत्वं मत्वा कार्यं भवतीति सिद्धान्तफलम् ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे क्रियास्वरूपविचारो नाम**
**॥ द्वाविंशस्तरङ्गः ॥**

ॐ

## अथ
# त्रयोविंशस्तरङ्गः ॥

अथ तत्क्रियाव्यवहारस्तु तदात्मनः सर्वत्र विद्यमानत्वा-त्तदैक्यविरोधावश्यकत्वाच्च भवति । सर्वस्मिन्नंशे चानात्मसंस्थितिः । आत्मानात्मनोः परस्परप्रदर्शनमेव क्रियेति विज्ञेयम् । न चात्र केवलं प्रदर्शनमात्रम्, किन्तु तयोर्योगोऽपि । तद्योगानुरोधेन हि सर्वत्र कर्म भवतीति व्यवहारः । कर्ता चात्मा भवतीति सूचितत्वेन,

तस्यानात्मा चेष्टतमः । तत्रैव कर्म भवति । कर्तृकर्मणोर्योगे च क्रिया संबन्धरूपिणी भवति । अत एव—

"कर्ता त्वात्मा परो नित्यः समस्तः सर्वसंयुतः ।
अनात्मनि भवेत्कर्म क्रिया तन्मध्यवर्तिनी ॥
ओङ्कारसंस्थितं ब्रह्म तदेवं त्रितयात्मकम् ।
कर्म कर्ता क्रिया कार्यं प्रसिद्धं प्रणवाख्यकम् ॥
आत्मा चैको निराधारो निराकारो निरामयः ।
अनात्मनो बलेनैव भासतेऽनेकसंविधौ ॥
अहमेतदेतदेतच्च नेति भावः स्वभावतः ।
अहमैक्यविरोधस्थः सत्यात्मा सत्यसंस्थितः ॥"

इत्यादि प्रवचनम् । तस्मात्क्रियामात्रे चायमेव व्यवसायः । यश्चायमात्मा, स च स्वाभीष्टं साधयति । स्वाभीष्टश्चायमेतदेतत्प्रचारः, एतद्यहमहम्येतदेतयेतत्, पुनरहमित्यादितत्प्रकारः । एवं नेति नेति प्रवचनमपीति तदभिप्रायः । तस्मादत्राहमेतन्नेति प्रयोगात्तत्क्रियाया एवोत्पत्तिस्थितिविनाशा भवन्तीति कार्यत्रयं भवति । यच्च किञ्चिद्भवति, तद्भवनमात्रमुत्पत्तिस्वरूपम्, अहमश्चैतदाभास एव भवनमिति च तदर्थात् । सर्वाधिकरणं चाहमः सत्ता भवति, तत्रैवैतदित्युत्पत्तिबीजम् । एतदश्चाहम्यात्मनि भानम्, अहमश्चैतद्याभानं चेति परस्परं भानोत्पत्तिव्यवसायः । तत्र च—इत्थमेवम्, एतदनन्तरमिदमित्यादि स्थितिस्वरूपम्, स्थीयते अनेनेति स्थितिः,



स्वयं यश्च वा इत्यादि । अत्रापि—स्थितिः स्थापकः स्थाता स्थानमिति चतुष्टयम् । एवमुत्पत्तावपि, उत्पत्त्युत्पादकोत्पाद्योत्पन्नानि चेति चतुष्टयम् । एवं बीजेनोत्पत्तिः स्थितिश्च भवति । अहमेतदोरेकत्वभानम्, यदहं तदेतत्, यदेतत्तदहमिति, तन्नकारस्वरूपं नाश एव । विरोधस्य विप्रतिभासनं नाम, तत्प्रतिषेधरूपमेव । ऐक्यमात्रोपन्यास एव नाशसंभावना भवति । यच्च किञ्चिद्दृश्यते, तस्य च क्रियया व्यापारेणापनयनं नाम ह्यन्यत्राभिनिवेशनं भवति नाशस्वरूपम्, प्रसक्तस्यादर्शनं नाश इति ब्रह्मसूत्रात् । अत्रापि नाश्यनाशकनाशनानि तदुपयोगश्चेति चतुष्टयम् । यो ह्येकस्मिन्नेव काले तिष्ठति, तस्य न तत्र भवः सार्वकालिकः, किन्तु सर्वत्र सर्वस्य विद्यमानत्वेन, सर्वत्र च सर्वप्रयोजनसत्त्वेन च सर्वप्रगमनव्यवहारः । क्रिया च कर्मेति स्पष्टं व्याख्यानात्, आत्मसंयोगेनैव सर्वथा कर्म भवतीति विज्ञेयम् । यदा त्वेकस्मिन्नियतस्थाने पदार्थानां स्थितिर्मन्तव्या, तदा हि कर्ममात्रफलस्य वैयर्थ्यं स्पष्टमेव । यद्यप्येकस्मिन्नप्यनेककर्मणां संभवः, तथापि तस्य सार्वत्रिकत्वे दोष एवेति निश्चयः, नायमात्मा चैकत्रस्थः, न चायमेकबद्ध इति वचनात् । अतो ह्यस्य कार्यमपि, नैकस्थम्, नैककालिकम्, न चैकबद्धमिति परिभावनया हि सिद्धम् । एवमेव तत्क्रियायाः पञ्च प्रकाराश्चेत्थं भवन्ति—उत्क्षेपणाऽपक्षेपणकुंचनप्रसारणगमनानीति । इदञ्च वैशेषिके स्पष्टमुक्तं भवति । कर्मणोऽनात्म-

त्वादनात्म्यैक्यविरोधाच्च पञ्चत्वं सूचितम् । तत्र च गमनमेव मुख्यम्, द्वितीयं प्रसारणम्, तृतीयं कुंचनं च भवति । एतत्त्रितयं च तादृशमकारोकारमकारपरं वेद्यम् । अत एव—

“ गमनाद्भासते चात्मा सर्वसंस्थः सनातनः ।
प्रसारणाच्च विज्ञेयः स चोकारो जगन्मयः ॥
कुञ्चनाच्च मकारस्थः तयोः संबन्धरूपकः ।
त्रितयं कर्म चेदं स्यादहमेतन्न संयुतम् ॥
तज्ज्ञानेच्छाक्रियाभिश्च युक्तं स्यात्त्रितयात्मकम् । ”

इत्यादि प्रवचनम् । तस्माज्ज्ञानेच्छाक्रियानुरोधेन क्रियायामप्येतत्त्रितयत्वं मान्यम् । एतत्त्रितयसमूहेनैव हि सर्वं भवनम्, तद्व्यापारश्च भवति । सर्वस्मिन्नपि च संसारे यावच्च द्रष्टुमर्हति, तावच्च सर्वथा सर्वकाले सर्वसृष्टिसंभावनायां चैतत्त्रितयस्यैव प्रदर्शनमिति विज्ञेयम् । यथा प्रथमं गमनम्, ततः प्रसारणम्, ततश्च कुञ्चनं चेति । प्रातः सायं चेति विधिनाप्येवमुक्तम्—प्रकर्षेणातः, प्रातः, इति तदर्थः, प्रकाशपरमिदं भवति, प्रकर्षेणातः प्रकाश इति प्रातः, तत्र हि प्रकर्षश्च व्यापारः, प्रकाशागमनमेवेति । यदा च प्रकाशो ह्यागच्छति प्रथमम्, तदागमनकाल एव प्रातः, इति सर्वसंमतं भवति । अत्र च प्रकाशश्च गमनव्यवहारः । ततःपरं प्रकाशप्रसारणम् । तेन सर्वो दिवसश्च भवति, तत्प्रसारणस्यैव कुञ्चनं सायमिति विज्ञेयम् । अत्र प्रकाशश्च नामान्यत्र भासनम्,



तमसश्चाभास एव सायमिति च विज्ञेयम् । सायते चाकृष्यते अनेनेति सायमिति व्युत्पत्तिः । सिय्. विलेषणे इत्यस्माद्धातोस्तत्सिद्धिः । विलेषणमाकर्षणं तदभेदश्च, अभेदार्थेऽनव्ययत्वमस्य भवति । आकर्षणार्थे त्वव्ययत्वमेव । नैतत्पराश्च प्रथमादयो भिन्नविभक्तयः । सायमित्याकर्षणार्थे सर्वथैवोपन्यस्तं भवति । सिय्. धातोः यकारानुबन्धे तदिकारैकारे च कृते तमोवाचकत्वात्, अणामच्प्रत्ययान्तरत्वाच्च मकारान्तमव्ययमिदं भवति ; प्रत्ययान्तमिति बीजात्सायमिति च । आकर्षणं च सर्वस्यैकीकरणमेवेति सिद्धान्तः । प्रसारणमेवाकर्षणं तदेव कुञ्चनं भवति । तत्र च यत्प्रकाशप्रसारणम्, प्रसारितानां च प्रकाशानामन्यत्र गमनं भवति । तच्छक्तेराकर्षणमेव सायं भवति । तत्र च प्रकाशागमनकाल एव प्रातः, तमसश्चागमनकाल एव सायं च भवति। पुनस्तमसः प्रसारणं च रात्रिर्भवति । अत एव दिवारात्रिनिर्णये तु प्रकाशस्तमश्च मूलं भवति । अत्रैवं व्याख्यानम्—अर्धरात्रादूर्ध्वमन्यदिवसारंभः, प्राक्सूर्योदयादन्यदिवसारंभश्च वा भवतीति अंशे चास्मिन् सर्वनिर्णेतृणां कालविभागदृष्ट्यैव निर्णयः । प्रकाशगमनकाल एवान्यदिवसारंभः । आरंभस्य प्रकाशपरत्वात्, प्रकाशस्य च तमसो ह्यावश्यकत्वाच्च, प्रकाशप्रसारणम्, तमसश्चागमनम् । पुनस्तत्प्रसारणमेव दिवस इति प्रशस्तम् ।

यद्यप्येवं महामन्वन्तरविधिना तिथ्यादीनां वृद्धिक्षयव्यवहारो भवति, एकस्मिन्दिवसेऽपि तिथीनां द्वयस्य त्रयस्य च वर्तनम्, एवं

नक्षत्राणामपि; तथापि दिवामात्रे नैव भेदः । अहन्तु तादृशः सततक्रमेण भवत्येव । एवं पक्षो मासः वर्षश्च तादृशो भवति । तदेवं बीजेन दिवारात्रिसमाहारस्यैवैकादिवसत्वमुच्यते । तत्र प्रकाशागमनकाले चैवान्यदिवसारंभ इति व्याख्यानैश्च स्पष्टमुक्तं भवति । यद्यपि प्रागर्धरात्रादपरदिवसोऽपीत्याद्युक्तिः, तथापि तद्व्याख्यानपरं बोध्यम्। अर्धरात्रात्प्रागपरादिवसः, दिवसो नामाद्यतनम्, ततो रात्रिरद्यतनं भवतीति बोध्यम् । सकलो दिवसः यामद्वया रात्रिश्च मिळित्वाऽद्यतनो भवति । तदुक्तम्, अतीताया रात्रेः यामद्वयादर्वाक्, यावदागामिन्या रात्रेश्च यामद्वयं दिवसः सकलः, सोऽद्यतन इति कालनिर्णयात् । अतीता या रात्रिः तस्याश्च यामद्वयमूर्ध्वपरम्, पुनर्दिवसश्च सकलः, आगामिन्या रात्रेर्यामद्वयं चाद्यतनपरं प्रहराष्टकं बोध्यम् । अत एव यामद्वयः सरात्रिकश्च दिवसोऽद्यतनमिति ज्यौतिषे स्पष्टमुक्तम् । इदं चात्र व्याख्यानम्, यामद्वयशब्दस्य दिवसात्पूर्वमुत्तरं चावत्यैव बोधः, तदावर्तनं तु तत्पूर्वाधिकारानुरोधेन भवत्येवेति । अस्यैवापरदिवस इति संज्ञा भवति । इयं च शिल्पादिव्यवहारे नियुक्ता । अत एव शिल्पिनः सर्वे चैवं मन्यन्ते—रात्रेश्चार्वाक्प्रहरद्वयेन सर्वदिवसस्य च आगमिन्या रात्रेः प्रहरद्वयेन स्वकार्यस्यारंभावसाने क्रियेते, तेन प्रागर्द्धरात्रेरपरदिवस इति तत्प्रवचनम् । अत एव सर्वस्मिन्निति-हासे चैवं व्याख्यानम्—अपरदिवसं गच्छन्सन्नेवं भवतीति,



अन्यथा तु कार्यमात्रे प्रकाशागमनकालेनैव दिवसारंभः, तद्गमनकालेनैव समाप्तिरिति च । यत्र च समाप्तिस्तस्मादेवारंभ इति सर्वत्र प्रसिद्धम् । तत्र चैवं भावः—यच्च पूर्वमारब्धं तत्समाप्तौ न तस्यारंभ इति । यदि चैतत्कार्यस्यैव पुनरारंभः, तदा तस्यान्यत्वेन प्रवचनम् । तस्य नाम कार्यस्य तदनुकूलव्यवसायसमाप्तिरेव, न तु तत्कार्यमात्रस्येति, कार्यस्य त्वनाद्यनन्तत्वं सर्वथारंभावसानपरत्वं च बोध्यम् । बीजेनानेनैव पुनःपुनर्दिवारात्रिश्च भवति । तदनुरोधेन चातीतमनतीतं भवति कालपरिमाणम् । तत्र प्रकाशतमसो रनाद्यनन्तत्वात्तत्कालस्यानाद्यनन्तत्वाच्च नित्यः प्रळयो नित्यसृष्टिरिति च व्याख्यानफलम् । अत एव सृष्टेरारंभावसाने, प्रळयस्य चारंभावसाने, इत्याद्युक्तिः । आरंभावसानयोर्नित्यसंबन्धित्वादात्मनो नित्यत्वेन तयोर्नित्यत्वाच्चाहमेतन्नाभियोगेन, एकस्यावसाने चैकस्यारंभः, तदेकस्यावसानमिति व्यवहारेण च संसारो भवति । गमनमेव च प्रसारणम्, तदेव कुञ्चनम्, कुंचितानामेव हि प्रसारणमिति वैशेषिकाभिमतेन च सर्वत्र सर्वस्वमेवं बोध्यं भवति । इदमेवाद्यन्तफलं भवति । बीजेनानेनैवाद्यन्तमनाद्यनन्तान्तर्गतं प्रसिद्धम् । यौ चाद्यन्तौ, तौ चानाद्यनन्तस्योपस्थापकौ भवतः । आद्यन्तेनैवानाद्यनन्तमिति व्याख्यातम् । इदं चानुमानपरम् । यस्य चेमावाद्यन्तौ, स स्वयमनाद्यनन्त इति च तद्बीजम् । तस्मादाद्यन्तयोर्नित्यसंबन्धः । आद्यन्तप्रभवनमात्रं चानाद्यनन्तम् । अत एव जगदिदमनन्तमनादि

साद्यन्तं च प्रतीयमानम्, इति वेदोक्तिः। तदेवं भावेन प्रकाशस्यानन्तरं तमसो ह्यारंभः, तमसो ह्यनन्तरं च प्रकाशारंभ इति बीजेन प्रकाशतमस्सहितस्यैवैकत्वं बोध्यम्। अत एवोत्पत्तिस्थितिविनाशानां त्रयाणामेकत्वमुक्तं भवति। त्रितयं तु मिळित्वा सृष्टिरेका भवतीति सर्वसंमतम्। न च केवलमुत्पत्तिमात्रस्य स्थितिमात्रस्य विनाशमात्रस्य च सृष्टित्वेन प्रवचनम्। यः सृज्यते स एव सृष्टिरिति तदर्थः, सर्जनं सृष्टिरिति वा। सर्जनं स्वभावः स हि भवनव्यापारः, स चावश्यकः, आवश्यकता च त्रितयपरा बोध्या। तस्मात्त्रितयस्य सृष्टित्वेन प्रवचनम्। अत एव—अस्यां हि सृष्टौ चेत्थम्, अन्यस्यां चेत्थम्, इति सृष्टिप्रवचनेनेतिहासेन बोध्यम्। सृष्ट्यन्तरे यादृशी जीवावस्था, यादृशश्चाहमंशः, यादृशश्चैतदंशः, न तादृशश्चास्यां सृष्टौ भवति, न च सावस्था इत्यादिनियमेन सार्वत्रिकः सार्वकालिकश्च भेदो बोध्यः। एकस्मिंश्च ब्रह्माण्डेऽप्येवं भावोऽनेकप्रकारिकाश्च सृष्टयः संभवन्ति। एवं ब्रह्माण्डेप्यवस्था विप्रतिपन्ना भवति। यथा यथा कार्यानुरोधिनी शक्तिर्विवर्धते, तथैव हि सर्वरूपत्वमतीततां च प्राप्नोति। तत्र प्राप्तौ सत्यां पुनस्तादृशमणुत्वं महत्वं चोपन्यस्तं भवति। तदणुत्वमहत्वव्यापारस्तु परो ह्यनन्तो भवति। अयमात्मा तु कालादिभ्यो विभिन्नः। अतस्तत्कार्यं सर्वं विभिन्नमिति व्याख्यानैश्च स्पष्टमुक्तं भवति। यदि चात्मनो भिन्नस्यापि कस्य चिदस्तित्वम्, तदा तेन समावर्तनमतःपरं नास्त्यतःपरमस्तीति वक्तुमुचितम्।



अत्र च यस्य सर्वरूपत्वेन प्रवचनम्, सोऽप्यात्मैव, तदात्मव्यवहारेणैव सर्वस्यापि तादृशत्वमिति बीजात्। सर्वथा महत्वं लघुत्वं चानन्तकालत्वेनानन्तक्रमत्वेन च भवत्येवेति विज्ञेयम्। न तत्र शोकहर्षौ व्यवस्थितौ। अतश्च न स्वात्मानं लघुं महान्तं वेति मन्यतामिति तत्फलम्, यश्च स्वात्मानं लघुत्वेन मन्यते, तस्यैव शोकहर्षौ। हेति, अहं च लघुः, स च महान् इति शोकस्वरूपम्। सोऽप्येवं भवति, ततोऽन्यो महानिति बीजात्। यदा चेत्स्वात्मनः पूर्वमपि पश्यति—अस्मादस्मादित्थमित्थमहं महानिति, तद्धर्षस्वरूपं भवति, ततःपरं शोकस्वरूपमिति च। अयमेव बन्धः। अत एव—

"हर्षशोकौ समाबद्धौ ह्यात्मानात्मपरावरौ।
द्वयं त्यक्त्वा द्वयं त्यक्त्वा मुक्तो भूत्वा सुखी भव॥"

इत्याद्युक्तिः। अत्र चैवमुपदेशः। यदिदं लघुत्वं महत्वं त्वं परिभावयसि, तत्परित्यजेति। आत्ममयं सर्वमिति मन्यताम्। अतश्च—

"न चैवात्र लघुः कश्चिन्न महान् सर्ववानिति।
अहमेकश्च नित्यः स्वरूपं प्रणवगोचरम्॥"

इति मुक्तिस्वरूपमुक्तम्। यद्यपि लघुत्वं महत्वं च व्यापारस्यानिवर्तनमेव, तस्यास्तित्वात्; तथाप्यनियतत्वादतीतत्वादनन्तत्वाच्च न बुध्यते इत्युपदिश्यते। यदि चेदेवं भावोऽस्ति—सत्यस्मिन्महत्वं

सत्यस्मिन्लघुत्वं सत्यस्मिन्निवर्तनं सत्यस्मिन्महानिति च, तर्हि तदर्थं यत्नः समुचितो भवति । यस्मिंश्च कालातीतेऽनतीते ततः परेऽपरे वा गच्छन्सन् न प्राप्तिरिति, तत्र को दोषः । अत एवात्र विधिः—"यत्ने कृते यदि न सिध्यति कोऽत्र दोषः" इति । अस्यायं भावः—यच्च ह्येवमस्ति यत्नेनाप्यसाध्यम्, तर्हि न कस्यचिद्दोषः । स तु दोषाद्विभिन्न एव । तत्र यत्नकरणमेव, तदेव तद्दोष इति तद्भावेनोपसिध्यति । तस्माल्लघुत्वं महत्वं च त्याज्यं भवति । सर्वथैवोङ्कारस्वरूपो ह्यात्मा क्रमपरो वेदितव्यो भवति । तदेवं भावेनाद्यन्तमनाद्यनन्तामारंभावसाने च सर्वं वेद्यं भवति । अत एवेयमुक्तिः—

"नैवारंभे सुखं विद्यान्नावसाने च दोषधीः ।
सर्वथात्मा निरस्तोऽयं सर्वगः सार्वकालिकः ॥
सर्वदेशसमुत्पन्नः सर्वस्थश्च सनातनः ।
देशकालौ तदुत्पन्नौ क्रियाप्येवं हि संभवेत् ॥
सर्वभिन्नं स्वयं भिन्नं सर्वं शक्यं सनातनम् ।
सर्वभावे समभवं सर्वनाशे विनाशनम् ॥
स्वयं नाशः स्वयं सर्वं स्वयं सर्वत्र सर्वतः ।
सर्वस्वः सर्वतः सर्वः सर्वगः सर्वसंभवः ॥
स्वयमात्मा स्वयं चात्मा स्वयमात्मा परावरः ।
ओमित्येकः स्वयंभूश्च नाहं नाहं न चैतदम् ॥"



इति । एवमेव—

"आरंभो जायते यस्य तत्समाप्तिरपीप्सिता ।
समाप्त्या पुनरारंभो विधिरेष सनातनः ॥
आद्यन्तौ यौ समाख्यातौ तावनाद्यन्तसंयुतौ ।
तौ परस्परसंभूतौ महामायानुसारिणौ ॥"

इत्यादि प्रवचनम् । तस्मान्महदावश्यकतानियमेनारंभावसाने तथा कुंचनप्रसारणे वेदितव्ये । इदं च सर्वं गमनपरमेवेति विज्ञेयम् । गच्छतीति गमनम्, सर्वं च सर्वथा सर्वदा गच्छत्येवेति बीजेन गमनमेव संसारः । यद्यप्यत्र विधानद्वयम्, गमनमागमनं चेति, तथापि परश्च तत्क्रमो ह्यवस्थापर एवेति विज्ञेयम् । परं तु गमनमात्रं त्वनवस्थापरं भवति, यच्च गमनं तदेवागमनम् । अन्यदृष्ट्या यदागमनम्, तदागन्तुर्गमनफलमेवेति, यच्चागन्तुर्गमनं तदेवान्यस्यानागमनमिति च विज्ञेयम् । सर्वं चैतदावश्यकपरं भवति । अनागमनं च तस्यैव, यस्य यत्रावश्यकता नास्ति, स तत्र न गच्छतीति भावात् । पुनश्च तत्र स्थितेरावश्यकतानुरोधेन, तदनागमनजन्यश्च शोकः—हेति, मदीयमिदमावश्यकं तेनैव साध्यम्, स च नागच्छतीत्यस्मिन्नंशे कारणादिपरिभावनमेव तच्छोकस्वरूपं भवति । यत्र च यादृशी ह्यावश्यकता, तादृश्येव तत्र परिभावना । आगच्छति चेत्तदा गच्छति, किं तस्यागमनेनानागमनेन च, स्यादेतत्, भाव्यमिह भवत्येव, इति लोकप्रवचनम् । एतच्चैकदेश-

परम्। इदमेव हि परमं च कर्मणां तत्वं ब्रह्मज्ञानपरायणं भवति। मोक्षे सत्यप्येवं विचारो भवति मुक्तलक्षणः—आगन्ता चागच्छति, गन्ता च गच्छति, किमस्माकम्, भाव्यं भवत्येवेति। यथा वा आवश्यकता, तथैव भवति। सर्वमिति तत्स्वरूपम्। इदं चात्र सूचितं भवति। मुक्तिमांश्च पुरुषस्त्वेवं विचारयति—

"कस्य चागमनं लोके कस्य नागमनं तथा।
भाव्यं भवति सर्वत्र गच्छत्यागच्छतीति न॥"

इति। एवं मुक्तस्वरूपं कर्माधिष्ठितं भवति। आवश्यकद्वयस्यैकत्वमेव संबन्धकरणम्। अयमेव योगः। अयमपि गमनागमनफल एवेति विज्ञेयम्, तस्मादेव शुभाशुभागमनमिति च। यत्र यत्र यस्य यस्य चावश्यकतानुरोधेन नामैकावश्यकतया प्रगमनं भवति, तत्र तत्र तस्य तदेकत्वभावेन शुभरूपत्वम्, द्वित्वभावेन चाशुभरूपत्वम्, शुभैक्यविरुद्धं ह्यशुभमिति व्याख्यानात्। तस्माद्गमनमनागमनं प्रगमनं चेति त्रितयं भवति। अनागमनं तु क्रियापरमावश्यकमुकारनिष्ठम्, गमनं च ज्ञानपरमात्मनिष्ठमकारात्मकम्, प्रगमनमिच्छानिष्ठं सार्वत्रिकं स्वयत्नप्रकर्षपरं तयोः संबन्धरूपं मकारात्मकं च स्वरूपम्। तद्गमनं तु समाहारात्मकं साक्षादोङ्कारनिष्ठं त्रितयात्मकं च भवति। तदेवं बीजेन गमनं कर्म शाश्वतं सार्वत्रिकं च भवति। तस्मात्प्रकाशगमनं तमः,तमोगमनं प्रकाश इति तमःप्रकाशयोरेकत्वं विज्ञेयम्। यच्च द्वयोर्गमनमागमनम्—अत्र प्रकाशागमनम्, तत्र तमसश्चागमनमिति, तच्चैककालिकम्। अस्मात्प्रकाशो गच्छति, तस्मात्तमो गच्छतीति च समानकालिकम्। एवं द्वयोरागमनमपि। अत्र तमसश्चानागमनमेव प्रकाशागमनम्, तमसश्चागमनमेव प्रकाशानागमनमिति स्थानमात्रे भेदः, न च तदवस्थायाम्। प्रकाशतमसोः सूत्रवत्वं च सर्वथा भवति, तद्दृष्ट्या प्रकाशेऽपि तमः, तमस्यपि प्रकाश इति तद्व्यवहारेण स्थानभेदोऽपि न वक्तुमुचितो भवति। तस्मात्तयोरेकत्वं पृथक्त्वं च, तथा गमनमागमनमनागमनं चैककालिकमेकक्रमपरं च बोध्यम्। अत एव सायं प्रातर्दिवारात्रिश्च सर्वं सार्वत्रिकम्। अत एव—



"सर्वत्र विद्यते रात्रिर्दिवा सर्वत्र विद्यते।
सायं प्रातश्च सर्वत्र सर्वं सर्वत्र विद्यते॥
सर्वं गमनमेव स्यात्प्रकाशतमसि स्थितम्।
अथ चागमनं चैव तथानागमनं ततः॥
गमनं तु प्रगमनं सर्वाण्येतानि च स्वयम्।
एककालानुरोधीनि क्रमो भावेन भासते॥
सर्वत्र विद्यते चात्मा सर्वत्रैतत्प्रयोजनम्।
कार्यकालानुरोधेन भाव्यं भवति सर्वथा॥"

इत्यादि प्रवचनम्। तस्मादेवं भावेन सर्वस्य सर्वत्र गमनं भवत्येव। अत एव—

" सर्वत्र विद्यते चन्द्रः सूर्यः सर्वत्र विद्यते ।
सूर्येऽप्येवं तमोभावश्चन्द्रेऽप्येवं तमो भवः ॥
सूर्ये चन्द्रेऽपि ताद्रूप्यमल्पाधिक्यप्रवर्तकम् ।
अल्पत्वं वर्तते चन्द्रे सूर्ये चाधिक्यमेव च ॥
तमः प्रकाशयोर्योगस्तदारंभावसानकः ।
पक्षौ च नियतौ लोके शुक्लकृष्णौ यथायथम् ॥
साम्यं तमःप्रकाशस्थं सूर्यचंद्राभियोगतः ।
तदभिवर्तनमिदं गमनागमनक्रिया ॥
अनागतं प्रगमनं सर्वमोंकारसंज्ञकम् ।
शुक्लः प्रकाशकालः स्यात्कृष्णः कालस्तमोभवः ॥
तमःप्रकाशयोः साम्यं तदारंभावसानकम् ।
अतः पक्षद्वयं युक्तं मासश्चैकोऽस्ति भावितः ॥
तादृशेनानुभावेन षण्मासाश्चोत्तरायणम् ।
दक्षिणायनमेवं स्यात् षण्मासाश्च परावराः ॥
तदुत्तरायणं शुक्लं कृष्णं वै दक्षिणायनम् ।
एतद्द्वयसमायुक्तो वर्षश्चैको विधीयते ॥
एवं क्रमेण सर्वं स्याद्युगः कल्पस्त्रिवेष्टनः ।
कृते कृते परे भावे ब्रह्माण्डमभिधीयते ॥
एवं जगत्तथा विश्वं महाविश्वं ततः परम् ।
तत्क्रमेणैव संसारो लीयते कालतत्परे ॥



ततः परं परं चैव ह्यपरं चोत्तरं तथा ।
क्रमातीतो ह्ययं कालस्तत्र सर्वं विलीयते ॥

तस्मादारंभकालेन चान्तकालेन सर्वथा ।
एककालमिदं बोध्यं वर्तमानं यथायथम् ॥

क्रमान्तरे क्रमो विद्यात्सर्वं सर्वान्तरे तथा ।
अनवस्थाविधानस्थं तत्र भूतं भविष्यकम् ॥

अनेन नियमेनैव स्मरणादि भवेदिह ।
विस्मरणानुस्मरणं ज्ञानमेवं भवेत्तथा ॥

सर्वातीतमिदं ज्ञानं क्रमस्तत्रैव भासते ।
वर्तमानादिभावेन स्मरणादिप्रभावना ॥

सर्वं चेदं क्रियानिष्ठं प्रकाशात्मतमोयुतम् ।
गमनं चैव सर्वस्य तदोङ्कारपरावरम् ॥

इदं परायणं तत्त्वं सर्वनिष्ठं प्रबोधजम् ।
सनातनं समाध्यस्तं सर्वाभ्यस्तं प्रतिष्ठितम् ॥

अयं च मन्यते योगः योजनं गमनं भवेत् ।
सर्वत्र विद्यते चात्मा सर्वं चात्मनि भाव्यते ॥

सर्वत्रैवं प्रगच्छेच्च गतं पूर्णत्वमाविशेत् ।
व्यष्टिभावो ह्यपूर्णः स्यात्समस्तः सर्वलक्षणः ॥

सर्वं सर्वेण वेद्यं स्यात्सर्वं सर्वत्र सर्वदा ।
परं ब्रह्म जगत्सर्वं जगद्ब्रह्म परं भवेत् ॥"

इत्यादि प्रवचनम् । तदेवं व्यवहारेण गमनमात्रं च सर्वं बोध्यम् । इदमेव ह्यागमनमनागमनं शुभमशुभं सुशोभनं प्रशोभनं क्षोभणं चेति त्रितयत्वफलम् । आवश्यकतानुरोधेनैव शोभनाद्युपयुक्तं भवति । एवं विहिताविहितमप्यावश्यकं सर्वस्यावश्यकतया निश्चये तु न भवति । एवं सर्वं ब्रह्म सनातनमोङ्कारमयं बोध्यम् । गमनमागमनमनागमनं च तमःप्रकाशोदाहरणेन च सार्वत्रिकेण स्पष्टमुक्तं भवति । सायं प्रातर्दिवारात्रिश्चेति नियमेन प्रसारणमपि बोध्यम् । गमने च यो व्यापारः, स एव प्रसरणमिति तद्भावः । प्रसरणं प्रसारणमित्यर्थे च गमनप्रसारणयोरभेद एव । यद्यपि वस्तुतस्त्वभेद एव स्वीकार्यो भवति, तथापि संसारस्य संसरण-रूपविधिना चैक्यविरोधानुष्ठानेन प्रसरणमन्यदिति बोध्यम् । यद्यपि गमनान्तर्गतं प्रसारणमिति वैशेषिकाभिवर्णितम्, तथापि तस्य पृथक्त्वेनैव व्याख्यानौचित्यम्, क्रमानुरोधात्तत्कालस्य प्रवच-नाद्वा तदतीतप्रदेशत्वाच्च । प्रसारणं च गमनानुरोधेन, तद्व्यापार-भूतत्वाच्च पृथक्त्वं बोध्यम् । इत्थं हि प्रसारणम्—यदिदमित्थमस्ति तस्य विस्तरणमिति । यद्यपि यो हि यादृशः, तादृशमेव तद्वि-स्तरणमसंभव इति मीमांसकविधिः, तथाप्यात्मदृष्ट्या प्रत्यगात्मा-नुरोधेन सर्वत्रैक्यविरोधसंभवात्तद्वर्धनमवश्यं भवति । तत्र यदिदं



वर्धनक्षयक्रमस्वभावजमैक्यविरोधपरं च, तदेव प्रसारणमिति विज्ञे-यम्, पदार्थानां विस्तारः प्रसारणमिति वैशेषिकप्रवचनात्, अहमंशैतदंशयोरेकत्वानुभव एव प्रसारणमिति ब्रह्मसूत्राच्च । जीवात्मनश्च यो ह्यनुभवः—एवमित्थमिदमन्यन्न प्रयतितव्यमह-मित्थमित्यादिरूपः अहमेतद्भावानुगतश्च, स एव प्रपञ्चः । प्रपञ्च एव प्रसारणमिति तद्व्याख्यानम् । तस्मिंश्च प्रसारणेऽप्यस्ति भेद-चतुष्टयम्, विप्रसारणं सारणं विसारणं प्रसारणमिति च । विप्रसारणं च ज्ञानपरमात्मनिष्ठमकारात्मकं बोध्यम् । विशेषेण प्रसारणं विप्रसारणमिति विज्ञायते । विशेषेण प्रसारणं नाम क्रियामात्रस्यानुसंधानमेव । अनियतं कार्यावधारणं चेति तत्स्वरू-पम् । सारणं च सामान्यपरमुकारनिष्ठमनन्तरप्रवचनसिद्धं च भवति । विसारणं तु मकारनिष्ठमिच्छापरं वेदितव्यम्, विगतं सारणं विसारणमिति तदर्थात् । आवश्यकमात्र विस्तारात्पत्वं च प्रयुक्तम्, किमनेन यत्नेनेति तत्स्वरूपम् । एवं प्रसारणं तु सर्वथैवोङ्कारस्वरूपं समाहारनिष्ठमेवेति च विज्ञेयम् । तदेवं क्रमेण गमनप्रसारणविधिः । आकुञ्चनं च सर्वाकर्षणमेव । तदुक्तम्—

"गतानां गच्छतां चैव तत्प्रसारणमावृतम् ।
सर्वेषामेकविज्ञानात्समुदायेन तिष्ठति ॥"

इति । कुंच्यते, अनेन सर्वमिति कुञ्चनस्वरूपमभिहितम् । ततश्च कुंचनकार्यं च प्रळय इति स्पष्टमुक्तं भवति । सर्वेषामेक-

त्वभावेन प्रबोधनं नाम सर्वैकीकरणं कुंचनमिति तत्स्वरूपमुक्तं भवति । अत्रापि भेदचतुष्टयं च तादृशम्, प्रकुंचनं विकुंचनमवकुंचनमाकुंचनं चेति । प्रकुंचनं चाकारनिष्ठमतीतैकत्वविशिष्टम् । विकुंचनं च विशेषकुंचनमुकारनिष्ठं नाम परिमितत्वप्रकाशकं च भवति । आकुंचनम्, मकारपरं सर्वान्तर्गतमतीतं सार्वकालिकं सनातनं च भवति । अत एव सर्वकार्यकरणे चोत्साहोऽनुत्साहश्च दृश्यते । यद्यप्यवकुंचनस्वरूपम्, अत्रेदानीं तदानीमपि न, कार्यकरणमात्रे ह्यावश्यकं तदनुरोध्युत्साहं च परित्यज्यापि, द्रष्टव्यमिदं सर्वथैवेत्यालस्यमेव, तथापि प्रसारणादिविधिना भवनव्यापारेण कर्तव्यकरणौचित्यमेवायाति, भाव्यं भवत्येवेति तद्बीजात् । तदकरणं त्वालस्यं भवति । तत्करणसामर्थ्यं च द्वयोरुपस्थितमिति नित्यात्मकार्येणानुमेयम् । अवकुंचनानुरोधेन च सर्वथैवं चिकीर्षा चोपस्थितिमात्रिका भवति । तस्या एव लोके सुखरूपत्वेन प्रवचनम् । अत एव सुखेन शयनं सर्वथा वरं करणादिव्यापारश्चासंबद्ध इति वदन्ति । परं तु तदवकुंचनमात्रे स्थितिरप्यसंभाव्या भवति । यद्यपि सुखेन शयनमिति बुध्या सर्वथा करणमेव भोक्तव्यम्, तथापि प्रसारणाद्युपस्थितेस्तच्छक्तिरेवं प्रेरयति । एतच्छयनौचित्यं दोषप्रयुक्तम् । अत एव शयनं रोगकारणमिति निदानप्रश्लिष्टप्रवचनम् । तस्मादवकुंचनं सर्वत्रोपन्यस्तमेवेति विज्ञेयम् । अत एवात्यन्ततायाः सर्वथा निषेधः, न चिकीर्षा चाद्यन्ता, न वा चिकीर्षा चेति द्वयोः रोगकारणत्वेन प्रवचनम् । अत एवातिशयनादतिजागरणाच्च वातप्रकंपादय इति धान्वन्तरं प्रवचनम् । प्रमेहकारणं शयनमचिकीर्षैवेति संहितासूत्रम् । तस्मादवकुंचनं नोपधार्यतामिति वैद्योपदेशः । तदेवं भावेन त्रितयं विद्यते । चतुर्थं कुंचनं साक्षाद्रूपमोङ्कारपरं प्रसिद्धम् । तत्र चैवं प्रकारेणाहमेतन्नानामनुवर्तनमेतन्महावाक्यान्तर्गतमेव, गमनं प्रसारणं कुंचनमिति च त्रितयं भवति । अहमश्चैतदपेक्षा च गमनम्, एतद्यहमावश्यकता च प्रसारणम्, एतन्नाहमिति कुंचनमेतदोनत्वमहमो नत्वं च कुंचनमिति बीजात्, इति विज्ञेयम् । अहमेतन्नेतीत्येव कर्म प्रबोध्यम् । तत्रैवं विधानम्—अहमेतदित्थमिति गमनम्, एतदहं नेत्थमिति प्रसारणम्, एतन्नाहमित्थं न यथा न तथा इति कुंचनम्, अहमेतन्नास्मीति । तत्त्वव्यवहारश्च कर्मपरः । तत्रैव हि यथा तथाऽन्यथा नेत्थमित्यादिकं सर्वमपि ब्रह्मस्वरूपं बोध्यम् । तदेवं भावेन कर्मत्रितयमकारोकारमकारस्थितं संसारप्रपञ्चरूपं बोध्यम् । अनेनैव सर्वाः सांसारिक्यः क्रिया भवन्ति । वस्तुतस्त्वयमात्मा निरस्त एव सर्वस्मात् । तद्यथा—

"न चायं तमो नैव सम्यक्प्रकाशो
न कालो न देशो न वै पक्षमासौ ।

न कल्पो न वर्षो युगश्च प्रशस्तः
स चैकोऽहमेकस्थभावस्वरूपः ॥
न चैवागमो गम्यते नैव कुत्र
स्वयं चात्र गम्यो न वै यत्र गम्यः ।
समः साधनं सारभूतप्रकाश-
स्तदेकोऽहमेकस्थभावस्वरूपः ॥
न वै कुंचनं कुंचनाख्यप्रदेशो
न वाऽकुंचनं सर्वमूलानुभावम् ।
सदा सत्यमोङ्कारमैमांसिकोऽहं
स चैकोऽहमेकस्थभावस्वरूपः ॥
सदैवाहमात्माऽविभिन्नो विभिन्नः
सदैवानुगम्यो विभावस्वरूपः ।
परो गोचरः कालरूपः प्रशस्तः
स चैकोऽहमेकस्थभावस्वरूपः ॥
न चैषा क्रिया पञ्चभिर्योजनीया
न वै सप्तभिश्चाष्टभिर्योजनीया ।
सदा सर्वदा सांख्यमेकप्रकारं
स चैकोऽहमेकस्थभावस्वरूपः ॥"



इत्यादि प्रवचनम् । तस्मादित्थं भावेनैकत्वनिष्ठं कर्म च त्रितय-मोङ्कारपरं संसारमात्रं विज्ञेयम् । सर्वत्र च गमनप्रसरणकुंचनानि भवन्ति । इदमेव सार्वकालिकं च कर्म सर्वजं सर्वभूतं सर्वस्थं सत्परावरमिति व्याख्यानफलम् ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे क्रियानुगतस्वरूपविचारो नाम त्रयोविंशस्तरङ्गः ।**

ॐ

अथ

# चतुर्विंशस्तरङ्गः ॥

अथ तदित्थं भावेन गमनप्रसारणकुंचनानां क्रियात्वेनैव व्यवहारः । एतत्समूहपरा क्रिया च मूलप्रकृतिस्था भवति । अयमेव बहुत्वप्रकल्पनप्रकारः, एतत्संकल्पानुरोधेनैव प्रत्यण्वप्येवं परिभाव्यम् । सर्वत्र बाहुल्येनैव प्रयोगः दृश्यते । अत एव—

"यद्यप्येवं जगत्सत्ता चैकैव परिभाव्यते ।
तथाप्यणूनामेवं स्याद्बहूनामपि भावना ॥
एवं सङ्कल्पसंसिद्धं प्रतिकार्यं प्रवर्तते ।
तद्बहुत्वानुरोधेन सर्वातीतमगोचरम् ॥

भेदान्तरे भवेद्भेदो भेदस्तत्रापि तादृशः ।
वस्तुतस्तु द्वयोर्भिन्नो भेदेऽभेदः प्रकाशते ॥
एतज्जगत्समष्टिस्थं व्यष्टिस्थं तद्विशेषणम् ।
आत्मानात्मनिषेधस्थं सत्यस्थं सर्वभेदजम् ॥
अत्रैवं गमनं विद्धि विद्धि चात्र प्रसारणम् ।
कुंचनं चात्र विध्येवं त्रयं कर्मावृतं सदा ॥
गमनं प्रसारणं च कुंचनं त्रितयात्मकम् ।
कर्तुश्चैवेप्सिततमं परं योगेन लक्ष्यते ॥
तदोङ्कारपरं सर्वं महावाक्यानुवेष्टितम् ।
अहं कर्म ह्यहं कर्म कर्माहं चैतदुत्तरम् ॥
अहं देशो ह्यहं देशो ह्यहं कालो विभाव्यते ।
नकारोऽहं मकारोऽहं नित्यमेव नमो नमः ॥"

इत्यादि प्रवचनम् । तदेवं भावेन कर्ममात्रं वेदितव्यम् । अत्र च क्रियायामपि तस्यां चत्वारो भेदाः, क्रिया प्रतिक्रियोपक्रिया विक्रिया चेति भवन्ति । तत्र ह्यात्माकारात्मिका क्रिया, प्रतिक्रिया ह्युकारनिष्ठा चानात्मिका, विक्रिया च मकारात्मिका निषेधपरा, उपक्रिया समाहारपरा चेति भवन्ति । क्रियाया एव क्रियान्तरं प्रतिक्रिया । प्रतिक्रियायां सर्वाविर्भावश्च क्रियासदृश इति बुध्यते । प्रथमस्वरूपिणी क्रिया, तत्स्वरूपान्तर्वर्त्तिनी च प्रतिक्रिया इति व्याख्यानम् । क्रियाप्रतिक्रिययोर्विनाश एव विक्रियेत्यवगम्यते,



विगता क्रिया इति तदर्थात् । सत्यां च विगतायां क्रियायां प्रतिक्रियायाश्चाप्यनुपस्थितिः । यद्यपि क्रियायास्त्वनिवर्तनमुक्तम्, तथापि कार्यकालव्यवहारेणारंभावसाननियमेन च विगतत्वं विनाश इत्युक्तम् । यच्च किञ्चित्प्रकाशते, तत्प्रकाशावश्यकत्वेन तादृश्येव क्रिया ह्यात्मानात्मविधिना सर्वसिद्धा भवति । तस्मादेव क्रिया प्रतिक्रिया विन्यास इति विज्ञेयम् । एवं विक्रियापि । उपक्रिया च चतुर्थी समाहारानुवर्तिनी सर्वसमीपवर्त्तिनी च भवति, उप समीपे करणमिति तदर्थात् । सामीप्यं च सर्वथा सर्वदा सर्वैस्सह संभवत्येव । तस्मादान्तर्यदृष्ट्या समानविधिना चोपक्रियैव सर्वमिति व्याख्यानफलम् । तस्मात्सर्वं च विचार्य क्रियायाः प्रधारणमित्युपदिश्यते । अत एव—

" क्रिया प्रतिक्रिया चैवं विक्रियोपक्रिया तथा ।
एवं चतुर्विधां विद्धि चोमित्येकाक्षरावृताम् ॥
एतदेवाभिधानेन स्याद्बहुत्वस्य साधनम् ।
क्रियामात्रं च यत्किंचित्तत्स्वरूपानुवर्तनम् ॥
प्रतिक्रिया भवेदेवं तदारंभः पुनः पुनः ।
द्वयोर्विकारमापन्नं विक्रियात्वं विशिष्यते ॥
तत्समाहारसंसिद्धा जायमाना ह्युपक्रिया ।"

इत्यादि प्रवचनम् । ततश्चेत्थं चतुर्विधं क्रिया प्रतिक्रियादिकं भवति । अत्र च द्वित्वक्रमसूचिते वास्तवपक्षे शब्दद्वयमेव क्रिया-

प्रतिक्रिया चेति विज्ञायते। विक्रिया तु तयोर्मध्यवर्तिनी मकारनिष्ठा चावाच्या भवति। तदेवंविधानेन चैतच्चतुर्विधं संसरणं तद्व्यवहारश्चाणूनां प्रत्येकमप्यभिवेष्टितं भवति। यद्यपि ज्ञानाद्यारोपेऽपि प्रतिज्ञानादिकं च वक्तुमुचितम्, तच्छब्दस्य विद्यमानत्वेन तदनुपयुक्तमेव; तथापि ज्ञानादिप्रवाचकश्च शब्दस्तादृशस्तत्समो ह्यभिवर्तते सदसदित्यादिरूपः। क्रियायामेव ह्युपसर्गेण प्रवचनम्, क्रिया तु साक्षात्संसर्गसिद्धा स्वयं कर्मरूपा च भवति। यद्यपि ज्ञानादीनामपि तादृशं च साधनमुद्भवति, तथाप्यात्मनिष्ठत्वात्सर्वस्य स्वातन्त्र्यमेव। यद्यप्यात्मना सहानात्मकार्येण क्रिया भवतीति स्पष्टम्, तथापि तन्निर्देशे नैतत्क्षतिरिति परिभाव्यम्। योऽयमात्मा स च निर्भिन्नः सनातनः, यश्चायमनात्मा सत्वन्याश्रितश्च भवति। सत्यप्यैक्ये साध्यसाधकभावेन द्वित्वमवयवाऽवयविभूतं व्यवस्थितम्। तस्मात्तत्प्रवचनमपि तादृशमिति व्यवस्थितम्। एतच्चतुर्णां संपादनन्तु महावाक्यपरं विज्ञेयम्। अहमेतदित्थमिति क्रियास्वरूपम्। अत्रैवं व्याख्यानम्—अहम्यन्तरहम्, एतदन्तश्चैतत्, एवं नान्तर्नेति। अत्र चाहम्यहमिति संभवात्, तदहमैक्यविरोधः। नाम योऽहमेकः स न, किं तु तत्राप्येकोऽन्योऽहमिति, तदैवैतत्। एवमेतद्यपि चैतदिति व्याख्यानतया द्वितीयं चैतत्तदेवेत्थमिति भवति। यथा चैवं प्रश्नो भवति—अहम्यन्तर्गतमहम्, कथं तदुत्तरमित्थमिति वेद, परिचर्ययाहमे-



तदित्थमिति क्रियास्वरूपमिति। प्रतिक्रिया त्वहमित्थमेतदित्थमिति। यथायथमेवं प्रश्नः—कथमहम्, तदहमि पुनरहं कथमिति च। तदुत्तरं च—अहमित्थमात्मत्वात्सार्वत्रिकत्वात्सर्वत्र विद्यमानत्वाच्च, अहमि सर्वं सर्वस्मिन्नहमिति। नाहं सर्वस्माद्भिन्न इति वा। एवं पक्षे चाहमित्थमिति च सूचितम्। अहम्यन्तर्गतस्याहमो भावः। पुनरेतदित्थमिति तद्द्वितीयाहम्यन्तर्गतस्याहमोभावः। एवमहम्यन्तर्गतोऽहं तदन्तर्गतोऽहं तत्परान्तर्गतोऽहमित्यादिभावेनानेकाहमो योगेन च संसार इति संसिद्धौ सत्यामहमश्चानवस्था भवति। अनवस्थैव प्रतिक्रियेति तद्भावः तस्मादहमित्थमेतदित्थमिति प्रतिक्रिया भवति। विक्रियात्वेवम्—अहमेतदित्थं नेति। दृश्यताम्—यस्यामवस्थायां यश्च प्राप्नोति, सा चावस्था तदर्थं प्रसह्या भवतीति। तस्यां नामावस्थायां संपूर्णं सुखं नोपमन्यते, किं त्वन्यावस्थायाश्चाकांक्षैव सर्वथेति लोभस्य प्रदर्शनेन तदवस्थाया विनाशो बोध्यः। इत्थमित्यस्य त्ववस्थैव स्वरूपमिति सर्वत्राख्यातम्। अहं चेत्थमस्मीति वाक्येन चेदमेव सूचितं भवति, एषैवावस्था भवतीति। तस्मादहमित्थमेतदित्थं च नास्तीति विक्रियास्वरूपमभिहितं भवति। उपक्रिया चैवम्—अस्म्यहमेतदिति, नेत्थं न तथा न यथा नान्यथा चेत्युपक्रियास्वरूपमिति। अत एव ज्ञानिनश्चैवं वदन्ति—यस्यां कस्यां चिदवस्थायां स्थितिः, तस्यामेव स्थीयतां किमनेन, येन तेन वा भाव्यानुसारिणा स्वकार्यप्रबन्धस्य निर्वाहस्तु भवत्येव,

प्रतिक्रिया चेति विज्ञायते। विक्रिया तु तयोर्मध्यवर्तिनी मकारनिष्ठा चावाच्या भवति। तदेवंविधानेन चैतच्चतुर्विधं संसरणं तद्व्यवहारश्चाणूनां प्रत्येकमप्यभिवेष्टितं भवति। यद्यपि ज्ञानाद्यारोपेऽपि प्रतिज्ञानादिकं च वक्तुमुचितम्, तच्छब्दस्य विद्यमानत्वेन तदनुपयुक्तमेव; तथापि ज्ञानादिप्रवाचकश्च शब्दस्तादृशस्तत्समो ह्यभिवर्तते सदसदित्यादिरूपः। क्रियायामेव ह्युपसर्गेण प्रवचनम्, क्रिया तु साक्षात्संसर्गसिद्धा स्वयं कर्मरूपा च भवति। यद्यपि ज्ञानादीनामपि तादृशं च साधनमुद्भवति, तथाप्यात्मनिष्ठत्वात्सर्वस्य स्वातन्त्र्यमेव। यद्यप्यात्मना सहानात्मकार्येण क्रिया भवतीति स्पष्टम्, तथापि तन्निर्देशे नैतत्क्षतिरिति परिभाव्यम्। योऽयमात्मा स च निर्भिन्नः सनातनः, यश्चायमनात्मा सत्वन्याश्रितश्च भवति। सत्यप्यैक्ये साध्यसाधकभावेन द्वित्वमवयवाऽवयविभूतं व्यवस्थितम्। तस्मात्तत्प्रवचनमपि तादृशमिति व्यवस्थितम्। एतच्चतुर्णां संपादनन्तु महावाक्यपरं विज्ञेयम्। अहमेतदित्थमिति क्रियास्वरूपम्। अत्रैवं व्याख्यानम्—अहम्यन्तरहम्, एतदन्तश्चैतत्, एवं नान्तर्नेति। अत्र चाहम्यहमिति संभवात्, तदहमैक्यविरोधः। नाम योऽहमेकः स न, किं तु तत्राप्येकोऽन्योऽहमिति, तदैवैतत्। एवमेतद्यपि चैतदिति व्याख्यानतया द्वितीयं चैतत्तदेवेत्थमिति भवति। यथा चैवं प्रश्नो भवति—अहम्यन्तर्गतमहम्, कथं तदुत्तरमित्थमिति वेद, परिचर्ययाहमे-



तदित्थमिति क्रियास्वरूपमिति। प्रतिक्रिया त्वहमित्थमेतदित्थमिति। यथायथमेवं प्रश्नः—कथमहम्, तदहमि पुनरहं कथमिति च। तदुत्तरं च—अहमित्थमात्मत्वात्सार्वत्रिकत्वात्सर्वत्र विद्यमानत्वाच्च, अहमि सर्वं सर्वस्मिन्नहमिति। नाहं सर्वस्माद्भिन्न इति वा। एवं पक्षे चाहमित्थमिति च सूचितम्। अहम्यन्तर्गतस्याहमो भावः। पुनरेतदित्थमिति तद्द्वितीयाहम्यन्तर्गतस्याहमोभावः। एवमहम्यन्तर्गतोऽहं तदन्तर्गतोऽहं तत्परान्तर्गतोऽहमित्यादिभावेनानेकाहमो योगेन च संसार इति संसिद्धौ सत्यामहमश्चानवस्था भवति। अनवस्थैव प्रतिक्रियेति तद्भावः तस्मादहमित्थमेतदित्थमिति प्रतिक्रिया भवति। विक्रियात्वेवम्—अहमेतदित्थं नेति। दृश्यताम्—यस्यामवस्थायां यश्च प्राप्नोति, सा चावस्था तदर्थं प्रसह्या भवतीति। तस्यां नामावस्थायां संपूर्णं सुखं नोपमन्यते, किं त्वन्यावस्थायाश्चाकांक्षैव सर्वथेति लोभस्य प्रदर्शनेन तदवस्थाया विनाशो बोध्यः। इत्थमित्यस्य त्ववस्थैव स्वरूपमिति सर्वत्राख्यातम्। अहं चेत्थमस्मीति वाक्येन चेदमेव सूचितं भवति, एषैवावस्था भवतीति। तस्मादहमित्थमेतदित्थं च नास्तीति विक्रियास्वरूपमभिहितं भवति। उपक्रिया चैवम्—अस्म्यहमेतदिति, नेत्थं न तथा न यथा नान्यथा चेत्युपक्रियास्वरूपमिति। अत एव ज्ञानिनश्चैवं वदन्ति—यस्यां कस्यां चिदवस्थायां स्थितिः, तस्यामेव स्थीयतां किमनेन, येन तेन वा भाव्यानुसारिणा स्वकार्यप्रबन्धस्य निर्वाहस्तु भवत्येव,

किं फलमन्यथा श्रमेणेति । यद्यपि भाव्यानुसार्येव श्रमो भवति, तर्हि तद्व्यर्थमिदं वचनं भवति; तथापि तत्परिश्रमव्यवहारेण चैवं प्रवचनं समुचितं भवति । ज्ञानिनामप्यनन्तेऽतीते च श्रमो भवत्येव, सर्वस्यातीतत्वात्, सर्वस्यानन्तत्वाद्वा । अत्र च सर्वेऽपि सर्वज्ञाः सर्वेऽप्यल्पज्ञाश्च भवन्ति । यस्यां चावस्थायां येन यश्च प्राप्तः, तदवस्थातः पूर्वावस्थानां सर्वज्ञत्वं तस्य सर्वथा सिद्धम् । तत्परावस्थानां त्वल्पज्ञत्वं च नामाज्ञत्वेन व्यवस्थितम् । इदमेव भवति योगफलम् । अत्र च योगिनामप्यल्पज्ञत्वेन प्रवचनम् । ज्ञानस्यानन्तत्वात्तज्ज्ञानस्यासंभवाच्च, तादृशमेव सर्वत्र व्यवस्थितं भवति । तस्मात्समाहारे त्वेवं संभवो विज्ञेयः । उपक्रियायां सर्वसाम्यात्, पृथक्त्वादिव्यवहाराच्च तदेवं प्रवचनम् । तदनुरोध्येव सर्वमिति व्यवस्थितं भवति । अत एव—

“ क्रिया त्याज्या यथायोग्यं त्याज्या चैषा प्रतिक्रिया ।
विक्रिया चापि संत्याज्या समाहारे प्रविश्यताम् ॥
यावस्था लभ्यते भाव्यात्तस्यां सम्यग्व्यवस्थितिः ।
मन्यतां परमं सौख्यं सर्वभिन्नविनिश्चितम् ॥ ”

इत्यादि प्रवचनम् । तस्मादेवं विधानेन च चतुर्णां स्वरूपं समुपन्यस्तं भवति । अथवा त्वयमात्मा चतुर्भ्यो भिन्नः सर्वभिन्नस्वरूपश्च भवति । यथा—



“ क्रियाविक्रियाभ्यां विभिन्नोऽयमात्मा
न वै तद्विधानं प्रधानं समेयम् ।
न चोपक्रियो वा प्रतिष्ठक्रियो वा
सदा सर्वदैवं नमोऽहं स्वरूपम् ॥
न चेत्थं यथा वा तथा चान्यथा वा
न चायं न चैवं न वै तत्प्रतिष्ठः ।
स्वयं सर्वजः सर्वमूलाभियुक्तो
नमोऽहं नमोऽहं नमोऽहं स्वरूपम् ॥
न चारब्धसिद्धो न वै सञ्चितार्तो
न वा तत्परो ज्ञानरूपस्वरूपः ।
सदैवाहमेतन्नचेत्थं तथेत्थं
नमोऽहं नमोऽहं नमोऽहं स्वरूपम् ॥

इत्यादि प्रवचनम् । एवमेव हि—

“ स्वात्मानं ब्रह्म तद्विद्धि सर्वमूलं सनातनम् ।
नैव क्रिया विक्रिया च नायमित्थं यथा तथा ॥
प्रतिक्रिया न चैवास्ति नायं कर्माभिवेष्टितः ।
नैवं चोपक्रियां विद्धि चाभिन्नं सर्वमुच्यते ॥ ”

इत्यादि प्रवचनम् । तस्मादात्मन्येवं प्रकाशः—यो ह्यहं सर्वनिष्ठः सर्वप्रतिभूतः, यस्यैवमेतदन्तर्गतं सर्वमिति, स च सर्वाधिकारी सर्वमूलमिति च विज्ञेयम् । तदित्थं नकारमकारौ, अहमेतत्परा-

वकारोकारौ च वेदितव्यौ भवतः । क्रियादिव्यवसायस्त्वात्मनि स्वभावतः साध्यः । तदेवंक्रमेण क्रियान्तरः क्रियादिप्रबोधो भवति । तत्सामानाधिकरण्यमपीत्थं भवति—एतत्संजातमेतदेतत्संजातमेतदिति चानवस्थमेवेति। अत्रेत्थं चानेके प्रयोगाः सन्ति। तस्मादेतदश्चैतत्प्रभावनात्परस्पराव्यवहितत्वमेव । तदेवंकारणेन सर्वसामानाधिकरण्यं भवत्येवेति विज्ञेयम् । तस्मात्क्रियादिव्यवहारस्यैवं विभावना भवति । इदमेव क्रियायास्तत्त्वम्, यदिदं सर्वत्र चात्मनो विद्यमानत्वम्, तदात्मन्येव तदावश्यकतानुरोधेन यश्च भवनव्यापारः स चैवेति विज्ञेयम् । यः कश्चिदस्ति, तदस्तित्वमेवकार्यं सूचयति । कार्यमन्तरेणास्तित्वमात्रस्यासंभव एवेति सर्वाख्यानैश्च स्पष्टमुक्तं भवति । अत एव—

"भावमात्रं च यत्किञ्चिद्यादृशं वा यथायथम् ।
तद्भावान्तर्गतं रूपं कार्यमावश्यकं तथा ॥
तस्माच्छून्येऽप्यशून्यत्वं निष्क्रिये च क्रिया भवेत् ।
एवं कार्यसमुत्पत्तिः संक्षयो वर्धनं ततः ॥
भावमात्रस्य शून्यस्य वर्तने सर्वगे तथा ।
अनन्तत्वमनादित्वं चातीतत्वमुपस्थितम् ॥"

इत्यादि प्रवचनम् । तस्माद्भावानुरोधेन तस्याकालिकत्वात्तदनियतसंबन्धेन तत्स्वभावमात्रस्यानन्तत्वं विधीयते । तस्यानन्तत्वाज्जगतस्तज्जायमानत्वाच्च तदनन्तमतीतं च व्यवस्थितं भवति । इदमेव



क्रियातत्त्वम् । एतस्यैवानेकव्यवहारेण संसरणाभिधानमिति व्याख्यानफलम् । तदेवं बीजेन सर्वस्य च संसारस्य निष्क्रियत्वं सक्रियत्वं चोपन्यस्तम् । अस्तित्वपक्षे निष्क्रियत्वमस्तित्वस्वभावपक्षे सक्रियत्वं चेति द्वित्वाभिधानम् । अन्यथा तु न द्वित्वं न च त्रित्वं न चैकत्वं च भवति । क्रियायां त्वस्यामयं नियमोऽपि वर्तते, यस्माद्यस्यारंभो भवति स तदवस्थां प्राप्नोतीति । यथा—एतत्संसारस्य महामन्वन्तरेणारंभः, पुनर्नियते महामन्वन्तरे तदन्तं कृत्वा यदि चेत्पुनर्महामन्वन्तरम्, तदा तस्मिन्महामन्वन्तरारंभे पुनरारंभ इति व्याख्यानसिद्धम् । यथा—अत्र बालकाः प्रजायन्ते, तदभावान्नाम पूर्वं नासीद्बालकः, इदानीं भवतीति । बीजेनानेनैव पूर्वमासीदिदानीं नास्तीति, अभावादागतोऽभावे गच्छतीति च विज्ञेयम् । वस्तुतस्तु सर्वोऽपि भाव एव । अत एव भावादागतो भावे तिष्ठति, भावे गच्छति, भावस्य नित्यत्वात्सार्वत्रिकत्वाच्च नागतो न तिष्ठति, न च गत इति सर्वोपदेशफलम् । तस्मादेवं प्रकारेण निष्क्रिये क्रिया संभवति, पुनस्तदवस्थां प्राप्नोति च । तत्क्रियाव्यवहारेणैव तद्रूपान्तरत्वाद्विक्रियेति मन्यते । दृश्यताम्—यस्य चात्र निष्क्रियात्वेन प्रवचनम्, सोऽपि कस्य चिद्विक्रियैव, क्रियायाश्चानन्तत्वात्क्रियायां विक्रियादेर्विद्यमानत्वाच्चेति । तदेवं क्रमेण क्रियातत्वनिर्धारणं कृत्वा कर्म क्रियतामित्युपदिश्यते । अत एव—

" येन तत्त्वं प्रजानाति यस्य कार्यस्य यद्विधौ ।
तत्कार्ये तस्य वै दुःखं तस्माज्ज्ञानं विधीयताम् ॥"

इत्यादि प्रवचनम् । तस्मात्तदित्थंभूता क्रिया सर्वथैवानुवेद्या भवति, भेदनिष्ठमभेदनिष्ठं च कर्म सर्वशः इति श्रुतेः । एवं प्रकारेण क्रिया चतुर्विधा चतुर्भिर्वेष्टिता सर्वत्रोपन्यस्तेति च विज्ञेयम् । अस्याः क्रियाया यथावच्च तत्त्वं तु मीमांसायां कर्मानुरोधेन व्याख्यातम् । शिल्पशास्त्रादिभिस्तत्परिणामविपरिणामौ, तदारंभावसाने च वेदितव्ये । अस्याश्च प्रणवपरत्वात्प्रणवस्यातीतत्वाच्च, तदवाच्यत्वमेव संसूच्यते । परं त्वस्तित्वपक्षेण ह्यवश्यं तादृशं तदभिसूचितं भवतीति तद्विधानतया, संसारमात्रस्य चैकस्वरूपिणी क्रिया सार्वत्रिकी सर्वनिष्ठा च बोध्या भवति । इदं च सर्वं प्रणवाभियुक्तं प्रणवनिष्ठं नाम प्रणवरूपं चैवेति विज्ञेयम्। अत एव चैतत्संसारे प्रत्येकमणूनां दर्शने पुण्यमुक्तं भवति । अहमंशस्यैतदंशस्य च मिळित्वा नाशोपयोगित्वेन सर्वप्रकाशः । अहमेतन्नेत्यस्य ब्रह्मरूपत्वेन च सर्वेषां ब्रह्म विज्ञानसाधनत्वेन तत्प्रदर्शनौचित्यम् । तच्च पुण्यप्रभूतमिति विज्ञेयम् । अत एव प्रत्येकमणूनां ब्रह्म विद्धि, अणुं परमाणुं च विद्धि, ज्ञानं विज्ञानसंज्ञकं क्रियाभ्यस्तं सनातनं च प्रकृत्युपन्यस्तमेकं द्विकं त्रिकं चतुष्कमनेकजमेकाविर्भूतं सर्वस्वं सदा सद्भावावृतम् सत्परोदयम्, व्यवसायावृतं पूर्णमखण्डं च ब्रह्म विद्धीति श्रुतिः । तस्मा-



तदनुरोधेन चैवं भवतीति विज्ञेयम् । इदमेव कर्म व्यापारपरं सार्वत्रिकं विश्वमात्रोपन्यस्तमतीतमनन्तं च वेदितव्यम् । अत एव—

" शब्दे शब्दे क्रियायोगे वाक्ये वाक्ये समान्तरे ।
वेदितव्यमिदं तत्त्वं कर्मेत्थं क्रमसंज्ञकम् ॥
प्रकारस्तत्क्रमाधीनः क्रमः कालविशेषतः ।
तस्मादेवंप्रकारा च क्रिया संसरणस्य हि ॥
सर्वं संसरणं नित्यं संसारे सर्वभावना ।
ओमित्येकाक्षरेणैवं वेदितव्या यथायथम् ॥"

इत्यादि प्रवचनम् । तस्मादस्मिंश्च संसारे संसरणमित्थं क्रियाप्रतिक्रियानुरोधेन भवत्येवेति, सर्वस्य तादृशत्वेन संसारत्वेनेति च प्रवचनम् । अत एवोपनिषद्येवं प्रवचनम्—ज्ञानसंसारोऽयं क्रियासंसारोऽयमिच्छासंसारोऽयमित्यादि । एवं भावेनैव ह्यणूनां प्रत्येकमपि च संसारत्वेन विवक्षा । तस्माच्छब्दसंसारोऽयं शास्त्रसंसारोऽयमिति भावेन चैकैकव्यक्तिसृष्टेः पृथक्त्वं तदेकत्वं सर्वैक्यं च नियतमिति वेदैश्च सर्वैः स्पष्टमुक्तं भवति । तस्मात्क्रियातत्त्वमित्थमोङ्कारपरमोमित्येकस्वरूपं सनातनं च वेदितव्यम् । एकसूत्रानुरोधात्प्रत्यगात्मसंभावनायाश्च सर्वस्येश्वरत्वेन प्रवचनम् । तस्मादेवमुक्तिः—

"ज्ञानेश्वरः कर्मणि चेश्वरोऽह-
मिच्छापरो वा विभवैः समस्तैः ।
सर्वान्तरस्थश्च समः प्रशस्तः
सर्वेश्वरं विद्धि सनातनं माम् ॥"

इत्यादि प्रवचनम् । तस्मात्तद्रूपेण च भावानुरोधिना सर्वमिदं कर्मावृतं कर्मव्यवहारपरं च यथायथं वेद्यमित्युपदेशफलम् । अत्रैव ह्यारंभोऽवसानं च, तदन्तत्वं तदादित्वं सर्वानादित्वं सर्वानन्तत्वं सर्वस्थत्वं सर्वपरत्वं सर्वावृतत्वमिति च सिद्धान्तो विज्ञेयः ।

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे क्रियाविशेषस्वरूपनिरूपणं नाम ॥ चतुर्विंशस्तरङ्गः ॥**

---

ॐ

अथ

# पञ्चविंशस्तरङ्गः ॥

---

तदित्थं क्रियाप्रतिक्रियाविक्रियोपक्रियाणां कर्ममात्रत्वेन व्याख्यानम् । अथात्मनो यदीप्सिततमं तदेव कर्मेति व्याख्यानात्कर्ममात्रस्य तत्त्वं स्वभाव एव भवतीति विज्ञेयम् । यद्यप्येकैव क्रिया च स्वभावेऽस्ति न तत्र द्वित्वव्यवहारः, स्वयं भवतीति बीजात्स्वयमेव



तिष्ठतीति तदुपाख्यानेन च द्वित्वव्यवहारस्यासङ्गतत्वमेव ; तथापि द्वित्वमात्रस्य चैकत्वपरत्वात्तदेकस्यापि द्वित्वपरत्वाच्च, एकत्व-द्वित्वयोर्द्वयोः सत्ताप्राधान्येन चैवं स्वभावेन प्रवचनं भवति । यदिदं द्वित्वं तदेवैकत्वम्, यदेकत्वं तदेव द्वित्वमिति व्याख्यानात्तदैक्यानुरोधाच्च द्वित्वैकत्वयोर्धर्ममात्रं त्वेकमेव भवति । यदिदं दर्शनमदर्शनं च भावाभावरूपमस्तित्वानास्तित्वरूपं च भवति, तत्सर्वं तादृशं स्वभावपरं बोध्यम् । अत एव——

"न च द्वित्वं न चैकत्वं बहुत्वं नैव किंचन ।
स्वभावोऽयं स्वभावोऽयं स्वभावोऽयं सनातनः ॥
ओमित्येकाक्षरेणैवं प्रोच्यतेऽनन्तसंज्ञकम् ।
आरंभश्चावसानं च सर्वं स्वाभावसंवृतम् ॥"

इत्यादि प्रवचनम् । तदेवंप्रकारेण द्वित्वप्रदर्शनमेकनिष्ठं बोध्यम् । न कश्चिदणुरपि चैतादृशो बोध्यः, यस्य द्वित्वव्यवहारो नास्ति । सति च द्वित्वे संबन्धः, स च संबन्धस्तृतीयः सत्तानिषेधरूपो मकारात्मकश्च भवति । एवं सर्वत्रोपन्यासाच्च सर्वो धर्मः सर्वत्रेति व्याख्यानफलम् । अत एव——

"सर्वत्रोत्पत्तिसद्भावो नाशश्च स्थितिरेव च ।
वर्तते त्रितयं सर्वं जगन्मात्रं परावरम् ॥"

इत्यादि प्रवचनम् । तस्मात्सार्वत्रिकं च कर्म त्रित्थमेव भवति, द्वित्वैकत्वमूलं तन्निष्ठं जगच्चानन्तमिति प्रवचनात् । एवमस्या-

नन्तत्वमनादित्वं च व्यवस्थितम् । तत्र चैतद्दृष्ट्या परिमितत्वप्रवचनेन संसाराख्यानमत्र प्रदर्शयितुमेवं प्रयोजनं च भवति । तथा हि—यश्चायमात्मा सत्वपरिमितः सर्वाविभिन्नः सर्वनिष्ठः, स च सर्वातीतः परश्च, यच्चैतत्तत्परिमितं चेति । दृश्यताम्—एतन्मात्रे भवति सर्वथैव परिमितत्वम्, यो ह्यैक्यविरोधपरः, विरोधाविर्भूतश्च तस्य सर्वथा तदैक्येन परिमितत्वम्, एवं परिमितं च साद्यन्तम्, साद्यन्तं चैतदेवेति लोकदर्शनेन बोध्यं भवतीति । यो ह्यहं सत्वनन्त एव । तदेतदि परिमितेऽपरिमितकार्यं कथं भवतीति न वक्तुं शक्यम्, कार्यप्राधान्ये त्वेतदोऽप्यनन्तत्वमुच्यते । यद्यपि स्वयं यादृशः तादृशमेव तत्कार्यमिति व्याख्यानम्, तथापि तद्व्यवहारपरं बोध्यम् । यदेतत्तत्परिमितम्, तस्मात्तत्कार्यमपि परिमितं भवति । परं त्वहमः कार्यस्यानन्तत्वादेतदित्यस्यापि भवनमनन्तमपरिमितं च भवति । इत्थमत्र च व्याख्यानम्—एतदो भवनं त्वात्मसदृशं भवति, आत्मैक्यविरोधात्, परं त्वेवं भूत्वा परिमितत्वमाप्नोतीति तत्फलितार्थ इति । अन्यथा तु सिद्धान्तादात्मप्रबन्धाच्चैतदोऽप्यपरिमितत्वमनन्तत्वं च बोध्यं भवति । यथा हि नानाभवनानामनन्तत्वमेकत्वं चाविरुद्धमिति चोच्यते, तथा चाहमेतदोरैक्यं च बोध्यम् । तदेवं बीजेन हि सर्वातीतत्वेऽपि सर्वत्राहमेतदोराभासश्चैवं प्रसिद्धः—नाहमन्तरेणैतत्, नैतदंतरेणाहम्, इति । द्वयोः परस्पराश्रयित्वेन वाच्यवाचकवाक्याद्युत्पत्तिः, आत्मनश्चैतद्य-



भिनिवेशे सति, कार्यस्वभावेन सर्वमिदं नानात्वमात्मसदृशमनन्तं च संभवतीति । परं तु तन्नेतिस्वभावेन सर्वस्यैकत्वं च प्रसिद्धम् । तदित्थं भूते च संसारे सर्वथैकमेव वेदितव्यम् । योऽहं सचान्य इति तत्स्वरूपम् । अत एव—

“ आत्मवत्तज्जगत्सर्वमात्मा चाहमितीर्यते ।
एकत्वं यो हि जानाति स पण्डित इति श्रुतिः ॥
स एव धार्मिकः साधुर्मुक्तो धीमानितीर्यते ।
ज्ञानी परमधर्मज्ञः सर्वमूलाधिकारवान् ॥ ”

इत्यादि प्रवचनम । तस्मादयमात्मा, देशकालपरिणामारंभावसाननियमादिभिर्विवर्जित एव भवति । अस्य च स्वरूपं नेति नेतीति प्रशस्तं भवति । अहमेतन्नैव पूर्णम् । इदमेव ब्रह्म परमात्मा भवति । अत्रैव सूत्रात्मादिपरिभावना । तस्य वै ब्रह्मणः स्वरूपम्, सरसं नीरसं निर्गुणं सगुणं सामयं निरामयं साकारं निराकारं साधारं निराधारं सेहं निरीहं चेति विज्ञेयम् । तद्यथा—

“ न च द्वित्वसिद्धं न च त्रित्वसिद्धं
न चैकं तदेवं न चेत्थं तदित्थम् ।
समं व्यापकं धर्मरूपं स्वरूपं
विभिन्नं विभिन्नं विभिन्नस्वरूपम् ॥
परं कारणं कालिकं कर्तृरूपं
तदेतद्विभातं न चैतद्विभातम् ।

अनानन्दमानन्दरूपस्वरूपं
विभिन्नं विभिन्नं विभिन्नस्वरूपम् ॥
न कारो मकारः स्वयं सर्वसारो
ह्यतीतानुसारो हि सर्वैर्विहारी ।
निरस्तोऽनिरस्तश्चिदंशोऽप्रमेयो
विभिन्नोऽविभिन्नो ह्यभिन्नोऽयमात्मा ॥
न वाच्यो विवाच्यस्तथा वाचकोऽहं
न वाक्यं प्रवाक्यं परो गोचरोऽहम् ।
महत्वं लघुत्वं समानस्वरूपं
विभिन्नं ह्यभिन्नं विभिन्नस्वरूपम् ॥
सदाकारमाकारमाकाररूपं
मकारो मकारो नकारो जगत्तत् ।
विभुर्व्यापको व्याप्यरूपस्तुरीयो
विभिन्नो ह्यभिन्नो विभिन्नोऽयमात्मा ॥
न चायं स्वरोऽहं न च व्यञ्जनोऽहं
न रागादिको देशमूलं न चाहं ।
सदा सर्वदायं विरागस्वरूपो
विभिन्नो विभिन्नो विभिन्नोऽयमात्मा ॥
अनारब्धमारब्धमारंभणीयं
जगद्भावितोऽहं जगद्भावनाऽहम् ।



अनित्यावृतं ज्ञानमज्ञानरूपं
विभिन्नं विभिन्नं विभिन्नस्वरूपम् ॥
क्रिया सर्वमिथ्या तया सर्वमिथ्या
स्वरूपं हि मिथ्या विभिन्नं हि मिथ्या ।
अखण्डस्वरूपं सदाखण्डरूपं
विभिन्नं विभिन्नं विभिन्नस्वरूपम् ॥
न चैवान्तरङ्गो न वै वाक्यवेद्यो
न तन्मध्यगो नेति नेतीति शस्तः ।
न वै नित्यरूपो न वानित्यरूपो
विभिन्नो ह्यभिन्नो विभिन्नोऽहमात्मा ॥
सदैवाहमेतद्वियुक्तप्रयुक्तो
न वै योगयुक्तो न वाऽयोगशस्तः ।
न वेदं न वैतन्न चायं न चैत-
द्विभिन्नोऽविभिन्नो विभिन्नस्वरूपः ॥
विशिष्टो न सामान्यसिद्धो विचारः
प्रचारो न कश्चित्प्रसारो न चाहम् ।
सदैवामृतोऽहं सदैवाजरोऽहं
विभिन्नोऽविभिन्नो विभिन्नोऽयमात्मा ॥"

इत्यादि प्रवचनम् । तदेवं भावेनात्मानं सर्वदा विद्धीत्युपदेशः । आत्मा तु सर्वान्तर्गतः सर्वनिष्ठः क्रियया विशिष्टोऽवशिष्टश्च

भवति । आत्मन्येव हि सर्वाभासः, अयं चामृतो नित्यो भवति । यद्यपि—जायमानोऽयमात्मा म्रियमाणोऽयमात्मा, इत्यादि प्रवचनम्, तथापि तदेतदंशपरं प्रसिद्धम् । वस्तुतस्तु जीवात्मप्रत्यगात्मसूत्रात्मपरमात्मादीनां चैक्यमेव, नात्र भेदः । केवलं कार्यव्यवहारपरेण च स्वभावेन भेदप्रदर्शनमपि भवतीति, सर्वथा स्वभावानुरोधेन कर्म करोतीति, तत्कर्मणः प्रकारोऽपि तादृश इति चानन्तानुभवेन बोध्यम् । यद्यप्यनन्तेऽतीते च प्रवचनमयुक्तम्, तथापि चैतदित्यस्य परिमितत्वात्परिमितपरं च व्याख्यानं विधीयते । एवं भावेन हि परिमितं च ज्ञात्वा, परिमितेनाऽपरिमितं चानुमेयं भवति । तदनुमानसिद्धेन हि परिमितज्ञानेन च तत्सदृशं तमेवमात्मानं विज्ञाय कार्यप्रसारणं च कर्तुं समुचितं भवति, येन सर्वव्यवहारः सार्वत्रिकं नित्यं च कर्म संभवति । इदमेव तत्फलं भवति । तस्मात्संसारेऽस्मिंश्च सारमात्रस्य भवनव्यवहारमात्रं च सार्वत्रिकमुच्यते । एषा चोक्तिः प्राधान्यबोधाय बुद्धिविश्रान्त्यै च समुपपादिता भवति । यद्यपि सर्वेषामनभिज्ञत्वाद्वक्तव्ये च तस्मिन्दोष एव भवति, तथापि वक्तृत्वधर्मोऽपि तादृशो भवति । यथा चैवं सर्वस्वं जगत्, इति परिभाव्य सर्वथा सर्वदा वक्तृत्वधर्मानुरोधेन वक्तव्यमेव । न च वक्तव्यं विना किंचिदपि दृश्यते । कथञ्चित्प्रकारोऽपि कश्चिदणूनां प्रत्येकमपि च सर्वथा वाच्य एव भवति ।



एषैव हि संसारवार्ता भवति । वार्तामन्तरेण हि सर्वत्र प्रळय एव । यावच्च संसारः, तावद्वार्तानामन्वादेशो भवत्येव । उक्तस्यपुनरुक्तिरन्वादेश इति व्याख्यानतया कथंचित्प्रकारेण चोपात्तकार्यस्य पुनः प्रवचनमिति वार्ताफलम् । तस्माद्वार्ता तु सर्वथा भवत्येव । सर्वथैवान्वादेश एव हि दृश्यते, क्रियाप्रतिक्रियाव्यवहारात् । कश्चिच्च प्रयत्नेन वार्तामनुसाधयति, कश्चित्तु स्वभावेनानुसाधयति, परं तु तद्भवनं सार्वत्रिकम्, प्रकारमात्रे च भेद इति निश्चयः । आवश्यकतायाः सर्वत्र विद्यमानतया सार्वकालिकत्वेन च क्रियाप्रतिक्रियानुरोधेन पुनः पुनः प्रवचनम् । एषैव हि वाक्यसृष्टिः । यद्यपि वार्तायामपि द्वित्वमुक्तं सद्वार्तासद्वार्तेति, तथापि तत्कथनमावश्यकपरं भवति । न चासत्किंचिदस्तीति व्याख्यानपक्षे सर्वा च वार्ता ह्यवश्यकपरा । परं त्वत्र चैवं भेदः, यत्र यत्र यादृशी यादृशी चावश्यकता यस्मिन्यस्मिंश्च काले भवति, तत्र तत्र तदनुरोधेन तस्याश्च सदसत्त्वं भवति । तादृश एव वार्तोपन्यासश्च कर्तव्यः । यद्यप्येवमुपदेशोऽपि वर्तते—इमां वार्तां मा कुरु, नैषा वार्ता सनातनीति, तथापि तदुपदेशपरं वचनम् । एषा त्वनावश्यकपरा, या च नामैतत्कालविरुद्धा । अतस्तन्माकुर्वित्युच्यते । अत्रैवं सूचितं भवति—या च वार्ता त्वेतत्कालविहिता, द्वयोः साम्यानुबद्धा च सैव ह्यावश्यकपरा, या चैतत्कालानुरुद्धा सैव कर्तव्येति । तदित्थं वार्तैव सर्वसंसारानु-

सारिणीति शब्दशास्त्रैः स्पष्टमुक्तं भवति । सार्वत्रिकी वार्ता चेयमेव । अत्रैव हि परस्परसापेक्षत्वे चैकेनैकस्य पूर्णत्वम्, एकेनैकस्य कार्यसाधनम्, एकेन सहैकस्य व्यवहारः मैत्रं शत्रुभावश्च भवति । पुनरेवम्, तदनुवर्तनं विवर्तनं परिवर्तनमेकेनैकभवनम्, तत्कालादिव्यवहारः, दिवारात्रिस्थितिः, खिन्नाखिन्नत्वम्, हर्ष-शोकावित्यादिक्रियाप्रतिक्रियाभ्यां हि जाता वार्ता चेति तद्भावो विज्ञेयः । क्रियाप्रतिक्रियाभ्यां विभूतिर्वार्तेति ब्रह्मसूत्रात्, ज्ञानक्रिये-च्छाविर्भूता वार्तेति मीमांसकोक्तेः, क्रियाप्रतिक्रियानिर्दिष्टा च वार्तेति वेदोपन्यासाच्च संसारेऽस्मिंश्च सर्वदा सर्वथा च वार्ता भवत्येव । भावेनानेनैवानेके चोपदेशा भवन्ति । एवमुपदेशस्य महत्वमप्युक्तम् । अन्यथा तु नोपदेशेन किंचित्सिद्धम्, भाव्यमेव हि सर्वमूलम् । उपदेशोऽपि तद्भाव्यान्तर्गतो भवति, वार्तायाः सन्निधानात् । वार्ता च भाव्या । अतस्तदनुसारिणी भवति वार्ता । तस्मादुपदेशोऽपीति विज्ञेयम् । या या वार्ता क्रियाप्रति-क्रियानुभूता चास्मिन्संसारे भवति, भविष्यत्यभूद्वा, तस्याश्चानुकथनं नाम वार्ता । क्रियायाः प्रतिक्रिया तदैक्यविरोधरूपा, तत्प्रदर्शन-मेवोपदेशः । अत एव व्याख्यातॄणामेवमधिकारः—कश्चिच्छृ-णोति न शृणोति वा, आचरति नाचरति वा, स्वात्मानं च निष्प्रयोजनं मत्वा सर्वस्यैकत्वभावेन चोपदेष्टव्यमिति इदमेव । व्याख्यातृत्वफलं भवति ।



एतदर्थमेव व्याख्यातृत्वशक्तिः ग्रन्थनिर्माणशक्तिश्च भवति, यया चैतत्संसारवार्तायाः सर्वजीवात्मप्रबोधश्च भवति । यो हीत्थंभूतां च शक्तिमनुप्राप्य नैवं करोति, स च भाव्यस्य विरोधी भवति । तेन तद्दोषरूपत्वेन प्रवचनम्, जीवात्ममात्रस्य चैकत्वनिर्देशात् । एतद्वा-र्तानुरोधेनैव स्वाभिमतस्यान्वेषणं सर्वथा भवत्येव । तत्रैवं भावः— यच्च किंचिदहं जानामि, तदन्यं प्रज्ञापयामीति । अन्यथा तु स्वस्व-ज्ञानस्य स्वस्मिन्नेव प्रयोजनम्, स्वज्ञानेनैव स्वात्मनः कार्यसाधनौ-चित्यम् । किमलं व्याख्यानेन स्वप्रज्ञानप्रकाशेन । तत्र स्वज्ञानप्रका-शनतया यत्स्वाभिमतसूचनम्, तदेव वार्ता भवति । यच्च किञ्चि-ज्जानाति, तस्य प्रकथनमेव ज्ञानप्रतिक्रिया भवति, ज्ञानरूपा च या क्रिया तस्याश्चापि प्रतिक्रियावश्यकत्वात्सर्वस्य प्रतिक्रिया भवतीति बीजाच्च । एवंप्रकारेणैव सर्वे च ग्रन्था भवन्ति । तत्तत्कालानुरोधेन ह्यावश्यकतामनावश्यकतां च परिभाव्य, भाव्यानुसरणेन स्वावस्थां च विज्ञाय, संसारावस्थां च विभाव्य ग्रन्थांश्च सर्वान्निर्माति, तद्व्याख्यानं च करोति । एवं भाव्यादिकमपि संभवति । यस्य च ग्रन्थभावप्रबोधो न भवति, यदा च ग्रन्थकर्तुराशये भ्रम-संभावना भवति, तदा तु तद्ग्रन्थबलेन तत्कालावश्यकतया च, एतन्नियन्तारः स्वात्मन्यवधार्य तदर्थान्तद्ग्रन्थभाष्यादिकं कुर्वन्ति कारयन्ति च । तदेवं व्याख्यानमपि प्रदापयन्ति । यद्यप्यभिमान-परेणापि मानप्रतिष्ठानुरोधेन भाष्यादिकं क्रियते, तथा लौकिक-

प्रयोजनेनापि च, तथापि तच्च वार्तापरं वेदितव्यं भवति। तद्द्वारैव तस्य केवलस्य भ्रमनिवारणं भवतीति विज्ञेयम्। यद्यप्यभिमानपरः स्वमानप्रतिष्ठाप्रयोजनेन भाष्यादिकमभिरचयति, तथापि तद्भाष्यादिकेन तस्याप्रतिष्ठैव भवति, अप्रतिष्ठां प्राप्य चासूयापरो भूत्वा तद्विचारपरः सुविचारतामनुप्राप्नोति। भ्रमो नेह कश्च न इति बीजाद्भ्रममात्रस्यात्रोपन्यासश्च न कदापि भवति। यदि भवति स तदावश्यकतानुरोधेनैवेति निश्चयेन बोध्यम्। एषा हि वार्ता, संसारप्रज्ञापनरूपा तु, ब्रह्मविद्या साक्षाद्ब्रह्मनिष्ठा परायणी च भवति। तत्र च भ्रममात्रमुपयुक्तमेव। गोपनीया चैषा विद्या। तदनुरूपाधिकारिणं प्राप्यैव तदुपदेशौचित्यम्। यदा चैतद्विद्यायां यस्य चात्यन्तप्रवृत्तिः, स्वानुष्ठानविचाराकुलत्वम्, तदा तस्य प्रबोधो भवत्यनया चेति सार्वत्रिकः सिद्धान्तः। यस्मिन्नंशे च यस्य स्वानुष्ठानं न भवति, न च तदन्वेषणपरा च जिज्ञासा, स चांशस्तस्य निरर्थो भवति। एषानन्ता परा विद्या गीता, तद्बोधनाय जिज्ञासायाः परमावश्यकता। अत एव पाठकानामेवं शिक्षा भवति—जिज्ञासां दृष्ट्वा तदवस्थां च विज्ञाय तच्छरीरादिकं सुपरीक्ष्य चाध्यापयितव्यमिति। तदेवं बीजेन क्रियाप्रतिक्रियाविज्ञानिनं ज्ञानाद्यवस्थाज्ञानिनं चाधिकारिणं प्राप्य युक्त एव हि सर्वश्चोपदेशः इति विज्ञेयम्। दृश्यताम्—सर्वस्य प्रणवपरत्वं सर्वं च पृथक्त्वैकत्वयुक्तमिति च बोधस्तूचित इति। मानं चात्रेदम्—



नास्तिकोऽपि ग्रन्थनिर्माता भवति, द्रष्टव्यमिदम्, यो हि नास्तिकः स न ब्रह्म जानाति नापि चात्मानं नानात्मानं निषिद्धं च, एवं ज्ञात्वापि स्वाभिमतमन्यं प्रबोधयति, यदि चेदसंबद्धमेव सर्वमस्ति, नचास्मिन्नंशे परस्परसापेक्षता, नापि चैक्यम्, तर्ह्यन्यावबोधनेन किं फलमिति परिभाव्यम्, परं त्वनुरोधदृष्ट्या भाव्यं सर्वत्रेति नियमात्तस्य हठेनापि बोधः, सति हठे सर्वैक्यप्रभासनं भवत्येवेति। एवंबीजेन हि वार्ता विभिन्ना नेह काचनेति सूचितत्वात्संसाराख्यानं परिमितपरं प्रणवव्याख्यायां वक्तुमुचितमेव भवति। प्रणवस्यातीतत्वात्संसारस्यातीतान्तर्गतत्वाच्चाहमेतन्नेत्यस्यानुरोधेन संसारमात्रस्य च सार्वत्रिकस्य प्रज्ञापनं कर्तुमुचितमेवास्ति। दृश्यताम्—एतत्संसारावधारणपर एव वेदो भवति, तद्वेदमहावाक्यं नामेदं मूलभूतं प्रवचनम्, अकारोकारमकारबीजेन हि लब्धम्, तत्रैव हि प्रत्येकं परमाणूनामणूनां च बृहतां बृहत्तराणां व्याख्यानौचित्यम्, सर्वस्य निर्णयपरत्वान्निर्णयस्योङ्कारपरत्वादोङ्कारस्य सार्वत्रिकत्वाच्च सर्वनिर्देशपरमिदं प्रवचनं चेति। तस्मादनेनैव ह्येतत्संसारस्य सार्वत्रिकश्च व्यवहारो बोध्यो भवति। अत्र चैतत्संसारमात्रं यच्च किञ्चिद्भासते तत्सर्वं नेति प्रबुध्यताम्। यद्यप्यस्तीत्यस्य कथं नावबोधः, तथापि प्रबोधाय चैतदनुकरणमवश्यं भवति। अमन्तव्यस्यापि व्याख्यानपक्षे मन्तव्यत्वं च प्रबोधनार्थमुक्तं भवति। तस्मादेवमुक्तिः, यदिदं प्रत्यक्षमस्ति तदभावे

कीदृशमिति । एवं व्याख्यातॄणां परिभावना भवति । अभावस्य नाम संभवेन प्रत्यक्षाभावः, अविद्यमानतायामपि मन्यतामिति विज्ञेयम् ।

भावाभावयोर्द्वयोः सार्वत्रिकत्वात्तदतीतत्वादनन्तत्वाद्वा, प्रथमं नास्ति किञ्चिदिति बुध्यताम् । शून्यस्वरूपं हि सर्वथा चाकाश एवेति विज्ञायते, न च तत्र तमोनुभासः प्रकाशानुभासश्च भवति । आकाशस्य त्वनुभासो नास्ति, किं तु तदेवेति प्राधान्यबोधायोक्तम् । यद्यप्यतीतेऽनन्ते च कार्यं तु भवत्येव, तर्हि नास्तीत्यस्य च केवलस्य मन्यमानत्वं कथमुपनीयते; तथापि प्रभवस्यानन्तत्वादतीतत्वाच्च शून्यस्याप्यनन्तत्वमतीतत्वं च तादृशं भवति । अन्यथा तु सर्वदा सर्वथा प्रभवनस्यासंभव एव । यद्येवं मन्यसे—सर्वथाऽस्त्येव सर्वम्, न नास्ति कुत्रचित्, तर्हि सर्वथा कालातीतत्वेन प्रभूतानां कुत्र च स्थानम्, कुत्र पुनः प्रभवनमिति दोषप्रयुक्तो भवतीति । तस्मात्तच्छून्यस्यैवानन्तत्वं पूर्वमुपन्यस्तं भवति । तदनन्तत्वबीजात्तद्भवनानन्तत्वम्, स्थानानन्तत्वम्, क्रियानन्तत्वमित्यादि सर्वस्यानन्तत्वं वेद्यम् । एवं भावेन यस्य यावत्संसारत्वेनात्र प्रवचनम्, नाम यावत्पर्यन्तं बुद्धिविरामो न भवति, तस्य तावत्पर्यन्तं स्वबुध्या सर्वमवगन्तव्यं भवति । यत्र च विरामो भवति, यत ऊर्ध्वं च नावबुध्यते, तत्सर्वं च संसार इति मन्यताम् । एवं विज्ञाय ह्यस्तित्वात्पूर्वावस्थायाः परिधारणं क्रियते ।



यदिदमस्ति तस्य कालावश्यकत्वम् । तथा हि—कस्मिंश्च काले तदिदमभूत्, कियन्तं कालं तिष्ठति, स्थास्यति वा, ततः पूर्वमवस्था च कीदृश्यासीत् इति । यद्यप्यस्तित्वं च सार्वत्रिकं सार्वकालिकं सर्वस्माच्च कालादस्ति सर्वदैव तिष्ठति सर्वदा स्थास्यति चैतत्परिभावनमनुपयुक्तम्, तथापि नित्यस्यास्तित्वस्यानस्तित्वस्य च प्रवचनेन द्वयोरनन्तत्वं सार्वत्रिकत्वं च बोध्यम् । नित्यश्च प्रळयः नित्या च सृष्टिः, एवं दिवारात्रिः शयनं जागरणं जननं मरणं क्रियाव्यवहारः रागद्वेषौ सुखं दुःखं च सर्वं नित्यमेवेति व्यवस्थितम् । एवं बीजेन हि सर्वेषामस्तित्वमनास्तित्वं च सार्वत्रिकं परिभाव्यम् । तस्मादनुमेयमिदमस्तित्वात्पूर्वमनास्तित्वमवश्यं भवति । तर्ह्येवं बोद्धव्यम्—यदिदं किञ्चिदस्ति तत्सर्वं नासीत्पूर्वम्, पूर्वं त्वनस्तित्वमेव, निष्क्रियात्वे चैव क्रिया भवतीति । यद्यपि निष्क्रियात्वे क्रियायाश्चासंभव एव, तथाप्यात्मस्वभावेन तत्संभावना चावश्या भवति, समूहानामेकदेशपूर्णानामपूर्णत्वम्, अस्तित्वस्यानास्तित्वम्, अनस्तित्वस्यास्तित्वमिति च बीजात् । यदिदमहमेतन्नेति, तच्च परं ब्रह्म सनातनं भवति । एतस्यास्तित्वं च सर्वथैवेति विज्ञेयम् । एतत्त्रितयशब्देन समाहृतेन यस्य कस्य चिद्बोधो भवति, तत्परं ब्रह्मेति वा । तत्रास्तित्वानुरोधेन कार्यस्यावश्यकत्वं भवति । यः कश्चिदप्यस्ति, स किञ्चिदपि करोत्यवश्यम्, तस्मिन्नकृतेऽपि किंचित्तस्माद्भवत्येव, स्वभाव-

तश्चास्तित्वस्य फलावश्यकत्वात् । अन्यथा तदस्तित्वमपि न भवति । यदिचेदनस्तित्वमपि मन्यसे, अस्तीत्यपि न किंचिदिति वक्तव्यौचित्यमायाति, तदा तु प्रत्यक्षसिद्धमिदं जगत्सर्वं निरर्थं स्यात् । एतज्जगत्प्रत्यक्षेणैवानुमेयमिदम्, अस्ति कश्चिदस्य कर्ता नामैतस्य मूलबीजं किंचिच्चास्त्येवेति । अत्र च नास्त्यस्तीति द्वयोः प्रदर्शनेन चेदमप्यनुमेयं भवति, एतन्मूलमप्येतादृशमस्तिनास्तिविशिष्टमिति । अत्रैवं भावः—यच्च किञ्चिदत्र भासते तथा नाम तत्सदृशं स्वरूपं नास्त्येतन्मूलस्येति । अयमेव नास्तिपक्षः । नास्तिपक्षे त्वस्मिन्नानुमानम्, परं त्वेतस्य मूलमस्त्येव किञ्चन इति बीजेन तदस्तित्वानुमानम् । एवं यदिदमस्तित्वानस्तित्वविशिष्टं कथंचिद्रूपकम्, तदेव परं ब्रह्मेति बोधनार्थमुच्यते । तस्यास्तित्वानस्तित्वविशिष्टप्रवचनशब्दश्चाहमेतन्नेति बोध्यम् । एकशब्देन तु द्वित्वविशिष्टस्य च प्रवचनस्यासंभवादेतज्जगन्मात्रस्यैकत्वनिर्देशेन च तस्याप्येकत्वं वक्तुमुचितं भवति । एवं व्यवहारेण हि तदेकार्थकः शब्दश्चोच्यते, तदोमिति । जगत्यस्मिंश्च भवन्त्यनेकाश्चावस्थाः, तथा संभावना च, परं तु तत्सर्वमेकनिष्ठं भवति। एवं बीजेन हि जगन्मूलस्यापि जगदवस्थानुसारित्वेन प्रवचनम् । तदेकत्वेऽप्यनेकशब्दसंभवना भवति, तदर्थमिति । तत्र स्पष्टप्रवचनशब्दश्चैतत्संसाररूपो ह्यहमेतन्नेति प्रसिद्धो भवति । ओङ्कारशब्दश्च सर्वस्मिन्नपि संसारे महासंसारे च विद्यते । सर्वस्यां



च भाषायामेतत्प्रवचनशब्दो भवत्येव । नास्तिकानामप्येवं शब्दोऽभिधीयते । यद्यपि नास्तिकानां त्ववचनमेव युक्तम्, ये च ब्रह्म न जानन्ति; तथापि ते तदनुभूतशब्दकालनिर्देशादिकं प्रवदन्त्येव । परं तु तदर्थमवाच्यमप्यस्तीति विज्ञेयम् । तेनैवानुमेयमिदम्, प्रत्यवसानार्थं शब्दस्वरूपमनेकमिति । अत एव—

“ कुत्रचिच्चोच्यते ब्रह्म परं ब्रह्मेति कुत्रचित् ।
कुत्रचित्परमात्मेत्यहमेतन्नेति कुत्रचित् ॥

ओङ्कारः प्रणवश्चेति कुत्रचित्कालदेशतः ।
विश्वावास्यानुसारेण जायते वचनं सदा ॥

आवास्याविहितं वाक्यं सर्वार्थेन समन्वितम् ।
कालमावश्यकं ज्ञात्वा वक्तुं योग्यं परावरम् ॥

विद्यते सर्वथा ज्ञानमर्थः सर्वत्र विद्यते ।
सर्वं प्रयोजनं सर्वः सर्वथा सर्वदा ह्ययम् ॥

एकत्वेनैव बीजेन ह्यतीतत्वविभावनात् ।
तद्वक्तुमुचितं ज्ञात्वा वाच्यमेवं स्वयं परम् ॥ ”

इत्यादि प्रवचनम् । तस्मादनेकनामान्यनन्तानि तादृशानि भवन्त्येव । यच्च प्रत्येकमणूनां विद्यमानं नामाभिधानम्, तत्सर्वं ब्रह्म परं वेदितव्यम्, सर्वस्य ब्रह्मनिर्देशपरत्वात्, सर्वं ब्रह्मेति प्रवचनाद्वा । तदित्थमुच्यते—

“ब्रह्मनामानि सर्वाणि संसारविहितानि च ।
विभिन्नानि ह्यभिन्नानि चाभेदः सर्वथा मतः ॥

यः कश्चिद्भासते भेदो जगन्नानाभिधीयते ।
सर्वं ब्रह्मेति तद्विद्धि तदेकत्वमनन्वयात् ॥”

इत्यादि प्रवचनम् । तस्मात्तदित्थं ब्रह्म विद्धीत्युपदेशः । ततो निष्क्रियात्वे तादृशस्वभावेन भवनमेवेति सार्वत्रिकोक्तिः । अस्य चानन्तत्वेन निर्देशः सर्वत्रोपन्यस्तो भवति । तस्मादतःपूर्वं निष्क्रियमकालमदेशं शून्यं च सर्वं विद्धीत्युपदेशः । यद्यप्ययं संसारस्तु महाविष्णुसंभूतः, महाविष्णुस्तु संसारक्रमेण संसारान्महत्वमाप्नोति, तथाभूतश्च संसारमभिसृजति ; तथापि तत्कारणमात्रं तु शून्यपरं वेद्यमेव । यदा च महाविष्णुः स्वमहत्वं प्राप्नोति, तदा तु तत्कार्यं च शून्यरूपमेव । तत्रैव तत्कारणं तु तादृशानुरोधेन कर्म करोतीति फलितम् । इदं चात्र व्यवहारेण बोध्यम् । यथा—जायमानः पुत्रः स्वानुरोधेन स्वावस्थां प्राप्य स्वात्मानुष्ठानेन कार्यं च प्रकारयतीति । एवं महाविष्णोरपीति बोध्यम् । सत्यां चैकावस्थायामेकाकिनं दृष्ट्वा ह्युद्वाहो भवति, तेनानेकसंबन्धोत्पत्तिः परिदृश्यते, ततोऽत्र पुत्राद्युत्पत्तिर्विधीयते, एवं महाविष्णुरपि कार्याधिष्ठातृत्वेन विष्णुब्रह्मादिकान्प्राप्य कार्यं करोतीति । एवं शेषदेशे शून्ये स्वात्मनोऽवधारणं सर्वथैवं प्रसारयति



तत्प्रसारणव्यवहार एव सांसारिकी क्रिया भवति । प्रसारणानां प्रसारितानां वा समूहस्य संज्ञा संसार इति विज्ञेयम् । तदित्थंबीजेन हि संसरणव्यवहारमात्रं प्रभवति । एतत्सर्वमोङ्कारमयं प्रसिद्धमेव । तत्सर्वं च ज्ञातव्यमित्युपदेशफलम् । महाविष्णुस्त्वणोरारभ्य तत्पर्यन्तमतिश्रमेण च सर्वं ज्ञात्वा ज्ञात्वा प्रगत इति विज्ञेयम् । इदं तु स्पष्टमवगम्यते—यस्य च यत्र प्राप्तिर्भवति, तत्पूर्वस्य सर्वस्य च विधानस्य स परिज्ञाता भवतीति । तस्मात्सर्वमिदं ज्ञात्वा विज्ञानी सन्महाविष्णुपदवीं प्राप्नोतीति विज्ञायते । प्राप्य च तां स्वसमीपे तन्निष्क्रियात्वमेव पश्यति, तत्क्रियास्वरूपपरिभावनया हि तदवधारयतीति च बोध्यम् । प्रत्यण्वप्येवमवधारणं विज्ञेयम्—यस्याश्चावस्थायाः यां चावस्थां यः कश्चित्प्राप्नोति, तस्यामवस्थायामपि तत्समीपे च निष्क्रियात्वप्रदर्शनम् । क्रियायाश्च सार्वत्रिकत्वेन सर्वत्र चाक्रियात्वे क्रियात्वमुद्धरति, उद्धरणं च तत्कारणे प्रवर्तनमिति विज्ञेयम् । तत्रापि च तादृशं विज्ञेयम्, महाविष्णोः सामीप्यमेवेति, संसारात्मनिर्देशावस्थया बोध्यम् । तद्यथा—

“ महाविष्णुसिद्धो न देशो न कालो
न वै संस्थितो नानुभावः प्रभावः ।
सदैवं विचारः सदैवं विचार-
स्तदोङ्कारहारः प्रचारः प्रसारः ॥

मया ज्ञातमेवं न पूर्वं न किञ्चि-
त्तदोङ्काररूपं परं स्यात्प्रशस्तम् ।
अहं नैतदेतत्स्वभावप्रजोऽहं
स्वभावात्मकः कर्तुमेवं विचारः ॥"

इत्यादि प्रवचनम् । एवमेव—

"महाविष्णुत्वसंप्राप्तौ भवेदेषा विचारणा ।
नैव देशो न कालोऽस्ति न शब्दो नैव च क्रिया ॥
अस्माद्यज्जायते पूर्वं ब्रह्मतत्वं परावरम् ।
तेनैवाहं स्वयं ब्रह्म ब्रह्मभावे च सर्वशः ॥
तस्मादेतत्क्रिया सर्वा करोत्येवावधारणम् ।"

इत्यादि प्रवचनम् । तदेवंभावेन ब्रह्मज्ञानवत्तया ब्रह्म भवतीति बीजाद्ब्रह्म भूत्वा ब्रह्मकार्यं करोतीति मान्यम् । सर्वं ब्रह्मेति बीजाच्च प्रत्यण्वपि ब्रह्मत्वं सिद्धम् । तत्सार्वत्रिकसूत्रेण चातीतेन सर्वत्राहमेतन्नेत्यस्योपस्थितिर्भवति । ततो महाविष्णुश्च स्वात्मानमहमेतन्नेति विज्ञाय तदोङ्कारविधिना संसारमसृजदिति व्यवहारः । इदमेव हि संसरणं भवति । एवं संपत्त्या हि सर्वेषां महाविष्णुत्वं संसारप्रसारणं च सिद्धं भवति । तत एव ब्रह्म भूत्वा ब्रह्मकार्यसाधनं क्रियतामित्युपदिश्यते । तदेवंनियमेन संसारधारणं महाविष्णुना भवतीति निष्क्रियायां क्रियासंभवः । तदेवंविचारेण क्रियामात्रस्य सर्वत्र प्रयोगः, तत्कारणौचित्यमिति च सिद्धान्तः ॥



**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे**
**क्रियाभेदनिरूपणं नाम**
**॥ पञ्चविंशस्तरङ्गः ॥**

---

ॐ

**अथ**

# षड्विंशस्तरङ्गः ॥

---

अथ तदित्थंबीजेन प्रथमं नास्तीह किंचन इति मन्तव्यमेव, तदनुरोधात् । तदभावे चेत्थंरूपा च सांसारिकी क्रिया भवति । अत एव—

"शून्यं यत्रेति सर्वस्थं नेह नानास्ति किंचना ।
तत्रैकनिष्ठमन्यं यत्तन्नाना ह्यभिधीयते ॥
इदं संसरणं विद्धि क्रियामात्रं यथेप्सितम् ।
सर्वं ह्यनन्तं चातीतं संसारोऽपि च तादृशः ॥
एतत्संसारसद्भावे ब्रह्मानेकशिवादयः ।
कार्यं कुर्वन्ति तत्रैवं स्वस्वभावे समात्मके ॥

प्रसिद्धमप्रसिद्धं च स्वेप्सितानीप्सिते तथा ।
ओमित्येकाक्षरावृत्या सर्वभावप्रभावना ॥
ब्रह्मतत्त्वमिदं तत्त्वं सिद्धं प्रणवसंज्ञकम् ।"

इत्यादि प्रवचनम् । तस्मादेतत्संसारस्याप्यनन्तत्वम्, अत्र च संस्थितानां ब्रह्मादीनामप्यनन्तत्वं च बोध्यम् । एवमेव—

"प्रत्येकमप्यणूनां हि विष्णुर्ब्रह्मा शिवस्तथा ।
बोद्धव्यश्च स्वभावेन स्वरूपेण च सर्वथा ॥
अणूनां च प्रयोगेण भवेद्ब्रह्माण्डकल्पना ।
जगत्संभावना तत्र विश्वसंभावना तथा ॥
संसारो बुध्यते तत्र चानन्तानन्तसंभवः ।
एकस्मिन्नप्यणौ चास्ति सर्वातीतानुभावना ॥"

इत्यादि प्रवचनम् । तस्मादनन्ते च निर्वचनं न भवति, किं तु प्रत्येकमणूनामनन्तत्वव्यवहारः । तस्माच्चैवातीतमशब्दमबोध्यमिति परमार्थः पक्षः । एवमणोर्जायमाने ब्रह्माण्डेऽपि तत्रत्याणुसंभावनयैव तादृशत्वमिति मण्डलस्यातीतत्वं विज्ञेयम् । अत एवोच्यते—

"सर्वं खल्वप्यनन्तस्थं सर्वातीतमगोचरम् ।
ओमित्येकाक्षरान्तस्थं महामण्डलसंवृतम् ॥
भवत्येव भवत्येव सर्वकाले क्रिया परा ।"

इत्यादि प्रवचनम् । एवमेव—



"अनन्त एतज्जगतो विभावः
परान्तरं विश्वमनन्तरूपम् ।
ज्ञानेन विज्ञानवृतं शरीरं
समं परं ब्रह्म सनातनं स्यात् ॥

समान एतत्परिवेष्टितोऽहं
वृतो महामण्डलमण्डितोऽहम् ।
एकोऽयमात्मा विभवस्वरूपः
समानजं ब्रह्म समं परं स्यात् ॥

सदावकाशो विहितावकाशो
निरावकाशस्य समाधिरूपम् ।
सर्वोत्तरं सर्वगुणप्रशस्तं
माया परा नित्यविचिन्तनीया ॥"

इत्यादि प्रवचनम् । एवमेव—

"अनादित्वमेवं समादित्वमेवं
परं गोचरं चाप्यनन्तं स्वरूपम् ।
अनावेष्टितोऽहं जगद्वेष्टितोऽहं
न भिन्नं ह्यभिन्नं विभिन्नस्वरूपम् ॥

यदेतत्त्वया दृश्यते लोकरूपं
यदेतन्मया कल्प्यते नित्यमेव ।

न चैतन्मया न त्वया वा हि किञ्चि-
त्सदैवानभिन्नं ह्यभिन्नं स्वरूपम् ॥

नकारो मकारः स्वयं तत्त्वमेत-
द्विकारं सदावेष्टितं ब्रह्मरूपम् ।
अनाद्यन्तमेतत्सदाद्यन्तरूपं
न भिन्नं ह्यभिन्नं विभिन्नस्वरूपम् ॥"

इत्यादि प्रवचनम् । तदेवंक्रमेणानन्तानन्तव्यवहारदर्शनेनापि च प्राधान्यबोधायैतत्संसारव्यवस्था किंचिन्मात्रेण प्रदर्शयितुं चेहोच्यते । दृश्यताम्—प्रथमं नास्ति किंचन इति मत्वा महाविष्णुरभिमन्यते, इति । महाविष्णोश्चापि तादृशातीतस्वभावतया बहुत्वसङ्कल्पः, पूर्वस्य बहुत्वप्रदर्शनात्सर्वत्र तथा प्रयोगाच्च । तदेवंप्रयोगेण सर्वत्रेद-मुपन्यस्तं भवति । प्रत्यण्वपि च बहुत्वप्रयोगोऽत्र भवति । एवं भावेन चैतन्मूलमनुमेयम् । तदनुरोधात्तदैक्यविरोधाच्च संसारानुभासनम् । महाविष्णोस्त्वेकप्रकाशवत्वमुच्यते । योऽयं महाविष्णुः, स च प्रकाशवान्, इदं च प्रकाशवदित्यादिकं प्राधान्यबोधायोच्यते । न चानेन तद्बोधविपरिणामो भवति । एकस्थेन च सार्वत्रिको-दाहरणेन सर्वस्य यथेष्टज्ञानसंभवः । तस्मात्तद्भावानुरोधेनेदं प्रवच-नम् । इदं च सर्वं प्रणवपरमहमेतन्नान्तर्गतं बोध्यम् । तत्र च योऽहं स महाविष्णुरिति मन्यताम् । स च महाविष्णुः सदा प्रकाशवान्, तत्रैव प्रकाशोऽभिवर्तते । यद्यपि तमसोऽनुभाव-



नापि तत्रोचिता भवति तमःप्रकाशयोश्च नित्यसंबन्धात्, तथापि चैतत्संसारात्पूर्वं तत्र शून्यमेवोक्तं भवति । ततस्तम इव सर्वं तमः प्रवेद्यं भवति, आसीदिदं तमोभूतमित्यादि प्रवचनात् । तत्प्र-काशवन्तं विज्ञाय सर्वसंसारसंभवोप्यभिधीयते, योऽयं महाविष्णुश्च प्रकाशवान्, तस्य प्रकाशसंबन्धेन तमश्चाप्यवश्यं भवति । आवश्यकता विशिष्टा चातीता माया भवतीति व्याख्यानतया तमःप्रकाशयोर्द्वयोरावश्यकत्वम् । तदनुरोधेन क्रियामात्रं वेदि-तव्यम् । प्रकाशस्योपाधिरेव तमश्चेति सर्वत्र स्पष्टमुक्तं भवति, तमसि प्रकाशस्य विद्यमानत्वमिति बीजात् । अत्र भवति परस्पर-माधाराधेयभावः । अत एव—

"तमश्चैवं प्रकाशेन प्रकाशस्तमसा भवेत् ।
आधाराधेयभावस्थे सर्वलोकतमःप्रभे ॥
प्रभा च विद्यते यत्र तमस्तत्रैव विद्यते ।
तमसो विद्यमानत्वे प्रभाया विद्यमानता ॥
वस्तुतस्तु द्वयोर्भिन्नं ब्रह्मरूपं सनातनम् ।
न प्रकाशस्तमश्चैव सर्वं प्रणवसंज्ञकम् ॥"

इत्यादि प्रवचनम् । तस्मात्तमःप्रकाशयोस्तादृशत्वेन संभावना भवति । योऽयमात्मा स प्रकाशवान्, नाम स्वयं प्रकाशरूपः, यच्च किञ्चिदेतत्तत्तमः, ताभ्यां भिन्नं नेति, वितयं भवति । सति प्रकाशे तमःप्रवचनम्, सति च तमसि प्रकाशप्रवचनम् ।

अन्यथा सर्वस्यावाच्यत्वाद्ब्रह्मैव सर्वम्, तावदवाच्यौ भवतः। तदेवं-बीजेन यो महाविष्णुः स चाहम्, तत्रैव प्रभा तमश्चापि, तत्रैव प्रभावानपि स्वप्रभायां तिष्ठति तदवयवित्वेनेति विज्ञेयम्। यस्य तु प्रकाशो भवति तं विना प्रकाशस्याप्यप्रकाश इति सर्वैः स्पष्टमुक्तं भवति, कार्ये च कर्तुर्विद्यमानत्वमिति न्याय-व्याख्यानात्। यद्यपि प्रभाप्रभावतोरभेदः, तथापि प्रकाशस्य तमःकार्यत्वेन ततो भिन्नं च कार्यमवश्यं भवति। यः प्रभावान् महाविष्णुः, स च स्वयं सार्वत्रिकेण विधिना प्रकाशे तिष्ठति। तत्र चैतत्त्रितयं भवति, प्रकाशः प्रकाश्यः प्रकाशक इति। प्रकाशकस्तु महाविष्णुः, अकारनिष्ठश्चायमात्मा भवति, प्रकाश्यश्च तन्महा-विष्णोरंशश्चेच्छारूपः प्रकाशस्थः, प्रकाशस्तु साक्षादनुभूयते, इति तेषां स्वरूपं विज्ञेयम्। यद्यपि महाविष्णुस्त्वेकव्यक्तिक एव, तथापि तत्र सार्वत्रिकव्यक्तिकत्वमवश्यं भवति। अणोरन्तर्गतं जगत्, जगदन्तर्गतो ह्यणुरिति प्रसिद्धव्याख्यानात्सार्वत्रिकत्वप्रदर्शनाच्च बोध्यम्। तत्रैव प्रकाश्यांशत्वेन प्रवचनम्। अत एवोच्यते—

"जीवोऽयमीश्वरांशश्च मुक्तो भूत्वा च तद्गतिम्।
प्राप्नोति परमानन्दं स्वस्वभावं सनातनम्॥"

इत्यादि प्रवचनम्। एवमेव—

"अहं सार्वत्रिको नित्यो ममैवांशो जगन्मयः।
ममैवांशो भवेज्जीवो ह्यहं ब्रह्म सनातनम्॥



तं मां विद्धि च मां विद्धि मां विद्ध्येव त्रयात्मकम्।
यतश्च सुखमाप्नोति तदेकत्वमिहोच्यते॥"

इत्यादि प्रवचनम्। तस्मात्तस्य प्रकाशांशत्वं सर्वथैवोक्तं भवति। यश्च सार्वत्रिकः प्रकाश्यः सूत्रपरश्च, येन प्रकाशेऽवश्यं तिष्ठति प्रकाश्यः, स चात्मा ह्यतीतः। यो हि संसारपरश्च सार्वत्रिकः, स च परिमितः, स चैवांशः। अंशपदेन तु तद्भागस्य ग्रहणम्। भागश्च तत्र न संभवति, सर्वैक्यानुरोधात्। इदं च तद्भागभवनं छायाद्यनुधारणम्। तदेवं विधानेन महाविष्णोश्चांशस्तस्मिन्प्रकाशे तिष्ठति, तत्र स्थित्वा च कार्यं भावयतीति बोध्यम्।

सर्वत्र चात्मनो विद्यमानता, तथागमनप्रसारणता चेत्यादि-व्याख्यानात्कार्यसंभावना भवति। तत्कार्यानुरोधेन प्रकाशस्तम-स्याविशति, तदावेशेन प्रकाशवतां प्रकाशे विद्यमानत्वेन तमसि चित्रो भवति। तत्रैवं भेदः—यावच्च तमःप्रकाशयोः पृथक्पृथ-ङ्निर्धारणम्, तावत्तस्य तमः प्रोच्यते, अन्यस्य प्रकाशो ह्युच्यते, प्रकाशस्थस्य प्रकाश्यत्वं हि प्रोच्यते, प्रकाशवतो हि महाविष्णु-त्वमुच्यते, एवं तमस्यपि तदंशस्य स्थितिः, तमसो व्याख्यानं न विशेषपरं सूक्ष्मत्वात्तमसोऽप्रदर्शनाच्च। परं तु योगदृष्ट्या तत्प्रदर्शनसंभवेन तत्रत्यस्यापि प्रवचनौचित्यम्, स एव लोके पर-मात्मेति। एवं प्रकाशतमसोश्च योगो भवति। योगावस्थाया-मेव तत्संज्ञायां भेदः। अवस्थयैव संज्ञा भेदोऽपीति व्याख्यानेन

बोध्यम् । वस्तुतस्तु सर्वस्यैक्यात्सर्वार्था चैका संज्ञा भवति । तदेवंबीजेन तमःप्रकाशयोर्योगे च सा पृथक्पृथक्संज्ञा भवति । एवं द्वयोः सामीप्येऽपि पृथक्पृथक्संज्ञा चोक्ता । तत्संज्ञया सामीप्यमात्रस्य बोधः प्रसिद्धः, तन्मिलितसंज्ञया वा सापेक्षस्य बोध इत्यादि तत्प्रयोजनं भवति । तयोश्च समीपवर्तनी चेयं संज्ञा, प्रकाशो दैवप्रकृतिःशक्तिः, शक्तिरेव प्रकाश इति बीजादिति । यादृशी च यत्र शक्तिर्भवति, तादृशश्च तत्प्रकाश इति लोकप्रदर्शनादिदं बोध्यम् । तमसः संज्ञा तु तत्सामीप्ये मूलप्रकृतिरित्युच्यते । तयोरंशयोरपि संज्ञा, परात्मा चाऽपरात्मेति भवति । परात्मा च मूलप्रकृतिस्थः, तमोभावाधिगतः, अपरात्मा च दैवप्रकृतिस्थः प्रकाशभावाधिगतः । समीपस्थानां च योगो ह्यावश्यको भवति । यो यस्य समीपगतः, तेन सह तत्संबन्धो ह्यावश्यको भवति । संबन्धस्तु मेलनम्, यावच्च संबन्धो न भवति कथञ्चित्सप्रकारकः, तावद्वस्तुद्वयमेलनं न भवति । सति च वस्तुद्वये संबन्धो ह्यावश्यको भवति । एषैव ह्यावश्यकता स्वभावपरा । तत्संबन्धकर्त्री च तृतीया तयोरेकस्था सत्ता भवति । सर्वमेतच्च लोकविभावनयैव बोध्यम् । यच्च किञ्चिदत्र भासते, तदेव मूलमिति सांख्याभिमतम् । अत एव—

> मूलभूतमिदं सर्वं मोक्षो ह्यत्रैव मन्यते ।
> बन्धश्च विद्यतेऽत्रैव परमार्थं न किंचन ॥"



इत्यादि प्रवचनम् । तस्मात्तदनुरोधेनैवं बोध्यम्—अहमेतन्नेत्यैक्यादहमः प्रकाशवत्वप्रवचनतया चैतदा तमःप्रवचनतया परिवर्तनपक्षेऽप्यहमेतदोश्च सामीप्यम्, तन्नकारेणैक्यान्मेलनमपीति । अत्राप्येवं व्यवहारः—अहमंशस्यैतदंशस्य च मेलनात्कार्यानुभवः, अत्यन्तप्रभायुक्तो ह्यणुश्चात्यन्ततमसा सह कार्यं करोतीति दर्शनेन बोध्यमिति । अत एव "अहमो ह्यणुश्चैतदोऽणुना सह कार्यं करोतीत्याद्युक्तिः । सर्वं च तमःप्रकाशपरमिति सांख्याभिमतं भवति । तस्मात्तमःप्रकाशमयं ब्रह्म तदेकं नकारात्मकमिति विज्ञेयम् ।

तदेवंभावेन प्रकाशतमसोश्च व्यावर्तनं भवति । तदित्थं तमःप्रकाशमेलनं भवति । तत्र च प्रकाशभावेन प्रकाशपक्षे यदा यो भवति तमसि, तदा तत्पुरुषस्य नाम प्रकाशवतश्चित्रमवश्यं भवति । द्वयोश्च तदंशे विद्यमानतया ह्येकैकोऽप्यंशस्तमेकैकांशमाकर्षति । अयमेव समानो धर्मः । येन येन सह यत्र यत्र वा साम्यं स तदाकर्षतीति विज्ञेयम् । तस्मात्प्रकाशस्य तमसा योगेन प्रकाशवतस्तत्र चित्रं भवतीति विज्ञेयम् । इदमेव चित्रकरणाभिधानम् । अत्रापि चैवं संबन्धः—प्रकाशस्तु सर्वत्र विद्यते, एवं तदनुरोधेन तमोऽपि सर्वत्र विद्यत इति । यदा चेत्थं भूतं तमो विद्यमानपदार्थमभियोजयति, येनेत्थं भूतमेतन्मात्रप्रकाशग्रहणं नाम प्रकाशाकर्षणं संभवति, तेन तदा तत्प्रकाशवतश्चित्रमाकर्षतीति

सार्वत्रिकोक्तिः । द्वयोरात्मनि विद्यमानत्वेन संबन्धसिद्धान्तत्वेन च चित्राकर्षणेन चित्रं भवति । यद्यपि प्रकाशमन्तरेणापि तत्पुरुषस्याविद्यमानतायां चित्रलेखनं नाम संभवति, तत्र न तमसो विशिष्टपदार्थप्रयोजनं न च प्रकाशवत्पुरुषप्रयोजनम्, किं तु स्वहस्तेन भूमौ स्वर्णादिके च पात्रे वा मनसि वा चित्रावरोधनं भवति; तथापि तत्प्रकाशपरमेव बोध्यम् । दृश्यताम्——केन चित्प्रकारेण दृष्टानामेव चित्रलेखनं चित्राकर्षणं च भवति, तत्प्रदर्शनाभिधानमेव प्रकाशविधिः, ये च चित्रकर्तारः चित्रशास्त्रवेत्तारश्च, ते चैवं भावेन सर्वं प्रकाशयन्ति, कीदृशोऽयं कीदृशं चास्य चित्रं भवतीति । एवमवधारणं च सर्वथा सर्वदा सर्वत्र च कुर्वन्ति । तदवधारणेन तस्य दृष्टपदार्थस्य सर्वं प्रकाशादिकं चित्ते वावरुध्य लिखन्ति । स्मृतेश्च ज्ञानप्रवचनतया ज्ञानस्य च सार्वत्रिकत्वेन स्मृतेर्वर्तमानपरत्वेन वर्तमानस्य सार्वत्रिकत्वेन च दृष्टानां स्मरणविधिना चित्रलेखनं भवति । तत्राप्येवं विधिः——स्वमनसि तत्स्मृत्वा स्मरणानुरूपं सूक्ष्मं तच्चित्रं च प्रकाशमयमवधार्य, स्वनेत्रसमीपे तच्छायामारोप्य हस्तेन तस्य लेखनं भवति, इदमेव चित्रारोधनम्, चित्राकर्षणं तु तमोभिभवनेन प्रकाशवतां तत्समीपे संस्थाप्य संभवतीति । यद्यप्यदृष्टानामपि चित्रसंभवः, तथापि तत्प्रकाशपरं बोध्यम् । अदृष्टानामपि पदार्थानां चित्राकर्षणं तत्प्रकाशद्वारा संभवति । प्रकाशवन्तं



संस्थाप्य तस्य यथायथं तमःप्रकाशौ स्वनेत्राभ्यां मनस्यवधार्य तल्लेखनं संभवति । यद्वा——एतच्छक्तिविशिष्टमन्तःकरणं विज्ञाय तदङ्गं स्पृष्ट्वा तदाकर्षणं भवतीति च विज्ञेयम् । एषा च चित्रसारिणी । चित्रसारिण्यां तु सुषुम्ना मध्यमा सर्पिण्यादिनाड्यान्तर्गतपदार्थानां तत्प्रत्यन्तरावस्थितानां चाकर्षणं भवतीति विज्ञेयम् । तस्यापि भवति विधानद्वयम्, अवरोधनमाकर्षणं चेति । अवरोधनं च वैद्यशास्त्रेण बुध्यते ।

वैद्यशास्त्रे चित्रसारिण्यभिधानं दृश्यते । अत एवोच्यते——दर्शनस्पर्शनाभ्यामेवं संपरिक्ष्येत रोगिणमिति । दर्शनेन स्पर्शनेन वा परीक्षा कार्येति तदर्थः । वैद्यानां च त्रिधा परीक्षा संव्यवस्थिता भवति, तत्रैका च दूतपरीक्षा इति महावैद्यानां नियोगः । महावैद्याः सर्वेऽपि दूतं दृष्ट्वा सर्वमनुमानेन निश्चिन्वन्ति । वैद्यशास्त्रे त्वेवमभिधीयते——

> दूतेन दूतकार्येण दूतशब्देन सर्वथा ।
> स्वावस्थासंप्रयोगेण कार्यमेवानुमीयते ॥
> गन्तव्यो वा न गन्तव्यो गत्वा किं भाव्यमेव वा ।
> तद्विचार्यौषधं दद्यादन्यथा दोषभाग्भवेत् ॥"

इति । अतश्च दूतवाक्येन दूतस्वरूपेण स्वावस्थासंप्रदर्शनेन च रोगिणां सर्वस्याश्चावस्थायाः परिज्ञानं भवति समुचितम् । एवमेव मार्गे प्राप्तवस्तूनामपि विज्ञानौचित्यम् । रोगार्थं च यच्छुभाशुभ-

स्वरूपं प्राकृतसंबन्धनियतम्, तदवधार्य ह्यौषधार्थं गमनस्यौचित्यम्। सर्वस्य सर्वत्र विद्यमानतया भाव्यस्य सार्वत्रिकतया च तद्विज्ञानसंभवः। वैद्यशास्त्रेऽपि ज्ञानेच्छाक्रियानुसंभूतं तृतयं भवति। तत्र चेदं सर्वं ज्ञानमात्रम्। तत्राप्येषा च चित्रसारिणी। दूतशब्देन तद्रूपेण तच्चेष्टया वा तद्गृहादिकस्य सर्वस्य चित्रं स्वागमनस्यावधार्य चैवं विचारो भवति, इत्थं कृतेनैवं भवतीति। एवमेतद्गृहचित्रमित्थम्, रोगिणश्चित्रं चेत्थम्, इत्थंभूतेन चित्रेणैतावत्पर्यन्तं साध्यमसाध्यं चेति विचार्य प्रगमनौचित्यम्। द्वितीयानुदर्शनेन रोगपरीक्षा इति च सद्वैद्यानां विधिः। सद्वैद्याश्च पथि परीक्ष्यैव शुभमशुभं च तत्र गच्छन्ति, गत्वा च तथा रोगिणं पश्यन्ति, तत्र च तस्य रोगिणो बाह्याभ्यन्तरयोश्चाल्पत्वाधिक्यप्रकाशेन स्वास्मिन्तच्चित्रमवरुध्य यथास्वशास्त्रपरिचियं सर्वं प्रवदन्ति, इत्थमयं तर्हि साध्यः, इत्थं तर्ह्ययमसाध्य इति। अत्रापि चित्रसारिणीविधिः। एवं केवलवैद्यास्तु स्पर्शेन रोगं परीक्षयन्ति। एवं स्पर्शेन तन्नाडीप्रयोगेण च तस्य रोगिणो यथावद्बाह्यान्तरस्थावस्थायाः स्वभावः संसूचितो भवति। वैद्यस्य वैद्यत्वं चावस्थायाः संसूचनादेव। सर्वस्यापि पदार्थस्यावस्थां यथावच्च परिज्ञाय तस्याश्चाल्पत्वमाधिक्यं च विज्ञाय वा तस्य समवस्थाकरणमेव ह्यौषधस्यौषधत्वम्। इदमपि भाव्यानुरोधि प्रयत्नसिद्धं च भवति। यद्यपि भाव्यमेव भवति किं तर्ह्यौषधेनेति, तथापि



चौषधं भाव्यपरं मत्वा प्रयत्नेनैव संसार इति बीजेन प्रयत्न एव भाव्य इति सुस्पष्टतया च तदौषधस्य युक्तत्वम्। यथायथं नियोजनमेव संसरणमिति वेदैश्च सर्वैः स्पष्टमुक्तं भवति। तेन संसारमात्रस्यावस्था च परिज्ञेया भवति। ज्ञात्वा च तत्साम्यम्, सामानाधिकरण्यं च यथायथं व्यवहारपरं वेद्यम्। सर्वसाम्येन सर्वेषां यथावस्थं स्वास्थ्यकरणेन वैद्यानां पुण्यभाक्त्वं समुपन्यस्तं भवति। पुण्यवन्तः किल सर्वेऽपि वैद्याः रोगसंक्षयकारणत्वादित्याद्युक्तिः। यद्यपि सर्वश्च नियम एव, अनियमो नेह क श्चन इति स्पष्टतया, अनियमे सत्येव रोग इति व्याख्यानतया च, अनियमाभावे रोगस्याप्यभवनमिति सिद्धम्, निमित्ताभावे नैमित्तिकस्याप्यभावः इति बीजात्; तथापि कालक्रमानुरोधेन द्वित्वव्यवहारतयाहमेतदित्यनुरोधेन च नियमानियमौ प्रशस्तौ भवतः। यद्यपि सार्वकालिकं सर्वम्, तथापि सर्वस्य क्रमपरत्वात् कालस्य क्रमिकत्वाच्च यस्मिन्काले यस्य च यावस्था भवति, तदवस्थाविरुद्धाचरणेन च रोगादयो भवन्तीति वैद्यशास्त्रेषु स्पष्टमुक्तं भवति। तत्र तस्य यथावदवस्थापरीधारणाय यो यत्नः क्रियते, तस्यैवौषधमिति व्यवहारः। वस्तुतस्तु सर्वमौषधमनौषधमिति व्याख्यानम्। तदेवंविधेन त्रिधा परीक्षा भवति। तदिदं परीक्षात्रितयं कृत्वा यथायथं तत्त्वमवधार्यानेन नियमेन, अस्यायं रोगः, एतदवस्था चेत्थम्, कार्यं चास्येत्थम्, अयं च श्रमोऽस्येत्थम्, कालश्चेत्थम्, कर्तव्यमित्थम्, कृतम

नेनेदम्, अस्यानेनेदानीमित्थं संबन्धः, ईदृशश्च वा संबन्धः, सेवनं चास्येदमित्थम्, अयमंशश्च विरुद्धः, अयमंशश्चाविरुद्धः, इत्यादिकं सर्वं परिभाव्य, तदवस्थां स्थूललिङ्गसूक्ष्मकारणस्थां च परिचिन्त्य ह्यौषधं कार्यं भवति। किञ्च—स्थूले चास्मिन्नेतादृशी शक्तिः, इत्थमिदं भूतस्थूलम्, तत्कार्यं चेत्थम्, इदं प्रसह्यमिदं चाप्रसह्यम्, अस्य स्थूलस्यैतल्लिङ्गेन संबन्धः, एतावान्कालिकः संबन्धः, एवं सूक्ष्मादीनामपि स्थूलसंबन्धं परिभाव्य तदौषधं कर्तुमुचितं भवति, इत्यादिसंबन्धपरिभावना चित्रसारिण्यभिधानेनैवेति विज्ञेयम्। एतच्चित्रसारिण्यभिधानस्य तु सर्वत्र प्रयोजनं भवति। शाब्दिकं चित्रमपि संभवति। यदिचेन्न वा दृष्टम्, तर्ह्यदृष्टपक्षेऽपि शब्दश्रवणमात्रेण शब्दद्वारा तत्प्रकाशमालोक्य हि चित्रलेखनं भवति। एवं शब्देऽप्यदृष्टेऽपि पुरुषं दृष्ट्वा तत्पुत्रपत्न्यादीनां चित्राकर्षणं स्त्रियं दृष्ट्वा वा भवति। एवं पुत्रादिकं दृष्ट्वापि चित्राकर्षणं वा भवति। तेषां शब्देन चित्रावरोधनमाकर्षणं च भवति। एवमेवात्यन्तचित्रसारिणीज्ञानतया तन्मित्रं दृष्ट्वापि चैकस्य मनुष्यस्य वा चैकपदार्थस्य साम्यमात्रेण चित्रप्रभावनं भवति। एकेन प्रदर्शनेन नाम तत्समाने यानि यानि तन्मित्रादीनि संभवन्ति, तेषां सर्वेषां चित्राकर्षणमवरोधजमिति चित्तसारिण्यभिधानमस्ति। एवं चित्रादपि चित्रसंभव इत्यनेकविधिः। तदेवं भावेन चित्रशास्त्रस्याप्यनेकव्यवहारः, तस्या-



प्यनेकप्रकारश्च भवति। एवं तादृशमनन्तमवाच्यं सांख्यमिति बोध्यम्। अत्र च प्राधान्यबोधनाय मुख्यं द्वयं प्रशस्तम्, चित्रावरोधनं चित्राकर्षणं चेति। तत्र चित्राकर्षणमेतत्परमुकारवाच्यं चित्रावरोधनं तज्ज्ञाननिष्ठमकारपरम्। ताभ्यां च भिन्नमचित्रम्। विचित्रं च मकारपरं बोध्यम्। अत एवेत्थमुक्तं भवति—

"चित्रावरोधनं ज्ञानपरं ज्ञात्वा विशेषतः।
आत्मविज्ञानमूलं च तद्भवेच्चित्रलेखनम्॥
दर्शनाच्छ्रवणाच्चैव तत्संबन्धप्रदर्शनात्।
अहं रूपमिदं विद्धि ह्यकारं प्रणवस्थितम्॥
चित्तस्याकर्षणं त्वेवं तमसा साधनेन च।
इदं क्रियापरं विद्धि चैतद्रूपमुकारगम्॥
ताभ्यां भिन्नं विचित्रं स्यान्मकारात्म नकारगम्।
एवं त्रितयसंबन्धः समाहारस्त्वचित्रकः॥"

इति। तस्मादित्थंभावेन चित्तावरोधनं चित्राकर्षणं च विचित्रमचित्रं च प्रशस्तं भवति। अत एवाज्ञानेन संसारस्य कार्यस्यावबोधेन विचित्रोऽयं संसार इति प्रवचनम्। इदमेव संसारवैचित्र्यम्। तद्यथा—

"कचिन्नित्या रात्रिः कचिदपि दिवा सर्वसहितः
कचिद्भावाभावौ कचिदपि विधेयः सुवलितः।

सदानन्तातीतं गणनमिह शस्तं व्यवसितं
सदानन्दं ब्रह्म स्वपरपरविद्याविलसितम् ॥
विलासो वै नित्यः परमसुखधामा ह्यभिवृत-
स्तदानन्दं सर्वं सुखदमिह लोकप्रकथनम् ।
अनन्ता वै माया परमसुखमूलं च नियतं
क्वचित्सौख्यं दुःखं क्वचिदपि विभावः प्रभवति ॥"

इत्यादि प्रवचनम् । अत्र च यत्क्वचित्क्वचिदिति प्रवचनं तदेव वैचित्र्यम् । सर्वं सर्वत्रेति बुध्या सद्भावावगमनं भवति । महाज्ञानफलमिदं चित्रम् । अत एव विचित्रं नानुकिञ्चन इति प्रवचनम् । तदेवमुच्यते—

" यत्किञ्चिद्भासते चात्र तद्ब्रह्मेति हि बुध्यताम् ।
सर्वं चित्रमयं ज्ञात्वा चित्री स्वात्मपरायणः ॥
एकत्वमिह च द्वित्वं त्रित्वं चैवं परावरम् ।
तदेकत्वं सदैकत्वमेकत्वं तद्विधीयताम् ॥"

इति । एवमेव संसारविज्ञानाय चित्रशास्त्रमध्येयमित्युपदेशः । तद्यथा—

चित्तावरोधनं ज्ञात्वा चित्रस्याकर्षणं तथा ।
चित्रनाड्यभिधानं च ज्ञात्वा चोङ्कारसंस्थितम् ॥



सर्वमेवं परं मत्वा संसारं विद्धि निश्चितम् ।
ज्ञात्वा चित्रमयं सर्वं संसारब्रह्मसंज्ञकम् ॥
स्वात्मानं तादृशं मत्वा ब्रह्मभावाय कल्पते ।
अनन्तमव्ययं चित्रं चित्रं चित्रस्य जायते ॥
सर्वानन्दमतीतस्थं संख्याभिन्नं परावरम् ।
द्वित्वत्रित्वक्रमेणैव सांख्यसंभावनेन च ॥
बोद्धव्यं सकलं विश्वं क्रमावश्यकतत्परम् ।
सर्वं चित्रमचित्रं स्याद्विचित्रं च परावरम् ॥"

इत्यादि प्रवचनम् । तस्मादेवमभिधानेन सर्वं संसारमात्रं चित्रपरमस्ति । अत एव—

" सर्वचित्रं हि सर्वस्य सूत्रात्मा चैकसंज्ञकः ।
सूत्रादपि भवेत्सूत्रं सर्वं चैवानवस्थितम् ॥
अस्मादेवाभिधानाच्च ह्यनवस्था विधीयते ।
सर्वस्य ब्रह्मरूपत्वात्सर्वं स्याच्च सनातनम् ॥"

इत्यादि प्रवचनम् । एवं विधानेन चित्रावरोधनं चित्राकर्षणं च संभवति । चित्रशास्त्रं चैतत्सर्वशास्त्रपरं भवति ।

वैद्यशास्त्रं तु परीक्षार्थकम् । योगशास्त्रं च परिभावनार्थकम् । एवं न्यायादिकमपि निर्णयाद्यर्थकं समुपन्यस्तं भवति । उपशास्त्रेऽपि भवति चैतत्प्रयोजनम् । एवं कामशास्त्रमपि भवति ।

कामुकानां परमं प्रयोजनमिदं भवति । शब्दद्वारा तद्रूपद्वारा वा चित्रावधारणं कृत्वा तत्प्राप्त्यर्थं चाकर्षणं भवति । दृश्यताम्——सुनारिणां सुपुरुषाणां च केवलेन शब्दश्रवणेन कामोद्दीपनं संभवतीति । अत्र चैवं प्रकारः——शब्दद्वारा तच्छब्दे तत्स्वरूपम्, तत्र च गच्छति, तद्दृष्ट्वा कामस्य चोभयनिष्ठत्वेन तयोः कामोद्दीपनमिति । एवं शिक्षापि तत्रास्ति——शब्दं श्रुत्वा तां दृष्ट्वा वा तदीप्सितानामाकर्षणं कर्तव्यम्, सर्वत्र विद्यमानतया चेप्साप्राबल्येन प्राप्तिरवश्यं भवतीति । इच्छायाः सार्वत्रिकत्वात्सर्वस्य सर्वपरत्वाच्च, एवमेवेदमुपन्यस्तम् । शब्दद्वारा च तस्मिन्नदृष्टेऽपि यस्य द्वरा च तद्द्वयोर्नियमादिसाधनम्, कार्ये कर्तुश्च विद्यमानं तत्तद्ध्यानम्, तेन तदवश्यं भवति । यादृशश्च यस्य वयःक्रमः, यादृशं यस्य स्वरूपम्, तादृशमेत्र तच्छब्दादिकमिति बीजेनानुमानं संभवति——अस्य चेत्थं रूपमिदं च वयः, ममेत्थमिदं चेति । एवमनुमाय हि एतद्योगेनैवं भवति, इत्थं हि साम्यमसाम्यं च, साम्येनैवमित्यादि भावनं चित्रप्रयोजनं भवति । एवं ज्योतिःशास्त्रेऽपि चित्रसारिण्यभिधानम् । दृष्ट्वा रूपं श्रुत्वा च शब्दम्, तत्स्थूललिङ्गसूक्ष्मकारणपरिज्ञानेन चैक्यानुरोधि कार्यं संभाषणं भवति । तदनुसार्येव तज्जन्मकालमन्तरापि तदवस्थादिविभावनं गृहफलादिकं च जानातीति तच्छास्त्रपरिज्ञानफलं भवति । एवं विधानेन सर्वत्रास्य प्रयोजनं बोध्यम् । स्वप्नादिकेऽप्यनुभूयमाने चित्रावरोधनं संभवति ।



नात्र चित्राकर्षणविधिः, तस्य तदवस्थायामपि विद्यमानत्वात् । स्थूलमात्रस्यैवाकर्षणप्रकारः । लिङ्गसूक्ष्मादीनां त्वेवमवरोधनं संभवति । स्वस्मिन्नपि तादृशं लिङ्गसूक्ष्मकारणादिक्रमोऽभिवर्तते । तेनान्यस्यापि परिज्ञानं संभवति; अन्यस्यानन्यत्वात्सर्वस्य ब्रह्मपरत्वाच्च । अत एवेदमेवं स्पष्टमुक्तं भवति । चित्रसारिणिकास्तु प्रत्यणु विभागं प्रदर्शयन्ति——शरीरचतुष्टयानां पृथक्त्वेन प्रदर्शयितुं हि साक्षात्प्रयोजनम्, इदं तेन जायते, अस्य कार्यं चेत्थम्, सूक्ष्ममित्थम्, लिङ्गमित्थम्, इत्थं च मिळित्वा शक्तिः, ईदृशी वा शक्तिः, तस्याश्चानेनैवं व्यापारः कारयितुं शक्यः, इत्यादि । सर्वं तदितिहासैर्विज्ञेयम् । इतिहासैश्चैवमुपन्यस्तम्——चित्रसार्यादिविधिना चित्रसारिणिका वैद्या ज्यौतिषिकाश्च सर्वं यथायथं कार्यं प्रज्ञापयन्तीति । इदं चात्र सूचितं भवति——यथा लोकचित्रं व्यवस्थितं तथैव मूलेऽपीति । मूलगतानामेवात्र प्रदर्शनं भवति, मूले हि सर्वस्य विद्यमानत्वात्, सर्वं मूलमिति प्रवचनाद्वा । संसारेण ब्रह्मानुमेयमिति न्यायसिद्धान्तः । एवं सिद्धान्तात्सर्वथा सर्वस्य तत्त्वं वेद्यमिति व्याख्यानफलं भवति । तदेवं विधानेन लौकिकेन चित्रेण चैतत्संसारमात्रभवनव्यवहारो वेदितव्य इति विज्ञेयम् । तत एव च चित्रकल्पनं च प्रशस्तं भवति । तच्चित्रविधिना चाहमेतदंशेन नामप्रकाशतमोविधिना च सर्वस्मिंश्च संसारे सृष्ट्यनुभवः । तत्र च महाविष्णुप्रकाशवतः छाया,

तस्मिन्प्रकाशे स्थित्वा तमस्याविशति । तस्मिन्तमसि तच्चित्रं भवति । तस्य च प्रकाशस्यान्यावस्था भवतीति समञ्जसोऽयं सिद्धान्तः ॥

**इति श्रीमहर्षिगार्ग्यायणप्रणीते प्रणववादे तृतीयप्रकरणे क्रियाविशेषस्वरूपनिरूपणं नाम**

**॥ षड्विंशस्तरङ्गः ॥**

समाप्तोऽयं द्वितीयो भागः

ब्रह्मविदाप्नोति परम् ।

ॐ शान्तिः ॐ

THE MODERN PRINTING WORKS, MOUNT ROAD MADRAS.

# प्रणववादद्वितीयभागशुद्धाऽशुद्धपत्रिका ।

| पत्रसं | पङ्क्तिसं | अशुद्धं | शुद्धं |
|---|---|---|---|
| २६ | १ | शाखभेदो | शाखाभेदो |
| ३६ | २ | शुक्लश्वेते | शुक्लश्वेति |
| ३९ | १० | मवेक | मनेक |
| ३१ | ९ | प्रयोजत्व | प्रयोजनत्व |
| ३२ | ८ | सार्वर्त्रिक्यः | सार्वत्रिक्यः |
| ३४ | ५ | तद्मित्समुदाये | तस्मिन्समुदाये |
| ४४ | ३ | ह्यास्यक | ह्यावश्यक |
| ४५ | ११ | जनाति | जानाति |
| ४६ | ६ | तादृशं | तादृशं |
| ४८ | १८ | तत्प्रान्पुवन्ति | तत्प्राप्नुवन्ति |
| ५२ | १२ | सब्दैत | शब्दैस्त |
| ५२ | १३ | तावद्दायो | तावद्वायो |
| ६० | २० | किरिया | क्रिया |
| ६२ | ११ | तेषं | तेषां |
| ६६ | ६ | विवाक्षायां | विवक्षायां |
| ९२ | १३ | तीणि | त्रीणि |
| ९४ | १४ | क्रमोपाद | क्रमोपादा |
| ९५ | १७ | ज्यौतिषा | ज्योतिषा |
| ९८ | ६ | विरुक्तं | निरुक्तं |
| १०० | १४ | क्रियोच्छा | क्रियेच्छा |

| पत्रसं | पङ्क्तिसं | अशुद्धं | शुद्धं |
|---|---|---|---|
| १०६ | ११ | कुवन्तीति | कुर्वन्तीति |
| १११ | १७ | कल्पाख्या | कल्पाख्य |
| ११२ | ३ | स्तूलाच | स्थूलाच |
| ११२ | १० | कार्यवित्यादि | कार्यमित्यादि |
| ११२ | १५ | तस्मादुःखस्य | तस्माद्दुःखस्य |
| ११३ | १८ | शङ्गा | शङ्का |
| १४२ | ३ | इदनी | इदानी |
| १४४ | ७ | न्यायोपाङः | न्यायोपाङ्गं |
| १४५ | १५ | मुपाङ्ग | मुपाङ्गं |
| १४७ | ७ | तस्माद्रव्य | तस्माद्द्रव्य |
| १५९ | १८ | मावस्यकं | मावश्यकं |
| १६४ | ८ | चोङ्कारोऽवं | चोङ्कारोऽयं |
| १७३ | १६ | विज्ञेम् | विज्ञेयम् |
| १७४ | ८ | सार्वात्रिक | सार्वत्रिक |
| १७५ | ६ | सापक्षत्व | सापेक्षत्व |
| १८४ | २ | हर्षो | हर्षः |
| १८४ | १६ | कं, च | कंच, |
| १९७ | १३ | मेत् | मेतत् |
| २०४ | ४ | विश्या | मिथ्या |
| २४४ | १३ | ह्यत | ह्येत |
| २५० | ६ | तस्माक्रिया | तस्मात्क्रिया |
| २५८ | ५ | कर्तृरिष्ट | कर्तुरिष्ट |
| २६९ | १४ | स्वतन्त्र्यं | स्वातन्त्र्यं |
| २८४ | ९ | यनन्तामा | यनन्तमा |
| २८५ | १२ | अन्यदृष्टया | अन्यदृष्ट्या |



| पत्रसं | पङ्क्तिसं | अशुद्धं | शुद्धं |
|---|---|---|---|
| २९३ | १० | तीयेव | तील्यैव |
| २९९ | ६ | तद्वितीया | तद्द्वितीया |
| ३०८ | १ | चैता | चैत |
| ३१३ | १३ | याद्दाशी | यादृशी |
| ६१७ | १४ | स्योङ्कोर | स्योङ्कार |
| ३२० | १८ | संभवना | संभावना |
| ३२५ | १४ | किंचना | किंचन |
| ३३२ | ५ | वर्तनी | वर्तिनी |
| ३३५ | २० | वस्तूना | वस्तुना |
| ३३६ | ७ | मिथम् | मित्थम् |
| ३४२ | ३ | सुनारिणां | सुनारीणां |
| ३४२ | ९ | द्वरा | द्वारा |

## प्रणववादार्थदीपिकायां शुद्धाऽशुद्धपत्रिका ।

| | | | |
|---|---|---|---|
| ७ | १८ | कमर्णा | कर्मणा |
| १५ | ७ | सुषुप्त्य | सुषुप्रा |
| ६२ | ७ | स्तृभिः | स्त्रिभिः |
| ६४ | ४ | पृतक्त् | पृथक्त्व |

# विमर्शे शुद्धाऽशुद्धपत्रिका।

| पत्रसं | पङ्क्तिसं | अशुद्धं | शुद्धं |
|---|---|---|---|
| ७७ | १६ | तोलयिषतां | तोलयतां |
| ८६ | २ | अधितिष्ठन्त | अधितिष्ठन्तो |
| ,, | १० | ज्ञानदिभि | ज्ञानादिभि |
| ९३ | १६ | ब्रह्मांश | ब्रह्मांशा |
| ९८ | ३ | प्ररस्पर | परस्पर |
| १०२ | ८ | व्याजहु | व्याजहृ |
| ११२ | १९ | प्रणवाध्यन | प्रणवाध्ययन |
| १३५ | ४ | देवतनां | देवतानां |
| १५० | १८ | रहित्वात् | रहितत्वात् |
| १७१ | ७ | भोदो | भेदो |
| १७६ | १६ | कृताभिर्णितं | कृताभिवर्णितं |

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer